बिन्दु—Generally a point but here the Anusvāra placed over the crescent forming part of the Oṁkāra. It is also used to designate the human seed. Which is the sense in which the word is used in a line, is determined by a reference to context.

ब्रह्मण्य—Learned in the Vedas; pious.

ब्रह्मपुर—Lit. the city of Brahman or that which is filled up by Brahman; used as a designation of the heart-cave.

ब्रह्मरन्ध्र—Usually the hole in the crown of the head through which the light of Brahman enters the body at the birth-time of each individual, and leaves it at death-time in the case of a perfect Yogi only, but here used to designate the Suṣumṇā Nādī (Sec. IV-30).

ब्राह्मकाल—The last Muhūrta (a period of 3 hours) of a night or the one just preceding the sunrise on the next date.

मन्त्र—An incantation or a mystical formula for invoking by the repetition thereof with faith any deity of the Vaidic or Paurāṇic pantheon.

मर्मस्थान—A vital part in which a group of arteries have clustered together. There are 18 such according to the opinion of the divine physicians Aśvins, concentration on and the extraction of energy from which constitutes a special kind of "Pratyāhāra" as explained in Chapter VII of this work.

महाप्राण—The cosmic air.

मात्रा—A unit of measure for keeping up a balance between the times to be devoted to the processes of "Pūraka," "Kuṁbhaka" and "Recaka", which make up a "Prāṇāyāma," according to Chapter VI of this work. Each Mātrā is equal to the time required to utter one syllable.

मुक्तिमार्ग—Ordinarily the path leading to final beatitude but here the designation of the Suṣumṇā nāḍī, (See IV.29) which carries the vital air with fire to the top of the head.

यम—Restraint. Ten kinds of restraints are required to be observ-

ed in order to prepare the senses and the mind for the practice of "Prāṇāyāma" as explained in stanzas 42-70 of Chapter I of this work.

योग—Union generally but here a union of the individual soul with the Supreme Soul. This term is also used secondarily in compounds to designate a means for effecting that union such as "Jñāna-yoga," "Karma-yoga", "Bhakti-yoga," or a means for attaining any substantial result ultimately leading to the said union, such as "Haṭha-yoga," "Laya-yoga," "Mantra-yoga," "Rāja-yoga." In this work it is used in the middle sense only as defined in Ch. I. 44/2.

रहस्य—A secret doctrine or formula; –अवसथ—A secret or secluded place of residence.

रेच or रेचक—The process in "Prāṇāyāma" consisting of the exhalation of the inner air through a nostril or the mouth.

रेफ—A grating sound made by the pronunciation of the letter "र".

लूतिका—A spider.

वायु—Ordinarily the atmospheric air but in this work it has also been used to designate any of the vital airs individually with its specific name prefixed to it as Apāna Vāyu or Samāna Vāyu. When not so prefixed it means either the Prāṇa or Apāna or all the ten Vāyus combined together after the Kuṅḍalinī is aroused, as determined by the context; –सखा—Fire.

वासुदेव—The deity who resides in the body *i.e.* the Supreme Deity, who residing in the heart is its inner ruler. This was the name of the only deity of the Bhāgavatas of the old school, prior to the rise of the Pāñcharātra sect. Its synonym was "Bhagavat" because it was "Saguṇa" as well as "Nirguṇa."

वियोग—Disunion or separation; –काल—The time of disunion or separation (of the individual soul from the Supreme Being) *i.e.* any time other than those of "Samādhi" and "Suṣuptī."

वैधं कर्म—The religious acts or rites prescribed (by the Scripture).

वंक्षण—The thigh joint or groin.

व्याहृति—Ordinarily an utterance but in religious works the utterance of a word expressive of any of the seven worlds from the earth upwards such as "Bhūḥ," "Bhuvaḥ", preceded by the syllable "Oṁ."

व्योमरन्ध्र—The apertures in the human body through which one has communion with the cosmic space (IV.66); also particularly the one in the crown of the head (VI.56-57).

शिखिस्थान—The seat of fire (in the bodies of human beings, quadrupeds and birds) as described in Chapter IV-11-15. The same is spoken of by its synonyms अग्न्यागार (IV.53). वह्न्यालय (VII.27) etc., at other places.

शिर:पद्म—The lotus in the head said to have 16 petals (See IX.37).

शोफ—A morbid swelling; a tumour.

श्रीवत्सवक्षस्—One on whose chest there is a special auspicious mark called Śrī Vatsa, made by a curl of hair, *i.e.* Viṣṇu.

षोडशच्छदसंयुक्त—(A lotus) endowed with 16 petals. (See IX-37).

सन्धि—A joint; an articulation (of the body) used in XII.1 in the sense of the perineum or frenum of the prepuce. सीवनी is its synonym.

सप्तमवर्ग—The seventh class of consonants in the Sanskrit alphabet.

समाधि—Complete self-integration and concentration on one object to such an extent as to make one forget one's individual existence for the time being; the name of the 8th constituent of Yoga dealt with in Chapter X. of this work. Unlike Patañjali, this author says that this constituent has no variety (See I. 49/2).

सहित-कुम्भक—That kind of Kuṁbhaka which is accompanied by Recaka and Pūraka as distinguished from the Kevala Kuṁbhaka which is not accompanied by them (See VI. 30-31).

सिद्धि—The achievement of an object aimed at; hence also the attainment of some miraculous powers. This work does not speak of it in the latter sense.

सीवनी—The perineum. सन्धि is its synonym.

सुषुम्णा—The name of the principal one of the 14 Nāḍis specifically described in Chapter IV of this work, as it is deemed necessary to know their positions and functions. ब्रह्मरन्ध्र and मुक्तिमार्ग are the two other names by which it is designated in this work. (See IV. 29-31/1, 35/1).

स्फिच्—The buttocks or hips; –देश—The region of the buttocks or hips.

CORRIGENDA

Page		*Line*	*Misprint*	*Correction*
संज्ञा विवृत्तिः		६	मु. पु=मुम्बापुर्यां	मुं. पु=मुंबापुर्यां
१		४	एम.ए., एलएल.एम.	एम्.ए., एल्एल्.एम्.
९		१२	सहयोगीन्द्र	सह योगीन्द्र
११	टि.	१	टिप्पणी	टिप्पणीः
,,	,,	९	अहिंसात्वेव	अहिंसा त्वेव
१२	,,	१३	ग$_{२}$–राज्ञश्चचैवं	ग$_{२}$–राज्ञश्चैवं
१४	,,	५	मित भोजनम्	मितभोजनम्
,,	,,	१८	इद्रंशः	ईदृशः
१७	,,	१६	वाचको तीवा (–तीव)	वाचको तीवा (ऽतीव)
१८	,,	१५	कृतमं्	कृतम्
१९	,,	७	ऋजुकार्यः	ऋजुकायः
२०	,,	१७	क्षति पाठान्तराणिःच	क्षतिः पाठान्तराणि च
२५	,,	१५	देह मध्ये	देहमध्ये
,,	,,	१९	मेढात्तु	मेढ्रात्तु
२८	,,	३	तिसृष्वेकोत्तम	तिसृष्वेकोत्तमा
३२	—	७	गुदमेढोरुजानुषु	गुदमेढ्रोरुजानुषु
३३	—	१०	साङ्गोपांगकलेवरे	साङ्गोपाङ्गकलेवरे
,,	टि.	१५	प्राणो (? घाणे)	प्राणो (? घ्राणे)
३४	,,	२२	ग$_{२}$–वह्निना	ग$_{२}$–वह्निना
३५	,,	९	जनस्यांतर(?)	जनस्यांतर् (?)
३७	—	८	सर्वसाङ्गविवर्जितः	सर्वसङ्गविवर्जितः
,,	टि.	४	नाड चः	नाड्यः
,,	,,	१२	(शुश्रूषणरत्तः)	शुश्रूषणरतः
३८	,,	१५	न$_{८}$–शास्त्रेगेषु	न$_{८}$–शास्त्रेषु
३८	टि.	१७	धर्मसंयक्तः	धर्मसंयुक्तः
३९	,,	१८	तत्ततादृशं तादृश	तत्तत्तादृशं तादृशं
४०	,,	२	—×××××× –त	—×××× –त
४१	,,	७	षदकृत्वाचरेन्नित्यं	षट्कृत्वाचरेन्नित्यं
४२	,,	२४	अत्राधिकाः श्लोकाः	न८–अत्राधिकाः श्लोकाः
४५	,,	१७	चिन्तनीयाहौ	चिन्तनीयाहौं
५१	,,	३	ग्रन्थसन्दभ	ग्रन्थसन्दर्भे
५२	,,	१२	"ष्ट" स्थान "ष्ठ"	"ष्ट" स्थाने "ष्ठ"

Page		*Line*	*Misprint*	*Correction*
५२	टि.	१६	ग्रणार्हो	ग्रहणार्हो
,,	,,	२०	दीर्घवर्तुलयाषाणविशेष इत्येके	दीर्घवर्तुलपाषाणविशेष इत्येके
,,	,,	२६	समीचीनो भवेन्	समीचीनो भवेत्
५६	,,	१५	पाठभेदाः–(?) न२,५,७, त	पाठभेदाः–न२,५,७, त
५७	,,	४	ग्रन्थसन्दर्भ	ग्रन्थसन्दर्भे
६१	—	१२	मकारमूतिरेतेषां	मकारमूर्तिरेतेषां
६८	टि.	१६	कर्णमले	कर्णमूले
७४	—	९	सदाशिव	सदाशिवं
८१	—	१	ज्योतिर्मय	ज्योतिर्मयं
८४	—	६	जगद्योनि	जगद्योनिं
११६	टि.	१४	६ लेखषु	६ लेखेषु

श्री योगयाज्ञवल्क्यः

Abbreviations

अत्रोपयुक्तानां संज्ञानां विवृतिः—

न१, २, ३, ४, ५, ६, ७, ८=(देव–)नागरी-हस्तलेखाः १, २, ३, ४, ५, ६, ७, ८ ।

ग१, २, ३, ४, ५, ६,=ग्रन्थलिप्यां लिखिताः हस्तलेखाः १, २, ३, ४, ५, ६ ।

त=तेलुगुलिप्यां लिखितो हस्तलेखः ।

क=कन्नडलिप्यां लिखितो हस्तलेखः ।

त्रि.पु.=त्रिवेन्द्रम् नगरे मुद्रितं पुस्तकम् ।

मु.पु.=मुम्बापुर्यां मुद्रितं पुस्तकम् ।

न.पु.=नडीआदनगर्यां मुद्रितं पुस्तकम् ।

क.पु.=कलिकातायां मुद्रितं पुस्तकम् ।

मु.पु.=मुरादाबादनगरे मुद्रितं पुस्तकम् ।

× × × × =एतच्चरणं न विद्यते ।

× × × × × × × × =एषा पंक्तिर्न विद्यते ।

———————=यथापूर्वं ज्ञेयम् ।

ॐ

श्री योगयाज्ञवल्क्यः॥

श्री प्रह्लाद चन्द्रशेखर दिवानजी एम. ए., एल.एल. एम
इत्यनेन संशोध्य संपादितः॥

प्रथमोऽध्यायः॥

याज्ञवल्क्यं मुनिश्रेष्ठं सर्वज्ञं ज्ञाननिर्मलम् ।
सर्वशास्त्रार्थतत्त्वज्ञं सदा ध्यानपरायणम् ॥१॥

वेदवेदांगतत्त्वज्ञं योगेषु परिनिष्ठितम् ।
जितेन्द्रियं जितक्रोधं जिताहारं जितामयम् ॥२॥

तपस्विनं जितामित्रं ब्रह्मण्यं ब्राह्मणप्रियम् ।
तपोवनगतं सौम्यं संध्योपासनतत्परम् ॥३॥

ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैश्च समावृतम् ।
सर्वभूतसमं शान्तं सत्यसन्धं गतक्लमम् ॥४॥

गुणज्ञं सर्वभूतेषु परार्थैकप्रयोजनम् ।
ब्रुवन्तं परमात्मानमृषीणामुग्रतेजसाम् ॥५॥

१/१५/१-२-ग १, ५, ६, त, क लेखेष्विमे श्लोका न दृश्यन्ते । १/१-न १, २, ५, ७— याज्ञवल्क्यमृषिश्रेष्ठं । १/२-ग२—कृष्णं हरिहरं प्रभुम् ; न ८– सर्ववेदविदं शुभम् । १/४-न ६– सदाध्यापनतत्परम् ; ग२-सदाध्ययनतत्परम् ; ग४—वेदेषु परिनिष्ठितम् ।

२/२-ग२-योगे च—; २/४-न३—जिताद्वारं (?) जिताश्रमम् ; न४, ८, ग४-जिताहारं जितश्रमम् ; ग२-जिताहारं जिताश्रयम् ।

३/१-ग२-जितशास्त्रं जितामित्रं ; ग४-तपोवनगतं शान्तं । ३/२-न३-ब्रह्मस्थं ब्रह्मणप्रियं; ग४—सद्भयो-(सन्ध्यो-)पासनतत्परम् । ३/३-न६-तपोवनरतं—; न८-तपोवनगतं शान्तं ; न३-तपोवनंतरं सौम्यं ; ग४—ब्रह्मविद्भिर्महाभागं ।

४/१-ग४—ब्रह्मविद्भिर्महाभागं; न६– × × × × ; ४/३-न३-सर्वभूतशमं (?-समं) शान्तं; ग२—सर्वभूतहितं शान्तं । ४/४-न१, २, ४, ५, ७, ग३—त्रिसन्ध्यं गतकल्मषम् ; न३-ब्रह्मभूतमकल्मषम् ; ग२—मन्त्रसिद्धं गतक्लमम् ।

५/३-ग२—ब्रुवन्तं परमं योगं ; न६-(ब्रु-) वत परमात्माने(?); न७-ध्यायंतत्परमात्मानं (? स्तत्परमात्मानं) ।

तमेवं गुणसंपन्नं नारीणामुत्तमा वधूः ।
मैत्रेयी च महाभागा गार्गी च ब्रह्मविद्वरा ॥६॥

सभामध्यगता चेयमृषीणामुग्रतेजसाम् ।
प्रणम्य दण्डवद्भूमौ गार्ग्येतद्वाक्यमब्रवीत् ॥७॥

*गार्ग्युवाच—

भगवन्सर्वशास्त्रज्ञ सर्वभूतहिते रत ।
योगतत्त्वं मम ब्रूहि साङ्गोपाङ्गं विधानतः ॥८॥

एवं पृष्टः स भगवान्सभामध्ये स्त्रिया तया ।
ऋषीनालोक्य नेत्राभ्यां वाक्यमेतदभाषत ॥९॥

†याज्ञवल्क्य उवाच—

उत्तिष्ठोत्तिष्ठ भद्रं ते गार्गि ब्रह्मविदां वरे ।
वक्ष्यामि योगसर्वस्वं ब्रह्मणा कीर्तितं पुरा ॥१०॥

समाहितमना गार्गि श्रृणु त्वं गदतो मम ।
इत्युक्त्वा ब्रह्मविच्छ्रेष्ठो याज्ञवल्क्यस्तपोनिधिः ॥११॥

६/१—न३—तमेव गुणसम्पन्नं ; न४—तमेवं गुणसंपूर्णं ; न७—तमेवं गुणसंपन्ना । ६/३—ग२—मेधावती महाभागा । ६/४—ग२—गार्गी च ब्रह्मविद्वरम् ; न३—गार्गी तु ब्रह्मविद्वरा ; न४—गार्गी ज्ञानपरायणा ।

७/१—न१, २, ५, ७—सभामध्यगता त्वेवं ; न८—सभामध्ये गते एतं (?); ग२—सभामध्यगतं चैनं; न३—सभामध्यगतं प्राप्ता ; न६—सभामध्यगता सा ते ; ग४—सभामध्यगतात्सेनं (?———गता त्वेनं) । ७/४—ग२, ३, न५, ६—गार्गी तद्वाक्यमब्रवीत् ।

*८—न७ × × × × । ८/३—न.४—योगं त्वं च मम ब्रूहि; ग३—योगतत्त्वं मया ब्रूहि । ८/४—न३, ७, ८, ग३—साङ्गोपांगविधानतः ।

९/२—न१, २, ५, ७ ——————— स्त्रिया तदा ; ग२— ——————— प्रियां ततः ; न४, ६ ———— स्त्रियानया ; ग३ ——————— स्त्रिया अपि (?) । ९/३—न७, ग३—ऋषिरालोक्य । ९/४—ग४—वाक्यमेतदुवाच ताम् ; न४—वाक्यमेतदथाब्रवीत् । †न३—श्रीभगवानुवाच ; न६—भगवानुवाच । न७—भगवान् ।

१०/२—न३ ———— वरा । १०/३—मम योगं सर्ववरं (?) । १०/४—ग२, ४, न८—ब्रह्मणा कथितं पुरा ।

११/२—न१, ५, ७, ८, ग४—श्रृणु त्वं वदतो मम । ११/३—न५—इत्युक्तो——; ग३—इत्युक्तौ (?) × × ; ११/४—न२, ५, ७—याज्ञवल्क्यस्तपोधनः ।

नारायणं जगन्नाथं सर्वभूतहृदि स्थितम् ।
वासुदेवं जगद्योनिं योगिध्येयं निरञ्जनम् ॥१२॥

आनन्दममृतं नित्यं परमात्मानमीश्वरम् ।
ध्यायन्हृदि हृषीकेशं मनसा सुसमाहितः ॥१३॥

नेत्राभ्यां तां समालोक्य कृपया वाक्यमब्रवीत् ।

एह्येहि गार्गि सर्वज्ञे सर्वशास्त्रविशारदे ॥१४॥

योगं वक्ष्यामि विधिवद्धात्रोक्तं परमेष्ठिना ।
मुनयः श्रूयतामत्र गार्ग्या सह समाहिताः ॥१५॥

पद्मासने समासीनं चतुराननमव्ययम् ।
चराचराणां स्रष्टारं ब्रह्माणं परमेष्ठिनम् ॥१६॥

कदाचित्तत्र गत्वाहं स्तुत्वा स्तोत्रैः प्रणम्य च ।
पृष्टवानिममेवार्थं यन्मां त्वं परिपृच्छसि ॥१७॥

देवदेव जगन्नाथ चतुर्मुख पितामह ।
येनाहं यामि निर्वाणं कर्मणा मोक्षमव्ययम् ॥१८॥

१२/१–न१, २, ५, ७, ग३—नारायणं जगद्योनिं ; ग२–नारायणं जगद्व्याप्तं । १२/२–न६–सर्वभूतहिते रतम्; न८–जगतः कारणं परम् । १२/३– न१, २, ४, ५, ७, ग१, ३–वासुदेवं जगन्नाथं । १२/४–न४–योगिध्येयं निरन्तरम् ; ग४—जगतः कारणं परम् ।

१३/१–न८ ———————— सत्यं । १३/२–न१, २, ४, ५, ६, ग२, ४—परमात्मानमव्ययम् ।

१४/३–न८—एह्येहि गार्गि सर्वत्र (?सर्वज्ञे) ।

१५/१–ग४, न८–योगं वक्ष्यामि तत्त्वेन। १५/२–न१–यथोक्तं परमेष्ठिना; ग२–संप्रोक्तं———; न३, ६—यथोक्तं ब्रह्मणा पुरा ; न४, ग३—प्रोक्तं मे परमेष्ठिना ; ग४, न८–निर्दिष्टं—। १५/३–४–"क" लेखे प्रथमा पंक्तिः । १५/३–न३, श्रूयतां सर्वे । १५/४–ग३—गार्ग्या सह समाश्रिताः।

१६/१–२–ग५, ६, त" लेखेषु प्रथमा पंक्तिः । १६/१–ग४—पद्मासीनं सुखासीनं ; न७–पद्मासने सुखासीनं; न२—पद्मासीनं समासीनं, न३–पद्मासीनसमासीनं । १६/२–न८–चतुरासन–(?चतुरानन–)मव्ययम् । १६/३–ग४, न८–चराचराणां भूतानां । १६/४–न३–ब्रह्मणं परमेष्ठिनम् ; ग४, न८–स्रष्टारं ——.

१७/२–न२–स्तुतिः स्तोत्रैः प्रणम्य च ; ग५–कृत्वा स्तोत्रं —— । १७/३– पृष्टवानमुमेवार्थं ; न५, ग५, ६, त—पृष्टवानिदमेवार्थं ; न८–पृष्टवान्श्रौतमेवार्थं ; क–पृष्टवानिदमेवाद्य । १७/४–ग५, ६, त—यद्यूयं परिपृच्छथ ; क–यद्ययं (?यद्यूयं) परिपृच्छथ ।

१८/१–ग६–देवदेव महादेव । १८/३–ग२–येनाहं नाम(?) —— । १८/४–न५, ग२, ५—कर्मणा मोक्षमक्षयम् ; न३—कर्मसाक्षिकमव्ययम् ; ग६–तज्ज्ञानं मोक्षमव्ययम् ; न८–कर्मणो मोक्षमव्ययम् ।

ज्ञानं च परमं गुह्यं यथावद्ब्रूहि मे प्रभो ।
मयैवमुक्तो द्रुहिणः स्वयंभूर्लोकनायकः ॥१९॥

मामालोक्य प्रसन्नात्मा ज्ञानकर्माण्यभाषत ।

ज्ञानस्य द्विविधौ ज्ञेयौ पन्थानौ वेदचोदितौ ॥२०॥

अनुष्ठितौ तौ विद्वद्भिः प्रवर्तकनिवर्तकौ ।
वर्णाश्रमोक्तं यत्कर्म कामसंकल्पपूर्वकम् ॥२१॥

प्रवर्तकं भवेदेतत्पुनरावृत्तिहेतुकम् ।
कर्तव्यमिति विध्युक्तं कर्म कामविवर्जितम् ॥२२॥

येन यत्क्रियते सम्यक् ज्ञानयुक्तं निवर्तकम् ।
निवर्तकं हि पुरुषं निवर्तयति जन्मतः ॥२३॥

प्रवर्तकं हि सर्वत्र पुनरावृत्तिहेतुकम् ।
वर्णाश्रमोक्तं कर्मैव विध्युक्तं कामवर्जितम् ॥२४॥

१९/१–२–"ग१," लेखे प्रथमा पंक्तिः । १९/१–ग२—स्थानं च ———; न४–ज्ञानानां ——— ; ग३–यज्ञानां ——— । १९/३–ग४, ५, ६, क—मयैवमुक्तो दाक्षिण्यात् ; ग२—मयैवमुक्तो हृषितः । १९/४–न१, ८–स्वयंभूर्लोकभावनः ।

२०/१–न१, २, ६, ७—समालोक्य—। २०/२–न१, २, ५, ७—कर्मज्ञानमभाषत ; ग१–ज्ञानं सर्वमभाषत ; ग२—ज्ञानमर्म प्रभाषत ; न४–त्यक्तु(?)कर्माण्यभाषत ; ग३—त्यक्त्वा कर्माण्यभाषत । २०/३–४–न४, ग३– × × × × । २०/३–न१, २, ७, ग१, २—जातस्य ——— । २०/४–ग६, त———श्रुतिचोदितौ ; ग२———श्रुतिवेदितौ ; न३ वेदनोदितौ ।

२१/१–न५, ७, ग५, ६ ——— च विद्वद्भिः ; ग२ ——— हि—; ग३——— तु——। २१/३–ग५, ६, क–वर्णाश्रमाणां यत्कर्म । २१/४–ग२–काम्य ——— ; ग६–कार–(?काम–) ———।

२२/३–४–न१, २— × × × × × × × ×।

२३–२७–"न१, २" लेखयोरेतेषु श्लोकेष्वतीव क्रमविपर्ययः सांकर्यं च दृश्येते । २३/१–न३, ४, ५, ६, ७, ८, ग३ ——— नित्यं ; ग५, ६, क— ——— कर्म : ग२–येन यत्क्षीयते सम्यक् । २३/४–न७—निवर्तयति जन्मना; ग१, २, ४, ५, ६, त——— जन्मनः ।

२४/१–ग२, ३, ४, न५, ६, ८, क–प्रवर्तकं तु सर्वत्र ; न४–प्रवर्तकं हि सर्वज्ञ (?) ; ग६–प्रवर्तयति सर्वत्र । २४/३–न६–वर्णाश्रमोक्तं सर्वत्र ; ग५, न८–वर्णाश्रमाणां कर्मैव ; क–वर्णाश्रमाणां कर्मैवं । २४/४–ग२– ——— काम्यवर्जितम् ; ग४, ५—विधिवत्कामपूर्वकम् ; ग६–विध्युक्तं कामनार्जितम् ।

विधिवत्कुर्वतस्तस्य मुक्तिर्गार्गि करे स्थिता ।
वर्णाश्रमोक्तं कर्मैव विधिवत्कामपूर्वकम् ॥२५॥

येन यत्क्रियते तस्य गर्भवासः करे स्थितः ।
संसारभीरुभिस्तस्माद्विध्युक्तं कामवर्जितम् ॥२६॥

विधिवत्कर्म कर्तव्यं ज्ञानेन सह सर्वदा ।
जाताश्च त्रिषु लोकेषु आनुलोम्येन मानवाः ॥२७॥

ते देवानामृषीणां च पितॄणामृणिनस्तथा ।
ऋषिभ्यो ब्रह्मचर्येण पितृभ्यश्च सुतैस्तथा ॥२८॥

कुर्याद्यज्ञेन देवेभ्यः स्वाश्रमं धर्ममाचरन् ।
चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः ॥२९॥

क्षत्रियस्य त्रयः प्रोक्ता द्वावेकौ वैश्यशूद्रयोः ।
अधीत्य वेदं वेदार्थं साङ्गोपांगं विधानतः ॥३०॥

२५/१–२–ग१, ४, ५, न४, त, क × × × × × × × ×। २५/१–ग२–विधिवृत्तवधस्तस्य(?); न३–विधिवत्कर्मतस्तस्य ; ग३–विधिवत्कर्मभिस्तस्य । २५/२–न३, ग२–मुक्तिमार्गः करे स्थितः ; ग३—मुक्ति गार्गि करोति सा; ग६–मुने मुक्तिः करे स्थिता । २५/३–४–ग४– × × × × × × × ×। २५/३–ग५, ६, त–वर्णाश्रमोक्तं यत्कर्म। २५/४–न४, ग५, क × × × × ।

२६/१–२—न४, क × × × × × × × ×। २६/२—ग२, ३—भववासः करे स्थितः; ग१–गर्भवासो न संशयः; ग४–गर्भवासकरं स्थितम्। २६/३–४–ग२, ५, ६, त, क × × × × × × × × × ×।

२७/२–न४– × × ने सह सर्वदा ; ग३—ज्ञानिनः सह —— ; त–सह ज्ञानेन सर्वशः। २७/३–न१, ४, ५, ७, ८, ग४, ५, ६, क — ———— वर्णेषु ; ग१—तत्र च त्रिषु वर्णेषु ; ग२–जातस्य —— ; न३ ग३ —— जातश्च ——— ; न६–धाराश्च(?)——। २७/४–न१, २, ३–त्वानुलोम्येन मानवाः ; न८–त्वानु —— मानुषाः ; ग१–अनुलोमेषु —— ; ग२, ५, ६, न७–चानुलोम्येन ——— ; न ६—आनुलोम्येन मानवैः ; ग४-त्वानुलोम्येन मानुषाः ।

२८/१–न८–तथैवाहमृषीणां च(?)। २८/२–न२–पितॄणामृणिनस्तदा ; त—पितॄणामनृणाः स्मृताः ; न३–पितॄणां च(?) ऋणिनस्तथा ; ग४ न८, क—पितॄणामृणिनः सदा ; ग६–पितॄणामर्यमा स्थितः। २८/३–४—ग४– × × × × × × × ×। २८/४–ग५, ६, क—पितृभ्यः स्वधया तथा ; न८–पितृभ्यः स्वसुतैस्तथा ; ग१–पितृभ्यः पुत्रयोगतः।

२९/१–न१, २, ४, ७, ग३—मुच्येद्यज्ञेन ———; ग४–कुर्युर्यज्ञेन ————। २९/२–न१, २, ३, ४, ५, ६, ७, ग२, ३, ४, ५, ६—— धर्ममाचरेत्। २९/४–ग२, ४, ५, ६, न८, क—स्वाश्रमाः श्रुतिचोदिताः ।

३०/२–ग४, ५, ६, न७, ८, क—द्वावेको ———— । ३०/३–ग२, ३, न६—अधीत्य वेदं वेदांगं । ३०/४–न३, ४, ७, ८, क–सांगोपांगविधानतः ; न६—सांगं सार्थं——।

स्नायाद्विध्युक्तमार्गेण ब्रह्मचर्यव्रतं चरन् ।
संस्कृतायां सवर्णायां पुत्रमुत्पादयेत्ततः ॥३१॥

यजेदग्नौ तु विधिवत्भार्यया सह वा विना ।
कान्तारे विजने देशे फलमूलोदकान्विते ॥३२॥

तपश्चरन्वसेन्नित्यं साग्निहोत्रः समाहितः ।
आत्मन्यग्नीन्समारोप्य संन्यसेद्विधिना ततः ॥३३॥

संन्यासाश्रमसंयुक्तो नित्यं कर्म समाचरन् ।
यावत्क्षेत्री भवेत्तावद्यजेदात्मानमात्मनि ॥३४॥

क्षत्रियश्च चरेदेवमासंन्यासाश्रमात्सदा ।
वानप्रस्थाश्रमादेवं चरेद्वैश्यः समाहितः ॥३५॥

शूद्रः शुश्रूषया नित्यं गृहस्थाश्रममाचरेत् ।
शूद्रस्य ब्रह्मचर्यं च मुनिभिः कैश्चिदिष्यते ॥३६॥

३१/१–ग५–स्नात्वा विध्युक्तमार्गेण । ३१/२–न१, ३, ४, ग३—ब्रह्मचर्यं व्रतं चरेत् । ३१/३–त, क ———— स्ववर्णायां; न६—स्वीकृतायां ——। ३१/३–४–न३—× × × × × × × ×।

३२/१–ग४, न६—यजेदग्नौ तु विधिना ; ग५–क–यजेदसौ च—; न३—यजेदाग्नेय— ; ग६–यजेदाग्निं च ——; न८–यजन्नाग्नौ तु—। ३२/२–न१, ४, ७–भार्यया सह वासितः ; न२, ५———— वासिनः ; न६, ८, ग४, ६, क——— वासिना ; ग२—भार्यया सहसा विना। ३२/१–२–ग३– × × × × × × × ×। ३२/३–न३–कान्तारे निर्जने देशे। ३२/३-४–ग३–× × × × × × × ×।

३३/१–ग१–तपश्चरेत्सपत्नीकः ; न६—तपश्चरन्निराहारः । ३३/२–न४–अग्निहोत्रसमन्वितः ; ग१–तां विना वा सहाग्निभिः ; न६–सर्वधर्मसमन्वितः ; न३–साग्निहोत्रसमन्वितः। ३३/१–२–ग३ × × × × ×। ३३/३–न३, ग५–स्वात्मन्यग्नीन्समारोप्य । ३३/४–त–अभ्यसेद्विधिना ततः ३३/३–४–ग३–× × × × × × × ×।

३४/२–न३, ८, ग५, ६, क—नित्यं कर्म समाचरेत् ; न२ ———— समाचरे। ३४/१–२ ग३ × × × × × × × ×। ३४/३–ग१–यावत्क्षेत्रं भवेत्तावत्; ग५, ६, त, क—यावत्क्षेमी —; न४–यावत्क्षेत्रे——; ग३–यावत्क्वेत्र (?त्क्षेत्र)———; न६–यावत्क्षेत्र × × ×। ३४/४–न१, २, ५, ७—यजेदात्मानमात्मना ।

३५/१–न३, ६, ग३——क्षत्रियस्तु चरेदेवं । ३५/२–ग१, २, ४, त–आसन्यासाश्रमात्तदा; न३, ६, ८–आसन्यासाश्रमं तथा; न४, ग३–आसन्यासाश्रमात्तथा; ग५, क–आसन्यासाश्रमं सदा; ग६–आसन्यासाश्रमं तदा । ३५/३–न३–वानप्रस्थाश्रमं नैवं ; ग३–वानप्रस्थाश्रमादेवं ; ग५, ६, न८, क–वानप्रस्थाश्रमात्पूर्वं ; त–वानप्रस्थाश्रमात्सर्वं ।

३६/१–ग१, ५—शूद्रः शुश्रूषयेन्नित्यं ; ग२–शूद्रः शुश्रूषयेदेवं ; न६–शूद्रः शुश्रूषते नित्यं ; न३–शुश्रूषय च तं नित्यं । ३६/२–ग२–गृहस्थाश्रममाचरन् । ३६/३–न६————ब्रह्मचर्यां तु ; ग३————ब्रह्मचर्ये च । ३६।४ ग२–मुनिभिः कैश्चिदीर्यते ; ग३————कैश्चिदुच्यते ।

आनुलोम्यप्रसूतानां त्रयाणामाश्रमास्त्रयः ।
शूद्रवच्छूद्रजातानामाचारः कीर्तितो बुधैः ॥३७॥

चतुर्णामाश्रमस्थानामहन्यहनि नित्यशः ।
विध्युक्तं कर्म कर्तव्यं कामसंकल्पवर्जितम् ॥३८॥

तस्मात्त्वमपि योगीन्द्र स्वाश्रमं धर्ममाचरन् ।
श्रद्धया विधिवत्सम्यक् ज्ञानकर्म समाचर ॥३९॥

इति मे कर्मसर्वस्वं योगरूपं च तत्त्वतः ।
उपदिश्य ततो ब्रह्मा योगनिष्ठोऽभवत्स्वयम् ॥४०॥

श्रुत्वैतद्याज्ञवल्क्योक्तं वाक्यं गार्गी मुदान्विता ।
पुनः प्राह मुनिश्रेष्ठमृषिमध्ये वरानना ॥४१॥

*गार्ग्युवाच—

ज्ञानेन सहयोगीन्द्र विध्युक्तं कर्म कुर्वतः ।
त्वयोक्तं मुक्तिरस्तीति तयोर्ज्ञानं वद प्रभो ॥४२॥

३७/१–२–न३, ६, ८–× × × × × × × × ×। ३७/१ न१, २, ५, ७, ग२—अनुलोम-प्रसूतानां : ग३—अनन्तोमे प्रसूतानां (?)। ३७/२ न१, २, ४, ७, ग३—त्रयाणामाश्रमाश्च ये ; ग५ क–वर्णानामाश्रमास्त्रयः ; त–वर्णानामाश्रमाः स्मृताः । ३७/३–न४, ग३—नान्यस्तु शूद्रजातीनां ; ग५, ६, क—स्त्रीजातीनां शूद्रवद्वा ; त–स्त्रीजातीनां च सर्वेषां । ३७/४–न१, २, ५, ७–आश्रमाः कीर्तिता बुधैः ; ग२, ५, त, क–आचारः कीर्त्यते———; न४, ग३–आश्रम(?) कीर्तितो———; ग५–आचारः कथ्यते———। ३७/३–४न३, ६, ८— × × × × × × × ×।

३९/१–न७————————योगीन्द्रे ; न३, ५, ग४, ५, ६, क————————विप्रेन्द्र ;— ३९/२–न१, २, ३, ४, ५, ६, ७, ग२, ३, ६, त, क–स्वाश्रमं धर्ममाचर । ३९/४–न२, ५, ६, ७, ग२, त–ज्ञानकर्म समाचरन् ; ग५–ज्ञानं कर्म समाचर ; ग६—ज्ञात्वा कर्म समाचर ।

४०/१–ग२–एवं मे————; ग४, न८——— इति मे योगसर्वस्वं । ४०/२–ग४, न८–कर्मयोगं च तत्त्वतः । ४०।३–न२– ————तदा—; ग५, क– ————तथा——— । ४०/४ न३–योगयुक्तोऽभवत्स्वयम् ।

४१/१–ग२–श्रुत्वैवं—; न६–श्रुत्वैदं(?)——— । ४१/२–न७–गार्गी मुनिमुदान्विता । ४१/४–न६–ऋषिमध्ये वरांगना । *ग२, ३, त– × × × × ; ग४–गार्गी ; ग५–गार्गिः ।

४२/३–न४–यत्त्वयोक्तं मुक्तिरिति । ४२/४–ग१, ३—तस्माज्ज्ञानं वद प्रभो ; ग५, ६—वद ज्ञानं मम प्रभो; त–यदज्ञानं(?) मम प्रभो ; ग२–ततो ज्ञानं वद प्रभो ; न३, ६—तयोर्ज्ञानं वदस्व भो ; ग४–तथा ज्ञानं वद प्रभो ; न८–यथा ज्ञानं वद प्रभो ।

भार्यया त्वेवमुक्तस्तु याज्ञवल्क्यस्तपोनिधिः ।
तां समालोक्य कृपया ज्ञानरूपमभाषत ॥४३॥

*याज्ञवल्क्य उवाच—

ज्ञानं योगात्मकं विद्धि योगश्चाष्टाङ्गसंयुतः ।
संयोगो योग उत्युक्तो जीवात्मपरमात्मनोः ॥४४॥

वक्ष्याम्यङ्गानि ते सम्यग्यथा पूर्वं मया श्रुतम् ।
समाहितमना गार्गि ऋषिभिः सह संश्रृणु ॥४५॥

यमश्च नियमश्चैव आसनं च तथैव च ।
प्राणायामस्तथा गार्गि प्रत्याहारश्च धारणा ॥४६॥

ध्यानं समाधिरेतानि योगाङ्गानि वरानने ।
यमश्च नियमश्चैव दशधा संप्रकीर्तितः ॥४७॥

आसनान्युत्तमान्यष्टौ त्रयं तेषूत्तमोत्तमम् ।
प्राणायामस्त्रिधा प्रोक्तः प्रत्याहारश्च पंचधा ॥४८॥

४३/१–न१, २, ६, ७, ग१, २, ३, ४, ६, त—भार्ययाप्येवमुक्तस्तु; न३–भार्यया त्वेव-मुक्तो हि; ग५, क–भार्यया ह्येवमुक्तस्तु; न८–भार्यया चैवमुक्तस्तु । ४३/२–ग२–याज्ञवल्क्यो महामुनिः । ४३/३–न५–स तामालोक्य कृपया; क–त्वं समालोक्य विधिना(?) । ४३/४–ग१–ज्ञानजातमभाषत । *न१, ग१, २, ३, ४, त–भगवानुवाच; न३, ६,–श्रीभगवानुवाच; ग५, ६, न८– × × × ×।

४४/२–ग३, ४, ५—योगं चाष्टांगसंयुतम्; क–योगं त्वष्टांगसंयुतम् ।

४५/३–ग४, न८–समाहितमना भूत्वा । ४५/४–त–मुनिभिः सहिता श्रृणु; ग५, ६—मुनिभिः सह संश्रृणु ।

४६/२–न५–आसनानि———— । ४६/३–न१, ५, ८, ग१, २, ४, ५, क–प्राणायामा-स्तथा गार्गि; न४–प्राणायामस्तथा प्रोक्तः । ४६/४–ग५—प्रत्याहारस्तु धारणा ।

४७/३–ग५—नियमश्च यमश्चैव । ४७/४–न६–दशधानुप्रकीर्तिताः; ग४, ५–दशधानु-प्रकीर्तितः; ग६–दशधा तु प्रकीर्तितौ; न४–दशधा संप्रकीर्तितौ; ग२, त—दशधा सुप्रकीर्तितः; ग१–द्विधा संपरिकीर्तितौ ।

४८/२–ग१, ५, ६, न६–त्रयस्तेषूत्तमोत्तमाः; न३, ४, ५, ७—त्रयमेतेषूत्तमोत्तमं; ग४, न८, क–त्रयस्तेषूत्तमाः स्मृताः; ग२–त्रीणि तेषूत्तमानि तु । ४८/३–ग१, २, ४, न५, ७–प्राणा-यामास्त्रिधा प्रोक्ताः; ग३, ६—प्राणायामास्त्रयः प्रोक्ताः । ४८/४-न ४, ५, ६, ७, ८, ग३, ४, ५, ६, क—प्रत्याहारस्तु पंचधा; ग१, २–प्रत्याहारश्चतुर्विधः ।

धारणा पंचधा प्रोक्ता ध्यानं षोढा प्रकीर्तितम् ।
त्रयं तेषूत्तमं प्रोक्तं समाधिस्त्वेकरूपकः ॥४९॥

बहुधा केचिदिच्छन्ति विस्तरेण पृथक् शृणु ।

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ॥५०॥

क्षमाधृतिर्मिताहारः शौचं त्वेते यमा दश ।
कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ॥५१॥

अक्लेशजननं प्रोक्तमहिंसात्वेन योगिभिः ।
विध्युक्तं चेदहिंसा स्यात्क्लेशजन्मैव जन्तुषु ॥५२॥

वेदेनोक्तेऽपि हिंसास्यादभिचारादि कर्म यत् ।
सत्यं भूतहितं प्रोक्तं न यथार्थाभिभाषणम् ॥५३॥

कर्मणा मनसा वाचा परद्रव्येषु निःस्पृहा ।
अस्तेयमिति सा प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः ॥५४॥

४९/२–न४ ग३—ध्यानं च परिकीर्तितम् (न४–लेखकस्य टिप्पणी–ध्यानमपि पंचधेत्यर्थः ।) न५–ध्यानं षोढा च कोर्तितम् । ४९/३–ग१, ३, ४, ५, ६, न८, त, क–त्रयस्तेषूत्तमाः प्रोक्ताः ; ग२–त्रीणि तेषत्तमानि स्युः ; न४–त्रीणि तेषूत्तमान्याहुः । ४९/४–ग३, ४, न६, ८, त, क–समाधिस्त्वेकरूपतः ; ग२–समाधेस्त्वेकरूपता ।

५०/१–न४, ग३–मुनयः केचिदिच्छन्ति ; ग४ न८–बहुधा कैश्चिदुच्यन्ते (?)।

५१/२–न३, ग५, ६–शौचं चैते यमा दश ; क–शौचं चैते यमादयः न६, ८–शौचं चेति——। ५१/४–ग१—सर्वावस्थासु सर्वदा ।

५२/१–ग२–अक्लेशजनकं प्रोक्तं ; न३, ८, क–अक्लेशजननं प्रोक्ता। ५२/२–न६–अहिंसा गार्गि योगिभिः ; न१, २, ५, ६–अहिंसात्वेव योगिभिः ; न३–अहिंसा चैव योगिभिः । ५२/१–२–न४– × × × × × × × × ×। ५२/३–त–विध्युक्ता चेदहिंसा स्यात् ; न५–विध्युक्तवेदहिंसा——; न४–अयुक्तं चेदहिंसा——; ग४–अयुक्ते————। ५२/४–न२–क्लेशं जन्मापि————; न१, २, ७–क्लेशजन्मापि————; ग५, ६, क–क्लेशगर्भैव——: त–क्लेशगर्भं च———; न६–क्लेशजन्मेव————। न८–केचिदिच्छन्ति——। ५२/३–४–न३– × × × × × × × × ×।

५३/१–ग२–विधिनोक्तेन हिंसा स्यात् ; न६–चोदनोक्तेषु————; ग४–चोदनोक्तेष्व-हिंसा——; ग५–चोदनोक्तोऽपि(?)————; ग६–चोदनोक्तापि————; न३, ग१ त— × × × × । ५३/२–ग२–अभिचारादिकर्मकृत् ; ग५, ६, क– ———कर्मवत् ; ग४, न८–आभिचारादि कर्मसु; न३, ग१, त–× × × ×। ५३/३–ग४–सत्यं परहितं प्रोक्तं ; न८—————भाति (?भूत–)हितं———— । ५३/४–ग१, त–नियतार्थाभिभाषणम्; ग२–यथार्थं साभिभाषणम्; ग४–यथा न्यायाभिभाषणम्; न३–तद्यथार्थाभिभाषणम्; न८, क–स यथा-र्थाभिभाषणम् ।

५४/२–न१–परद्रव्येषु निःस्पृहम्; ग३–परद्रव्येषु नित्यदा ; न७, ग५——————निःस्पृहः । ५४/१–२–ग२, न४– × × × × × × × × × । ५४/३–ग६–अस्तेयमिति संप्रोक्तं ; न१, २, ५, ग३—————तत्प्रोक्तं । ५४/४–ग४, न८, क—मुनिभिस्तत्त्वदर्शिभिः। ५४/३–४–न४– × × × × × × × × × ।

कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ।
सर्वत्र मैथुनत्यागो ब्रह्मचर्यं प्रचक्षते ॥५५॥

ब्रह्मचर्याश्रमस्थानां यतीनां नैष्टिकस्य च ।
ब्रह्मचर्यं तु तत्प्रोक्तं तथैवारण्यवासिनाम् ॥५६॥

ऋतावृतौ स्वदारेषु संगतिर्या विधानतः ।
ब्रह्मचर्यं तु तत्प्रोक्तं गृहस्थाश्रमवासिनाम् ॥५७॥

राज्ञश्चैव गृहस्थस्य ब्रह्मचर्यं प्रकीर्तितम् ।
विशां वृत्तवतां चैव केचिदिच्छन्ति पण्डिताः ॥५८॥

शुश्रूषैव तु शूद्रस्य ब्रह्मचर्यं प्रकीर्तितम् ।
शुश्रूषा वा गुरोर्नित्यं ब्रह्मचर्यमुदाहृतम् ॥५९॥

गुरवः पंच सर्वेषां चतुर्णां श्रुतिचोदिताः ।
माता पिता तथाचार्यो मातुलः श्वशुरस्तथा ॥६०॥

५५/१–४–त, न३– × × × × × × × × ×। ५५/२–३–ग३–× × × × × × × × ×। ५५/४–ग४–ब्रह्मचर्यं प्रकीर्तितम्।

५६/१–ग१–ब्रह्मचर्याश्रमस्थस्य । ५६/२–ग१–यतेरारण्यवासिनः ; न४ग३—यतीनां नैष्टिकं स्मृतं। ५६/३–न१, २, ४–ब्रह्मचर्यं तु सैवोक्ता; ग३, त, क–ब्रह्मचर्यं तु सा प्रोक्ता; न–३– ———सदैवोक्तं ; ग४, ६, न८– ———— तथैवोक्तं ; ग५————–यथैवोक्तं ; न६— ब्रह्मचर्यं तु सैवोक्ता । ५६/४–ग१–गृहस्थाश्रमवासिनाम् ; न४–तथैवारण्यवासिनः ; न५, ७— सर्वेषां योगिनां तथा ; ग४–तथैवाश्रमवासिनाम् ।

५७/१–न८, क–ऋतावेव————————। ५७/२–न१–गमनं च विधानतः ; ग१– संगं कुर्यात्————————; ग२–कुर्यात्संगं। ५७/३–न१, २, ४, ५, ६, ७, ग१, ३——— ब्रह्मचर्यं तु सैवोक्ता ; न३————–सदैवोक्तं ; ग४, न८– ————–तथैवोक्तं ; ग५, ६, क————–तु सा प्रोक्ता । ५७/३–४–त– × × × × × × × × ×।

५८/१–२–ग१, त– × × × × × × × × ×; ग६————–गृहस्थानां ; ग५– राज्ञश्चैव गृहस्थानां ; न८–राज्ञां चैव गृहस्थस्य; ग२–राज्ञश्चचैवं गृहस्थस्य । ५८/२–ग५— ब्रह्मचर्यमुदाहृतम् । ५८/३–न१, २, ५, ६, ७——विशां वृत्तिमतां चैव ; ग१–राज्ञश्चैवं वृत्त-वतः; ग३—दिशां वृत्तवतां——; त–राज्ञश्चैवं नीतिवतां। ५८/४–ग१–विशश्चेच्छन्ति पण्डिताः।

५९/१–न३, ५, ग४—शुश्रूषैव च शूद्रस्य ; ग६–शुश्रूषा इति शूद्रस्य । ५९/१–२–न४, ग३– × × × × × × × × ×। ५९/३–न१, ५–शुश्रूषावान्गुरोर्नित्यं ; न२, ७, ग६, त, क– शुश्रूषया गुरोर्नित्यं ; ग१–शुश्रूषा च——; ५९/४–न१, त–ब्रह्मचर्यं प्रकीर्तितम् । ५९/३–४– ग४– × × × × × × × × ×।

६०/२–न१–श्रुतिप्रेरिताः ; न३, ४–श्रुतिनोदिताः । ६०/४–त–मातुलः स्वगुरुस्तथा ; न६— मातुलश्वसुरौ तथा । ६०।३–४–ग३–× × × × × × × × ×।

एषु मुख्यास्त्रयः प्रोक्ता आचार्यः पितरौ तथा ।
एषु मुख्यतमस्त्वेक आचार्यः परमार्थवित् ॥६१॥

तमेवं ब्रह्मविच्छ्रेष्ठं नित्यकर्मपरायणम् ।
शुश्रूषयार्चयेन्नित्यं तुष्टोऽभूद्येन वा गुरुः ॥६२॥

दया च सर्वभूतेषु सर्वत्रानुग्रहः स्मृतः ।
विहितेषु तदन्येषु मनोवाक्कायकर्मणाम् ॥६३॥

प्रवृत्तौ वा निवृत्तौ वा एकरूपत्वमार्जवम् ।
प्रियाप्रियेषु सर्वेषु समत्वं यच्छरीरिणाम् ॥६४॥

क्षमा सैवेति विद्वद्भिर्गदिता वेदवादिभिः ।
अर्थहानौ च बन्धूनां वियोगेष्वपि सम्पदाम् ॥६५॥

तयोः प्राप्तौ च सर्वत्र चित्तस्य स्थापनं धृतिः ।
अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनाम् ॥६६॥

६१/१–न१, ५, ७–तेषां——————; ग२–एते——————; न४, ६, ८, ग३, ४, ५–एषां—————; त–तेषु—————। **६१**/३–न१, ७–एषां मुख्यतमस्त्वेकः ; न६—एषां मुख्यतमस्त्वैकं (?); ग२, ४, त–तेषु—————; ग३, न–८तेषां————; ग६, क–एषु मुख्यतमः प्रोक्तः ।

६२/१–न३, ५, ६—————तमेव ब्रह्मविच्छ्रेष्ठं। **६२**/२–न५, ६, ७–नित्यं कर्मपरायणम्; क–नित्यं कर्मपरायण:; ग५–नित्यकर्मपरायणः। **६२**/३–न२, ७–शुश्रूषयाचरेन्नित्यं (?); ग५, ६, त, क—गुरुं शुश्रूषयेन्नित्यं ; न४, ग३–शुश्रूषयाश्रयेन्नित्यं ; ग४–शुश्रूषयार्चया(?) नित्यं **६२**/४–ग५, ६, न६, क–तुष्टः स्याद्येन वा गुरुः ; ग१–(स वै) तुष्टेद्यथा———; ग२–तुष्टो हृष्टो यथा———; न३–तुष्टोऽभूद्देवता———; न७—तुष्टो भवेद्येन वा———।

६३/२–ग२–सर्वदानुग्रहात्स्मृतः ; ग४, न८—सर्वत्रानुग्रहो मतः ; न२–सर्वत्रानुग्रहे(?)स्मृतः ; ग५—सर्वत्रानुग्रहस्ततः । **६३**/३–ग२–अहितेषु तदन्येषु ; न३–विहितेषु वदान्येषु ; न४, ग३–विहितेषु तथान्येषु । **६३**/४–न१, २, ५, ७, ८, ग२, ४—मनोवाक्कायकर्मभिः ; न४, ग३–मनोवाक्कायकर्मणा ।

६४/१–न३–प्रवृत्तौ च निवृत्तौ च। **६४**/२–त–एक एवोक्तमार्जत्रम् । **६४**/३–ग१–प्रियाप्रियेषु सर्वत्र। **६४**/४–ग१–सहित्वं————————; ग३–समत्वे व्यवहारिणा ।

६५/१–ग५, ६–क्षमा सैवेह विद्वद्भिः ; न३–क्षमा सैवेति गदिता। **६५**/२–न३, ८, क–विद्वद्भिर्वेदवादिभिः ; ग१, त–गदिता वेदवेदिभिः ; न१, २, ७–गदिता ब्रह्मवादिभिः ; ग२–गदितं वेदवित्तमैः ; न४–गदिता योगवादिभिः ; न६—गदितं वेदवेदिभिः ; ग४–गदितं योग–वेदिभिः ;। **६५**/३–न६–अर्थहानौ च जन्तूनां। **६५**/४–न१, २, ७—वियोगे च स्वसंपदि; ग१–वियोगे अथ संपदि ; न३, ५, ग४, ५, ६—वियोगेष्वपि संपदि ; न८, क–वियोगेष्वपि संसदि ; न६–वियोगेष्वपि संयति(?) ।

६६/१–ग१, न६, ८–भयप्राप्तौ च सर्वत्र; ग ४, ६—तेषां प्राप्तौ————। **६६**/२ न३–सचित्तस्थापनं— ; न४, ग३–चित्तस्य स्थापना धृतिः। **६६**/३–न२, ग२–अष्टौ ग्रासा मुनेर्भक्ष्यं; न१, ५, ७——————मुनेः प्रोक्ताः । **६६**/४–ग१, न८, क–षोडशारण्यवासिनः ।

द्वात्रिंशच्च गृहस्थानां यथेष्टं ब्रह्मचारिणाम् ।
एषामयं मिताहारो ह्यन्येषामल्पभोजनम् ॥६७॥

शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ।
मृज्जलाभ्यां स्मृतं बाह्यं मनःशुद्धिस्तथान्तरम् ॥६८॥

मनःशुद्धिश्च विज्ञेया धर्मेणाध्यात्मविद्यया ।
आत्मविद्या च धर्मश्च पित्राचार्येण वानघे ॥६९॥

तस्मात्सर्वेषु कालेषु सर्वैर्निःश्रेयसार्थिभिः ।
गुरवः श्रुतसम्पन्ना मान्या वाङ्मनसादिभिः ॥७०॥

*इति श्रीयोगयाज्ञवल्क्ये प्रथमोऽध्यायः ॥†

६७/१–न१, २, ५, ८–द्वात्रिंशत्तु गृहस्थानाम् ; ग५–द्वात्रिंशशतं(?)——; ग६, क–द्वात्रिंशतं———। ६७/२–ग१, ६, क–यथेष्टं ब्रह्मवारिणाम् । ६७/३–न३–एषामेव मिताहारः ; न४, ६–एषामेष मिताहारः ; ग३–एवमेव————; न८, क–एष एव मिताहारो ; ग४–विषमोऽयं———। ६७/४–त–सर्वेषां मितभोजनम् ; न३–अन्येषां स्वल्पभोजनम् ; न४, ग३–त्वन्येषां मित भोजनम् ; न६, ग५–त्वन्येषामल्पभोजनम्; ग४–त्वन्येषां स्वल्पभोजनम् ।

६८/१–न२, ३, ५, ग३–शौचं च द्विविधं प्रोक्तं । ६८/३–ग२–मृज्जलाभ्यां स्थितं बाह्यं। ६८–४–ग१, ४, त–मनःशुद्धिस्तथापरम्; ग२–अन्तःशुद्धिःखान्तरम्(?); ग५, क–मनः शुद्धिर्यदान्तरम्; न७–मनःशुद्धिस्तथोत्तरे ; ग६–मनःशुद्धिर्यदन्तरम् ।

६९/१ न३, ४, ६, ग३–मनःशुद्धिस्तथा ज्ञेया ; ग४, ५, ६, न८, क–मनःशुद्धिस्तु विज्ञेया। ६९/२–ग२–कर्मेणाध्यात्मविद्यया ; न३–धर्मेणैवात्मविद्यया ; न४–धर्मेणात्मात्मविद्यया(?) । ६९/३–ग१–आत्मविद्या च धर्म्या च ; ग२–आत्मविद्यापि कर्मापि ; ग५–अध्यात्मविद्या धर्म च । ६९/४–ग५, ६, त, क–पित्राचार्येण वा भवेत् ; ग२–पित्राचार्येण भावयेत्; न३———मानघे(?) ; न८————चानघे ; न६————वा सखे ; ग ४————त्रासयेत्(?) ।

७०/३–न२, ६, ८, क–गुरवः श्रुतिसम्पन्नाः ; त–स्वधर्मनिरताः पूज्याः ; ग२, ५, न८ (पाठान्तरत्वेन); ग६–स्वधर्मनिरतैःपूज्याः । ७०/४–न१, २, ५, ७—पूज्या वाङ्मनसादिभिः ; ग१–तोष्या——; ग२–सामान्यं (?सन्मान्या) वन्दनादिभिः ; न४, ग३–तोष्या वाक्कायमानसैः ; त–मान्यवो (?मान्या वा (ङ्) मनसादिभिः ।

*अत्र "न८" लेखे ७०/३–४ अनन्तरमधिकः श्लोकः, स इद्दशः— गुरवः श्रुतिसम्पन्नाः विद्वांसश्च, तथाविधाः । स्वधर्मनिरताः पूज्याः सदा वाङ्मसादिभिः ॥

†हस्तलेखेऽध्यायपरिसमाप्तिलेखानामान्तरं बाह्यं च वैविध्यमतीव दृश्यते। तल्लेखकानां बुध्दिविलासः एवेति मत्वा तेषां भेदा नास्मिन्ग्रन्थे प्रदर्शिताः ॥

द्वितीयोऽध्यायः ॥

*याज्ञवल्क्य उवाच—

तपः संतोष आस्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् ॥१॥

एते तु नियमाः प्रोक्तास्तांश्च सर्वान्पृथक् शृणु ।
विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिभिः ॥२॥

शरीरशोषणं प्राहुस्तापसास्तप उत्तमम् ।
यदृच्छालाभतो नित्यमलं पुंसो भवेदिति ॥३॥

या धीस्तामृषयः प्राहुः संतोषं सुखलक्षणम् ।
धर्माधर्मेषु विश्वासो यस्तदास्तिक्यमुच्यते ॥४॥

न्यायार्जितं धनं चान्नमन्यद्वा यत्प्रदीयते ।
अर्थिभ्यः श्रद्धया युक्तं दानमेतदुदाहृतम् ॥५॥

द्वितीयोऽध्यायः ॥

*न१, ४–याज्ञवल्क्य उवाच ; न२, ५, ७–श्रीयाज्ञवल्क्य उवाच ; न८, क–याज्ञवल्क्यः ; न३–श्रीभगवान् । ; ग६–ओम् भगवान्–; ग१, २, ३, ४, ५, न६, त– × × × × । १/१–न२, ६,७, ८, ग१, २, ४, ५, ६, त, क–तपः संतोषमास्तिक्यं । १/३–ग२–सिद्धान्त-वेदान्तश्रवणं चैव(?) ।

२/१–न३, ४, ६, ८, ग३—एते च नियमाः प्रोक्ताः । २/२–न१–तं च————; त–सर्वांस्तांश्च पृथक् श्रृणु ; न५, ७–तांश्च श्रुत्वा————; ग४–तांस्तु सर्वान्पृथक्—। २/३–४–ग३– × ×' × × × × × ×। २/४–क–कृच्छ्रचा × × × ।

३/१–२–ग३– × × × × × × × × । ३/२–ग५–तपसां तप उत्तमम् । ३/४–ग५–अलं पुंसां भवेदिति । ३/३–४–न४, ६, ग३— × × × × × × × × ।

४/१–२–ग३– × × × × × × × × । ४/१–ग५, ६, त, क–या धीस्तां मुनयः—; न८–या भीस्तां(?)———। ४/२- न१, २, ५–संतोषं शुभलक्षणम् ; ग१–संतोषस्य च लक्षणम् ; न३, ४, त—संतोषः सुखलक्षणम् । ४/३–ग५–विश्वासो यस्तदास्तिक्यं (पाठान्तरत्वेन) । ४/४– ग५–वेदोक्तेषु च कर्मसु (पाठान्तरत्वेन) ; ग१–यस्तदास्तिक्यमिष्यते । ४/३–४–क– × × × × × × × ×।

५/१ ग३, न६–न्यायार्जितं धनं वान्नं; ग४————धनं चान्यत् ; ग६, क————धनं-धान्यं ; त, न८– × × × × । ५/२–ग२–अन्यद्वा यः प्रयच्छति ; न३–वाक्य(?) यच्च प्रदीयते ; न४–वात्रेद्यया(?) यत्प्रदीयते ; ग४–अन्यस्मै———— । ५/१–२–त, न८–× × × × × × × × । ५/३–ग३–अर्थित्वा श्रद्धया युक्तं ; ग४, न८–अक्षतं——— ; ग५, ६—अर्थिभ्यः श्रद्धया देयं ।

यत्प्रसन्नस्वभावेन विष्णुं वाऽप्यन्यमेव वा ।
यथाशक्त्यर्चनं भक्त्या ह्येतदीश्वरपूजनम् ॥६॥

रागाद्यपेतं हृदयं वागदुष्टानृतादिना ।
हिंसादिरहितः काय एतदीश्वरपूजनम् ॥७॥

* सिद्धान्तश्रवणं प्रोक्तं वेदान्तश्रवणं बुधैः ।
द्विजवत्क्षत्रियस्योक्तं सिद्धान्तश्रवणं बुधैः ॥८॥

विशां च केचिदिच्छन्ति शीलवृत्तवतां सताम् ।
शूद्राणां च स्त्रियाश्चैव स्वधर्मस्थतपस्विनाम् ॥९॥

सिद्धान्तश्रवणं प्रोक्तं पुराणश्रवणं बुधैः ।
वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत् ॥१०॥

६/१–ग१, २, ५, ६, न६–यत्प्रपन्नस्वभावेन ; न४–यत्प्रपन्नं स्वभावेन ; ग३–यत्प्रयत्नं———; त–यत्प्रसन्नत्वस्वभावेन । ६/२–न६–विष्णुं वा चान्यमेव वा ; न१–विप्लुषाप्यन्यमेव वा ; ग२, ४, ५, ६, न३–विष्णुं वा रुद्रमेव वा ; न४–बहु वाप्यल्पमेव वा ; ग३—बहु वा अल्पमेव वा ; त–विद्ययाथ धनेन वा । ६/३–न७, ८, ग४, क–यथाशक्तयर्चयेद्भक्त्या । ६/४–ग१–चैतदीश्वरपूजनम् ; न३–त्वेतदीश्वरपूजनम् ।

७/१–न१, २, ५, ७, ग१–रागादपेतं हृदयं ; न८–रागादिरहितं चित्तं ७/२–ग३–मम द्रष्टानृतादिना(?) ग१–वागदुष्टानृतादिभिः ; न१, ५–वागदुष्टा व्रतादिना ; त– यथापृष्टं × × × ; न३–वागपे+ +नृतादिना ; न४–ममतादुष्टतादिना । ७/१–२–ग५, क–× × × × × × × × × । ७/३–त–हिंसादिरहितं यत्स्यात् । ७/४–ग१–चैतदीश्वरपूजनम् ; न४–तपईश्वरपूजनम् । *ग७, त–अत्रायमधिकः श्लोकः—येन केनाप्युपायेन यस्य कस्यापि देहिनः। संतोषं जनयेत्प्राज्ञस्तदेवेश्वरपूजनम् । ७।३–४–ग५, क–× × × × × × × × ।

८/३–न३–द्विजे च क्षत्रियस्योक्तं ; न६–द्विजवत्क्षत्रिये प्रोक्तं ; ग३–द्विजवत्क्षत्रियप्रोक्तं । ८/४–न३–वेदान्तश्रवणं बुधैः ; त–सिद्धान्तश्रवणाद्वुधैः ; ग३–पुराणश्रवणं बुधैः ।

९/१–२–ग२, ३– × × × × × × × × × । ९।२–न२–शीलवृत्तमतां सताम् ; न६–शीलवृत्तमतां तसा(?); ग५, ६, त–शीलवृत्तवतां सदा ; न३–शीस्तव्रत- (?शीलव्रत) वतां । ९/३–न२–शूद्राणां च स्त्रियश्चैव ; ग१–शूद्राणां च तथा स्त्रीणां ; न६, ८, ग५, क–शूद्राणां च स्त्रियां चैव । ९/४न१–स्वधर्मस्तु तपस्विनाम् ; न२, ५, ७–स्वधर्मस्तु तपः स्मृतम् ; ग५, ६, त, क–स्वधर्मवशवर्तिनाम् । ९/३–४–ग२, ३– × × × × × × × × × ।

१०/१–न१–सिद्धान्तश्रवणे प्रोक्तं ; ग५, ६, त, क–पुराणश्रवणं प्रोक्तं । १०/२–ग५, त, क–वेदान्तश्रवणं बुधैः ; न३–पुराणश्रवणं बुधाः ; ग६–सिद्धान्तश्रवणं बुधैः । १०/१–२–ग३–× × × × × × × × × × । १०/३–ग३, न८, क–वेदे लौकिकमार्गेषु । १०/४–न४, ग३–कल्पितं(?) कर्म यद्भवेत् ।

तस्मिन्भवति या लज्जा ह्रीस्तु सैवेति कीर्तिता ।
विहितेषु च सर्वेषु श्रद्धा या सा मतिर्भवेत् ॥११॥

गुरुणा चोपदिष्टोऽपि वेदबाह्यविवर्जितः ।
विधिनोक्तेन मार्गेण मन्त्राभ्यासो जपः स्मृतः ॥१२॥

अधीत्य वेदं सूत्रं वा पुराणं सेतिहासकम् ।
एतेष्वभ्यसनं यच्च तदभ्यासो जपः स्मृतः ॥१३॥

जपश्च द्विविधः प्रोक्तो वाचिको मानसस्तथा ।
वाचिक उपांशुरुच्चैश्च द्विविधः परिकीर्तितः ॥१४॥

मानसो मननध्यानभेदाद् द्वैविध्यमास्थितः ।
उच्चैर्जपादुपांशुश्च सहस्त्रगुण उच्यते ॥१५॥

मानसस्तु तथोपांशोः सहस्त्रगुण उच्यते ।
मानसाच्च तथा ध्यानं सहस्त्रगुणमुच्यते ॥१६॥

११/१–क–यद्भवति————। ११/२–त–ह्रीस्तु सैवेति कीर्तितम् ; न६–ह्रीस्तु सैव तु कीर्तिता ; ग४ न८, क–ह्रीश्च सैव तु कीर्तिता । ११/३–त–विहितेषु च कृत्येषु : ग२, ३, न४–विहितेषु च मार्गेषु । ११/४–न३, ८, ग४, क–श्रद्धया सा मतिर्भवेत् ; ग३–शुद्धा या सा———; ग५–श्रद्धा वा सा——।

१२/१–न१–गुरुणा चोपदिष्टेऽपि ; न३–गुरुणां चोपदिष्टोऽपि : ग५, ६, क–गुरुणा चोपदिष्टार्थो ; त————चोपदिष्टार्थं ; ग४–विधिना चोपदिष्टोऽपि। १२/४–ग२———— विधिः स्मृतः ।

१३/१–ग१–अधीत वेदसूत्रे वा ; न३, ४, ६, ८–अधीत वेदेष्वंगेषु ; त–अयं स्मृतो वा सूत्रे वा(?);ग२—आदौ स्मृतौ(?)वा सूत्रे वा ; ग६–अथ स्मृतौ——। १३/२–ग१, २, ६, न३, ४, ६, ८, त–पुराणे सेतिहासके। १३/१–२–ग३, ४, ५, क– × × × × × × × × । १३/३–न१–एतेष्वभ्यसनं तच्च ; न५–एतेष्वध्ययनं यच्च ; न२–एतेष्वभ्यसनं यच्च; न८–यद्यध्ययनं तच्च(?) न७————तच्च ; न४, ६–यदिहाध्ययनं तच्च ; ग२, ६–वेदेष्वध्ययनं पुंसां ; त–वेदस्याध्ययनं———। १३/४–न१, २, ५, ७–सदभ्यासो जपः स्मृतः ; ग१–तस्य त्वभ्यासो ;——न६, ८–मन्त्राभ्यासो———। १३।३–४–न३, ग३, ४, ५, क– × × × × × × × × ।

१४/१–ग५, क–जपस्तु द्विविधः प्रोक्तो । १४/२–न८–मानसो वाचिकस्तथा । १४/३–न६–वाचिकोपांशुदन्तैश्च ; न३, ४, ५–वाचिको तीवा (–तीव) उच्चैश्च । १४/४–ग२– द्विविधो वाचकः (स्मृतः) ; ग४. न८–भेदाद्द्वैविध्यमाश्रितः ; न७, ग५, ६————वैविध्यमास्थितः ; ग३–त्रिविधः परिकीर्तितः ।

१५/१–न१, २–मानसो मानसध्यान—; ग२–मानसो मनसा ध्यानं ; न३, ४, ५, ६, ७, ग३——————ध्यान–। १५/२———ग२–द्वैविध्यमिष्यते ; ग४———द्वैविध्यमाश्रितः। १५/१–२–न८– × × × × × × × ×। १५/३–न३–उच्चैर्जप उपांशुश्च। १५/३–४–ग३– × × × × × × × ×।

१६/१–न५, ग१, ४, ६, क––––मानसश्च तथोपांशोः ; न३–मानसश्च तथा चैव ; ग५–मननं च तथोपांशोः ; १६/१–२–ग३, न८– × × × × × × × ×। १६/३–ग४–मानसस्तु तथा ध्यानं ; ग५, ६–मननाच्च तथा———। १६/३–४–न३, ४, ६, ग३– × × × × × × × ×।

उच्चैर्जपस्तु सर्वेषां यथोक्तफलदो भवेत् ।
नीचैः श्रुतो न चेत्सोऽपि श्रुतश्चेन्निष्फलो भवेत् ॥१७॥

ऋषिं छन्दोऽधिदैवं च ध्यायन्मन्त्रं च सर्वदा ।
यस्तु मन्त्रजपो गार्गि स एव हि फलप्रदः ॥१८॥

प्रसन्नगुरुणा पूर्वमुपदिष्टं त्वनुज्ञया ।
धर्मार्थमात्मसिद्ध्यर्थमुपायग्रहणं व्रतम् ॥१९॥

इति श्रीयोगयाज्ञवल्क्ये द्वितीयोऽध्यायः ॥

१७/१–न१ २, ५, ७, ८, ग४, त, क–उच्चैर्जपश्च सर्वेषां । १७/२–ग५–यथोक्तं फलदो भवेत् । १७/३–न६–नीचैः श्रुतो न चेद्वापि ; ग२–नीचैः श्रुतो वचःसोऽपि । १७/४–न२, ५, ७–श्रुतश्च निष्फलो भवेत्; ग५ श्रुतश्चेन्निष्फलं भवेत्। १७/३–४–न४– × × × × × × × ×।

१८/१–न२–ऋषिच्छन्दोऽधिदैवं च ; न३————ऽधिदैवत्यं ; ग४————देवताश्च ॥ १८/२–ग५, ६, त, क–ध्यानमर्चनमेव च ; न३–ध्यायन्मन्त्रं च सर्वशः ; न४, ६–ध्यानं मन्त्रश्च सर्वदा ; ग३–ध्यानं मन्त्रं च———। १८/३–न३, ६–यस्तु मन्त्रं जपो गार्गि ; ग३–यत्तु मन्त्रजपन्गार्गि ; ग४–यस्तु तत्र जपं—; ग६——मन्त्रजपे—; न१–यत्तन्मन्त्रे भवेद्गार्गि; न२, ५–यत्तन्मन्त्रो.————; ग२–स तु मन्त्रजपो———; न४–युक्तमन्त्रजपं————। १८/४–न६–स एव तु फलप्रदः ; न१, २, ५–सर्वकामफलप्रदः ; न४, ८, ग३, ४, ५, ६, क–तदेव हि फलप्रदम् ; ग२–सदृशैव फलप्रदः ; न३, ७–सर्ववद्भि(?)फलप्रदः ।

१९/१–न१, ७–व्रतं च गुरुणा पूर्वं ; न२–वृत्तं च———— ; न८, ग४–प्रसन्नगुरुणा-सार्धं । १९/२–न२–उपदिष्टं तदज्ञया(?) ; न५————तदनुज्ञया ; ग४–उपदिष्टे त्वनुज्ञया ; न३–उपतिष्टं————। १९/३–न१, २, ग३–धर्मार्थिकामसिद्ध्यर्थं ; ग५, ६–धर्मार्थमर्थसिद्ध्यर्थं ; ग४–धर्मार्थकाममोक्षार्थं ; न८, क–धर्मार्थकाममोक्षाणां । १९/४–ग२–उपायग्रहणं हितम् ; न३–उपायग्रहणायते ; न६–उपांशुग्रहणं कृतम ।

तृतीयोऽध्यायः ॥

*याज्ञवल्क्य उवाच—

आसनान्यधुना वक्ष्ये शृणु गार्गि तपोधने ।
स्वस्तिकं गोमुखं पद्मं वीरं सिंहासनं तथा ॥१॥

भद्रं मुक्तासनं चैव मयूरासनमेव च ।
तथैतेषां वरारोहे पृथग्वक्ष्यामि लक्षणम् ॥२॥

जानोर्वोरन्तरे सम्यक्कृत्वा पादतले उभे ।
ऋजुकायः सुखासीनः स्वस्तिकं तत्प्रचक्षते ॥३॥

सीवन्यास्त्वात्मनः पार्श्वे गुल्फौ निक्षिप्य पादयोः ।
सव्ये दक्षिणगुल्फं तु दक्षिणे दक्षिणेतरम् ॥४॥

एतच्च स्वस्तिकं प्रोक्तं सर्वपापप्रणाशनम् ।
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे निवेशयेत् ॥५॥

दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं यथा ।
अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु ॥६॥

तृतीयोऽध्यायः ।

*न४, ५—याज्ञवल्क्य उवाच ; ग४, न८—याज्ञवल्क्यः; ग३—श्रीयाज्ञवल्क्यः ; न६—श्रीभगवानुवाच ; न३—श्रीभगवानु । ; न१, २, ७, ग१, २, ५, ६, त, क— × × × ×।

१/१–२—न२—× × × × × × × ×।

२/१—त——————दिव्यं । २/३—न२, ७—तथा चैषां——————; ग२—अथ तेषां———; न६—तद्वै तेषां—————;ग६, न८, क—तथैवैषां ——————।

३/१—न३, ८, क—जानूर्वोरन्तरे सम्यक् ; न४—जान्वोर्वोरन्तरे———। ३/३—न१, ३, ५—ऋजुकार्यः सुखासीनं ; ग३, ५, न६——————समासीनः । ३/४—न३—स्वस्तिकं च प्रचक्षते ; न६——————तु—————; ग४——————नित्यमभ्यसेत् ।

४/१—ग५—सीवन्या वामतः पार्श्वे ; न१, २, ३, ५, ७—सीवन्याश्चात्मनः———; ग६—सीवन्या वर्त्मनः———; ग३—निविश्या(?)चात्मनः पार्श्वे । ४/२—ग५, ६—गुल्फौ निष्पीड्य पादयोः। ४/१–२—न४— × × × × × × × ××। ४/३—न४—सव्ये दक्षिणगुल्फौ तु; ग३—सव्यदक्षिणगुल्फौ तु । ४/४—न२, ६, ग४—दक्षिणे दक्षिणोत्तरम् ; न३—दक्षिणा दक्षिणेतरम् । ४/३–४—न५— × × × × × × × × ×।

५/१—ग३—एतद्वा स्वस्तिकं प्रोक्तं। ५/१–२—न५— ×××××××××। ५/३—न१, २, ग१, २, त—सव्ये दक्षिणपृष्टं तु ; ग३—सव्यदक्षिणगुल्फौ तु । ५/४—न३—पृष्टं तु विनिवेदयेत् ; न६, ग४, ५, क—पृष्टपार्शे (? र्श्वे) नियोजयेत्; न८—पृष्टपार्श्वे नियोजयेत् ; न७—पृष्टपार्श्वे निवेदयेत् ।

६/१—न४—दक्षिणे तु——————; ग३—दक्षिणे तु तदा———। ६/२—ग३——— गोमुखा यथा ; ग४————गोमुखं तथा ; ग२, त————गोमुखोपमम्; ग५—आसनं गोमुखं यथा । ६/३—न६, ग४—अंगुष्टं तु निबध्नीयात् ; न८—अंगुष्टे तु———; ग६—अंगुष्टेन———। ६/४—न४, ग३—हस्ताभ्यां व्युत्क्रमं तथा ।

उर्वोरुपरि विप्रेन्द्रे कृत्वा पादतले उभे ।
पद्मासनं भवेदेतत्सर्वेषामपि पूजितम् ॥७॥

एकं पादमथैकस्मिन्विन्यस्योरुणि संस्थितम् ।
इतरस्मिंस्तथा चोरुं वीरासनमुदाहृतम् ॥८॥

*गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
दक्षिणं सव्यगुल्फेन दक्षिणेन तथेतरम् ॥९॥

हस्तौ च जान्वोः संस्थाप्य स्वांगुलीश्च प्रसार्य च ।
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ॥१०॥

सिंहासनं भवेदेतत्पूजितं योगिभिः सदा ।
गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ॥११॥

७/१–न३, ६, ७, ग३, ५––उर्वोरुपरि विप्रेन्द्र ; ग१————विन्यसेत्(?) ; ग४, न८–उर्वोरुपरि मैत्रेयी ; न४–जंघोपरि तु विप्रेन्द्रे । ७/२–न३–कृत्वा पादतले शुभे । ७/३–न२–पद्मासनं भवेत्× ×। ७/४–न२+ +तेषामपि(?)पूजितम्; ग४, न८–पूजितं योगिभिः सदा ।

८/१–न१, ५–एकपादमप्येकस्मिन् ; न६–एकं पादं तदेकस्मिन् ; न७–एकं तु पादमेकस्मिन् । ८/२–न१, ५,–विन्यस्यस्योरुणि संस्थिते ; न४, ग३————संस्थितः । ८/१–२–त–× × × × × × ×। ८/३–ग३–इतरस्मिंस्तदाचोरुं। ८/३–४–न६, त–× × × × × × × ×। "त, ग५" लेखयोः ९–१० श्लोकौ न विद्येते, "क" लेखे च ९/३–४,१०/१–४ एतत्पंक्तित्रयं नास्ति ।

९/१–न३–गुल्फौ+वृषणस्याधः ; ग४––गुल्फेऽल्प————; न८–गुल्फे च———; ग६–तु वृषणस्याथ। गुल्फौ ९/३–ग२–दक्षिणं सव्यभागे च ; ग३————सव्यगुल्फैश्च । ९/४–न४, ६, ८, ग४—दक्षिणेन तथोत्तरम् ।

१०/१–न१, २, ५–हस्तौ जानूपरि स्थाप्य ; न७–हस्तौ च———— ; ग३––हस्तौ तु जान्वोः संस्थाप्य । १०/२–न३, ८, ग६–स्वांगुली(:)संप्रसार्य च ; न४, ग३, ४–स्वांगुलीभिः प्रसार्य च । १०/३–न४–व्याघ्रवक्तो निरीक्षेत । १०/४–ग३––नासाग्रं तु समाहितः ।

११/१–२–ग५, क–× × × × × × × ×। त–सिंहासनमिदमुर्व्यामासनानां विशेषतः; ग६–पूजितं सर्वयोगिभिः। "सिंहासनमिदमुर्व्यामासनं च विशेषतः" इति पाठान्तरत्वेन । *अत्र केषुचिल्लेखेष्वेको द्वौ वा श्लोकावधिकौ दृश्येते। तौ—ग५, त––

योनिंस्तारकमंघ्रिमूलघटितं[1] धृत्वासनं विन्यसे[2]न्मेढ्रे पादमथैवमेव हृदये[3] धृत्वासनं विग्रहम्[4]। स्थाणुर्यद हृदयेक्षमेदचलया[5] दृष्वा-भ्रुवोरन्तरं चेदं मोक्षकपाटभेदनकरं[6] सिद्धासनं प्रोच्यते[7] ॥ अयमेव श्लोको "ग६" लेखेऽपि दृश्यते

तथापि तत्र क्षति पाठान्तराणिः च विद्यन्ते, यथा––१. घटिता ; २. + + + + ; ३. मेढ्रे पादमथैकमेक हृदये ; ४. धृत्वा समं विग्रहम् ; ५. स्थानं यत्पदवेक्षयेदचलया ; ६. चेतन्मोक्षकपाटभेदनकरं ; ७. सिद्धासनं प्रेर्यते ॥ 'त' लेखेऽपि स अशुद्ध इव दृश्यते । "ग" ५ लेखे द्वितीयोऽप्यधिकः श्लोकोऽत्र विद्यतेः। स यथा––सीवनीं गुल्फदेशाभ्यां निपीडच व्युत्क्रमेण तु । प्रसार्य जानुनोर्हस्तौ आसनं सिंहपूर्वकम् ॥ ११/३–ग४, न८, क–गुल्फे च वृषणस्याधः ; ग५–गुल्फौ तु———— ; ग६–गुल्फौ च वृषणस्याथ । ११/३–४– × × × × × × × ×।

पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलम् ।
भद्रासनं भवेदेतत्सर्वव्याधिविषापहम् ।।१२।।

संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु सव्यतः ।
सव्यं दक्षिणगुल्फेन मुक्तासनमितीरितम् ।।१३।।

मेढ्रादुपरि निक्षिप्य सव्यं गुल्फं तथोपरि ।
गुल्फान्तरं च निक्षिप्य मुक्तासनमिदं तु वा ।।१४।।

अवष्टभ्य धरां सम्यक् तलाभ्यां तु करद्वयोः
हस्तयोः कूर्परौ चापि स्थापयन्नाभिपार्श्वयोः ।।१५।।

समुन्नतशिरःपादो दण्डवद्व्योम्नि संस्थितः ।
मयूरासनमेतत्तु सर्वपापप्रणाशनम् ।।१६।।

१२/१–ग५, ६, त–पार्श्वपादौ तु पाणिभ्यां; न ६–पार्श्वे पादौ च————। १२/२–ग१–दृढं बद्ध्वा सुनिश्चलः । १२/४–न४–सर्वव्याधिविनाशनम् ; न७–सर्वव्याधिविषापहः ; ग६–पूजितं सर्व योगिभिः (पाठान्तरत्वेन "सर्वव्याधिविषापहम्" अप्यस्त्येव) ।

१३/१–ग२–संपीड्य सीवनीं सर्वां; न३————————शुद्धां । १३/२–ग२–गुल्फेनैकेन सर्वतः ; न६–गुल्फेनैव सुसंवृतं । १३/४–ग१, न४, त–मुक्तासनमुदीरितम् ; ग२–मुक्तासनमिदं तु तत् ।

१४/१–ग१–मेढ्रस्योपरि निक्षिप्य ; ग५, ६, त–मेढ्रादुपरि विन्यस्य । १४/२–ग१, २, त–सव्यं गुल्फं ततोपरि ; । १४/३.–न१–गुल्फान्तरं तु निक्षिप्य ; न६–गुल्फान्तरं विनिक्षिप्य ; ग३—गुल्फान्तरे————; ग५–गुल्फान्तरं तु निक्षिप्तं । १४/४–न१, २, ४, ५, ७, ग३–मुक्तासनमिदं तथा ; न३, ६—मुक्तासनमितीरितम् ।

१५/२–न१, २, ५, ७–तलाभ्यां करयोर्द्वयोः ; ग१————चाथ हस्तयोः ; न३–कराभ्यां तु करद्वयोः(?) ; न४–कूर्पराभ्यां तु(?)करद्वयोः ; न६–कराभ्यांतः(?)करद्वयोः । १५/३–ग२–हस्तयोः कूर्पकाञ्चापि ; न६–हस्तद्वयोः (?) कूर्परौ वा ; ग३, ४, ५–हस्तयोः——वापि । १५/४–न५, ६, ७, ८, ग३, ४, ५, ६—स्थापयेन्नाभिपार्श्वयोः ।

१६/१–न२, ७, ग१, ६, त–समुन्नतशिराःपादौ ; न३–समुन्नतशिरेःपादौ (?)। १६/२–ग१, ४, त—दण्डवद्व्योम्नि संस्थितम् । १६/३–ग२–मयूरमासनं प्रोक्तं ; ग६–मयूरासनमेतद्धि ; न३–मयूरासनमेतच्च ; न५—मयूरासनमेवैतत् ।

*सर्वे चाभ्यन्तरा रोगा विनश्यन्ति विषाणि च ।
यमैश्च नियमैश्चैव आसनैश्च सुसंयुता ॥१७॥

नाडीशुद्धिं च कृत्वा तु प्राणायामं ततः कुरु ॥१८॥

इति श्रीयोगयाज्ञवल्क्ये तृतीयोऽध्यायः ।

१७/१–न३————ह्याभ्यन्तरा रोगाः ; न४————आभ्यन्तरा—; १७/१–२–न६– × × × × × × × ×। *त–अत्र सार्धैकश्लोकोऽधिको दृश्यते । स च—

येन केन प्रकारेण सुखं धैर्यं[1] च जायते ।
तत्सुखासनमित्युक्तमशक्तस्तु समाचरेत्[2] ॥

आसनं विजितं येन[3] जितं तेन जगत्त्रयम् ॥

स एव "ग६" लेखेऽपि विद्यते किन्तु निम्नलिखिताशुद्धपाठान्तरैः—
१. धार्यं(?)च ; २. अधतस्तत्समाचरेत् ; ३. आसनं वर्णितं(?)येन । १७/३–न१, ५, ७, ८–यमैश्च नियमैश्चापि ; न४–यमं च नियमं चैव। १७/४–न२, ८, ग२, ३, ४, ५, ६, क–आसनैश्च सुसंयतः ; न३–आसनं तैश्च संयुता ; न४–आसनं च सुसंयतः(?) ; न६–आसनैश्च सुसंयुतं ; न७——————तु संयता ।

१८/१–ग५, ६–नाडीशुद्धिं च कृत्वाथ ; न२——————कृत्वा वै ; ग२—————— कृत्वादौ ; न८, क——————कृत्वैव ; न३, ६——————ततः कृत्वा ; ग४—————— श्रुत्वैव ; त– × × × × । १८/२–न३–प्राणायामं तथा कुरु ; न४, ग३—————— ततः परम् । त– × × × × ।

चतुर्थोऽध्यायः ।।

श्रुत्वैतद्भाषितं वाक्यं याज्ञवल्क्यस्य धीमतः ।
पुनः प्राह महाभागा सभामध्ये तपस्विनी ।।१।।

*गार्ग्युवाच—

भगवन्ब्रूहि मे स्वामिन्नाडीशुद्धिं विधानतः ।
केनोपायेन शुद्धाः स्युर्नाडयः सर्वदेहिनाम् ।।२।।

उत्पत्तिं चापि नाडीनां चारणं च यथाविधि ।
† कन्दं च कीदृशं प्रोक्तं कति तिष्ठन्ति वायवः ।।३।।

स्थानानि चैव वायूनां कर्माणि च पृथक्पृथक् ।
विज्ञातव्यानि यान्यस्मिन्देहे देहभृतां वर ।।४।।

वक्तुमर्हसि तत्सर्वं त्वत्तो वेत्ता न विद्यते ।

इत्युक्तो भार्यया तत्र सम्यक् तद्गतमानसः ।।५।।

गार्गीं तां सुसमालोक्य तत्सर्वं समभाषत ।

चतुर्थोऽध्यायः

१/१–ग५, ६, क–श्रुत्वैतद्भाषितं गार्गी । १/३–न२,३ ५, ७–पुनः प्राह सभामध्ये । १/४–न२, ५, ७—महाभागा तपस्विनी ; न३–सभामध्ये यशस्विनी ; ग५, ६, क–ऋषिमध्ये तपस्विनी । *न२, ग१, २, ६, क– × × × × ————————।

२/१–ग५, ६, क–भगवन्ब्रह्मविच्छ्रेष्ठ । २/४–ग६–नाडचस्ताः सर्वदेहिनाम् ।

३/१–ग५, ६, न८, क–उत्पत्तिं चैव नाडीनां । ३/२–न१, २, ६, ७, ८, क–चरणं च यथाविधि ; ग२–चलनं च यथाविधि ; न४–सरणं च————; न५–धारणं च————————; ग३ वराणां च(?)—————; ग१–चलनं च तथाविधम् । † न१, २, ५, ७, ग१–अत्रेयमधिका पंक्तिः–विभागं च पृथग्ब्रूहि मुख्यामुख्यत्वमेव च । ३/३–न३, ६, ७, ग३—कन्दश्च कीदृशः प्रोक्तः ; न४–क्रमश्च————— । ३/४–न१, २, ५, ७–क्व तिष्ठन्ति च वायवः ; ग४, न८–कति तिष्ठन्ति नाडयः ।

४/३–ग४, न८–विज्ञातव्या मयान्यत्र । ४/४–ग४—देहि देहभृतां वर ।

५/१–न३–वक्तुमर्हसि सर्वज्ञ ; न१, २, ५, ७——————मे सर्वं ; ग३——————— सर्वं त्वं । ५/२–ग४, ५, न८–त्वत्तो वक्ता न विद्यते ; ग६–त्वत्तो छेत्ता——————। ५/४–न६–सम्यक् हृद्गतमानसः ।

६/१–ग२–गार्गीं च तां समालोक्य ; न३–गार्गी गीतं—————; न४–गार्गीं तां च———; ग४, ५, न८, क–गार्गीं तां तु—————।

*याज्ञवल्क्य उवाच—

शरीरं तावदेवं हि षण्णवत्यङ्गुलात्मकम् ॥६॥

विद्धयेतत्सर्वजन्तूनां स्वाङ्गुलीभिरिति प्रिये ।
शरीरादधिकः प्राणो द्वादशाङ्गुलमानतः ॥७॥

चतुर्दशाङ्गुलं केचिद्वदन्ति मुनिसत्तमाः ।
द्वादशाङ्गुल एवेति वदन्ति ज्ञानिनो नराः ॥८॥

आत्मस्थमनिलं विद्वानात्मस्थेनैव वह्निना ।
योगाभ्यासेन यः कुर्यात्समं वा न्यूनमेव वा ॥९॥

स एव ब्रह्मविच्छ्रेष्ठः स सम्पूज्यो नरोत्तमः ।
आत्मस्थवह्निनैव त्वं योगजेन द्विजोत्तमे ॥१०॥

आत्मस्थं मातरिश्वानं योगाभ्यासेन निर्जय ।
देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम् ॥११॥

---

* न३, ६—श्रीभगवानुवाच ; ग४, न८—याज्ञवल्क्यः ; ग२, ५, त, क— × × × ×।

६।३—ग२—शरीरं देहिनां तावत् ; न६————तावदेतत्तु । ६/४ न१, २—षण्णवत्यंगुलान्वितम्; ग२—षण्णवत्यंगुलायतम् ।

७/१—ग२—विश्वेन(?)सर्वजन्तूनां ; न६—विद्यात्तत्सर्वजन्तूनाम् । ७/३—ग३—शरीरादधिकं(?) प्राणः ; ग२—शरीरोदररन्ध्राणाम्(?) ।

८/१—ग४—चतुर्दशांगुलीः केचित् । ८/२—ग४, न८—वदन्ति ज्ञानिनो नराः ; न६—इच्छन्ति मुनिसत्तमाः । ८/३—न४, ८, ग४, ५, ६, क—द्वादशांगुलमेवेति । ८/२—३—ग२— × × × × × × × ×।

९/१—ग१, २, ४, ६, न६, त—आत्मस्थमनिलं विद्यात् ; ग३—आत्मस्थाननिलान्विद्वान् । ९/३—न३—योगाभ्यासेन तत्कुर्यात् ; ग३, ६————यत्कुर्यात् । ९/४—न७—समं वा न्यूनमेव च ; न३—शर्वाश्रमयमेव(?) वा ।

१०/१—न८, क—स नरो ब्रह्मविच्छ्रेष्टः । १०/२—ग२, ४—सम्पूज्यश्च नरोत्तमः ; ग३—स पूज्यश्च————; ग१, न८, त, क—सम्पूज्यश्च नरोत्तमैः ; न३—सम्पूज्यः स नरोत्तमः ; न४—सम्पूज्यश्च नरोत्तमे ; न६—सम्पूज्यस्तु नरोत्तमः ; ग६—सुसंपूज्यो नरोत्तमः । १०/३—ग२—आत्मस्थवह्निना चैव ; ग३—आत्मस्थवह्निनैवालं । १०/४—ग२—योगाभ्यासाद् द्विजोत्तमे : ; ग५—योगस्थेन द्विजोत्तमे ; न७—योगजेन द्विजोत्तमः ; न३—योजयैनं द्विजोत्तमै(?) ।

११/१—न४—आत्मस्थं मातरिश्वानां(?) ; ग३—आत्मस्थमातरिश्वानां (?); ग५—आत्मस्थां (?स्थं) मातरिश्वानं ; न३—आत्मन्यं————। ११/२—न४, ग३—योगाभ्यासेन निर्जयः(?) ; न६————निर्जयं(?) । ११/३ ग२—देहमध्ये शिखास्थानं ; ग३, न६————शिवस्थानं ; न३—देहमध्यं शिरस्थानं(?) ।

त्रिकोणं मनुजानां च चतुरस्रं चतुष्पदाम् ।
*मण्डलं तत्पतंगानां सत्यमेतद्ब्रवीमि ते ॥१२॥

तन्मध्ये तु शिखा तन्वी सदा तिष्ठति पावकी ।
देहमध्यं च कुत्रेति श्रोतुमिच्छसि चेच्छृणु ॥१३॥

गुदात्तु द्व्यंङ्गुलादूर्ध्वमधो मेढ्राच्च द्व्यंङ्गुलात् ।
देहमध्यं तयोर्मध्यं मनुष्याणामितीरितम् ॥१४॥

चतुष्पदां तु हृन्मध्यं तिरश्चां तुन्दमध्यमम् ।
द्विजानां तु वरारोहे तुन्दमध्यमितीरितम् ॥१५॥

कन्दस्थानं मनुष्याणां देहमध्यान्नवाङ्गुलम् ।
चतुरङ्गुलमुत्सेधमायामश्च तथाविधः ॥१६॥

३४/१–त–मनोजयत्वं———; क– × × × ×। ३४/२–न३, ५, ग५, ६——— विनश्यति ; न३–स्खलितादि च——(?); ग३–वदितादि च————(?); न८–पटुतादि च————; क– × × × ×। ३४/३–न८, क–× × × ×। ३४/४–न१, २, ५, ग६–मकाराख्योऽन्तरात्मकः ; न३–भकाराक्षोंतरात्मकः(?) ; ग४–मकाराख्यो हठात्मकः(?) ; ग५–मकाराख्योऽन्तकात्मकः; न७–मक्राराख्योंतरात्मकः(?) ; न८, क– × × × ×।

३५/१–त, ग२, न५————चोत्पादयत्येव ; न८–नादं च स्वादयत्येषः(?) ; ग१–ज्ञानं चोत्पादयत्येषः; क– × × × ×। ३५/२–त————प्राणसंयमात् ; न३———— प्राणसंयुतः; ग५, ६–ज्ञेयः केवलकुम्भकः; न८–कुम्भकः केवलो हि तः(?सः); क–× × × ×। ३५/३–ग५, ६–प्राणसंयमनो———; क– × × × ×। ३५/४–ग२–भवत्प्राणादि × × (?) ; ट————धारणी(?) ; क– × × × ×।

३६/१–न३, ५, ६, ७, ग४, ५–एष(:)————; ग६–एव————; ग३–विषप्राण——(?); क–××××। ३६/२–न४–स स्यान्मृत्यूपघातकः(?); क– × × × ×। ३६/३–न१, ५–कंचित्प्राण————; ग६–कश्चित्प्राण———; न८–किं च————; ग२————जयोपायः ; न४————जयोपायः; क– × × × ×। ३६/४–ग२––स्तव——— ; न४————सत्वं(?)———; क– × × × ×।

३७/१–ग२–बाह्याद्वायुं———; न४–बाह्यं प्राणं———; ग३–बाह्यप्राणं————; न८––बाह्यप्राणान्समाकृष्य ; क– × × × ×। ३७/२–ग६–पूरयित्वोदरे स्थितः; क– × × × ×। ३७/३–क– × × × ×। ३७/४–न३–पादागुष्टेषु(?)————; क– × × × ×।

३८/१–ग३————मनसा साव्य(?); ग४–धारयन्मनसा——; क– × × × ×। ३८/२–न६, ७, ग५————वा सदा ; न५————वै सदा; न४, ग३———— वा तदा; क– × × × ×। ३८/३–४–न६–सर्वरोगविनाशः स्यान्नाभिमध्ये च धारणात्; न४–तदेव लिखितमासीत्तथापि पीतरंगेन विलोपितं दृश्यते तस्य स्थाने च न किंचिदन्यत्प्रतिनिधापितम् । ३८/३–ग२–सर्वदोषविनिर्मुक्तो ; क–× × × ×। ३८/४–ग४–जीवेद्दीर्घं————; न८–जीवे + र्ष गतश्रमः (?); क–× × × ×।

*नासाग्रे धारणं गार्गि वायोर्विजयकारणम् ।
सर्वरोगविनाशः स्यान्नाभिमध्ये च धारणात् ॥३९॥

शरीरं लघुतां याति पादाङ्गुष्ठे च धारणात् ।
रसनावायुमाकृष्य यः पिबेत्सततं नरः ॥४०॥

श्रमदाहौ न तस्यास्तां नश्यन्ति व्याधयस्तथा ।
सन्ध्ययोर्ब्राह्मिकाले वा वायुमाकृष्य यः पिबेत् ॥४१॥

त्रिमासात्तस्य कल्याणि जायते वाक्सरस्वती ।
षण्मासाभ्यासयोगेन महारोगैः प्रमुच्यते ॥४२॥

आत्मन्यात्मानमारोप्य कुण्डल्यां यस्तु धारयेत् ।
क्षयरोगादयस्तस्य नश्यन्तीत्यपरे विदुः ॥४३॥

---

*अत्र "न३" लेखे विशेषः श्लोकः—इडया वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् (?—यन्) । यः पिबेदमृतं शुद्धं व्याधिभिर्मुच्यते नरः ॥

३९/१—ग४, ५—नासाग्रधारणं————; क— × × × ×। ३९/२—क— × × × ×। ३९/३-४—न४—एषा पंक्तिर्लिखित्वा पीतरंगेनाच्छादिता दृश्यते । ३९/३—क— × × × ×। ३९/४—न३, ६, ग४, ६——————तु धारणात्; क— × × × ×।

४०/१—न२, ग१—शरीरलघुतां————; ग३—शरीरलघुतां———; क— × × × × । ४०/२—क— × × × × । ४०/३—न५, ग३, त—रसनां वायु————; ग२—रसज्ञया समारोप्य ; न४—रसज्ञां तालुमारोप्य ; ग५, न८—रसनाद्वायुमाकृष्य ; न ७—अपः शरीरमारोप्य ; क— × × × ×। ४०/४—क— × × × × ।

४१/१—ग६, क——————च न स्यातां ; ग४————————न तस्यास्य(?) ; न८—श्रमदाहो न तस्यास्य(?) ; न४—श्रमदाहो न तस्यास्ति ; न१—श्रमदाहौ न तस्य स्तां ; ग१, ५, न४—————न तस्य स्तो ; न७—श्रमो दाहो—————; न३— × × × ×। ४१/२—न५—नश्येति(?)——————; न३— × × × ×। ४१/३—न१,४, ६——————ब्रह्मकाले वा ; ग६, क——————ब्राम्हणः काले ; न८————————बाह्यकाले च ; न३— × × × ×। ४१/४—ग४—वायुमाकृष्य यः पिबेत्सततं नरः(?) ।

४२/१—न४, ग३——————तस्य कल्याणं। ४२/४—न२, ३, ६, ७. ग१, ३, त, क—महारोगात्——————।

४३/१—न४—आत्मानं स्थान————(?) ; ग४—आत्मन्यमुं समारोप्य। ४३/२—त, न३—कुण्डलिन्यां तु————— ; न४, ग३, ५, ६—कुण्डल्या——————। ४३/४—ग२——————जगुः ; न८, क—नश्यन्तीत्यब्रुवन्विदः ।

जिह्वया वायुमानीय जिह्वामूले निरोधयन् ।
यः पिबेदमृतं विद्वान्सकलं भद्रमश्नुते ॥४४॥

आत्मन्यात्मानमिडया समानीय भ्रुवोन्तरे ।
पिबेद्यस्त्रिदशाहारं व्याधिभिः स विमुच्यते ॥४५॥

*नाडीभ्यां वायुमारोप्य नाभौ वा तुन्दपार्श्वयोः ।
घटिकैकां वहेद्यस्तु व्याधिभिः सोऽभिमुच्यते ॥४६॥

मासमेकं त्रिसन्ध्यायां जिह्वयारोप्य मारुतम् ।
†पिबेद्यस्त्रिदशाहारं धारयेत्तुन्दमध्यमे ॥४७॥

४४/१–न२, ५, ७, ग३–जिह्वायां————; ग१– × × × × । ४४/२–अत्र स्वीकृतः पाठो 'ग४' लेख एव विद्यते, सर्वेष्वन्येषु लेखेषु सर्वेषु मुद्रितपुस्तकेषु तु————निरोधयेत्–इति पाठस्तथापि ग्रन्थसन्दभ स न समीचीन इति न स्वीकृतः। ग१– × × × × । ४४/३–ग२–स पीत्वामृतं————; ग४–पिबेत्तदमृतं————; ग१– × × × × । ४४/४–न३–त्रिकालं————; ग१– × × × × ।

४५/१–ग२–समीरमिडयापूर्य ; ग१– × × × × । ४५/२–न१, २, ४, ५, त–समानीयांतरे भ्रुवोः ; न३–समानीय भ्रुवोन्तरात् ; ग३–समानीयांतरे भ्रुवौ(?) ; न८–सहानीय भ्रुवोंतरे(?) ; ग५, ६–धारयित्वा भ्रुवोन्तरे ; ग२–संस्थाप्य भ्रूयुगान्तरे ; ग१– × × × × । ४५/३–न६————यस्त्रिदशाहारो(?) ; न३–यःपिबेदमृताहारं । ४५/४–न१, २, ३, ग१, त–————सोऽपिमुच्यते; न४————सोऽभिमुच्यते ; न८, क–व्याधिभिः सुविमुच्यते ; न६–व्याधिस्थोऽपि विमुच्यते ; न५–विधिः(?)सोऽपि———— ।

*४६–४७ श्लोकान्तर्गतानां पंक्तीनामस्तित्वं पौर्वापर्यं च न निश्चयपूर्वकं निर्णेतुं शक्यते । तद्विषये लेखा द्विधा विभज्यन्ते । ४६/१–४ श्लोकः "न१, २, ५, ७, ग१, त" लेखेषु समूलो नास्ति, तस्य स्थाने च "न१,२,५, ७, ग१ लेखेषु ४७/१–२ अस्ति, तेभ्यश्च "न१, २, ग१" लेखेषु च तदनन्तरं "धारयेद्वत्सराधं वा तदर्धं वा प्रभंजनम्" इत्यधिका पंक्तिर्विद्यते ; "न३" लेखे तत्र प्रथमा पंक्तिर्नास्त्येव तथापि सा स्वस्थाने विद्यते तदनन्तरं च द्वितीयाऽप्यस्ति, "न४, ६, ग२, ३, ४, ५, ६, क" एतस्मिल्लेखगुच्छे च सा कुत्रापि नास्त्येव ; "न८" लेखे ४६/१–४ ; ४७/१–४ सन्ति तेनैव क्रमेण तदनन्तरं च "एडन्यस्तुन्दमध्ये वा (?) नाभौ वा पार्श्वयोस्तु वा" इत्यधिका पंक्तिस्तदनन्तरं च "धारयेद्वत्सरार्धं वा————————इत्यप्यस्ति । ४६/१–ग२————वायुमाकृष्य ; न८————वायुमापूर्य ; न१, २, ५, ७, ग१, त– × × × × । ४६/२–ग६————तुन्दस्य पार्श्वयोः ; न१, २, ५, ७, ग१, त– × × × × । ४६/३–न३–प्रपिबेंदों वदेद्यस्तु(?) ; न१, २, ५, ७, ग१, त–× × × × । ४६/४–ग३, ४, ५, ६, न८————स विमुच्यते ; न३————सोऽपि मुच्यते ; न१, २, ५, ७, ग१, त– × × × × ।

४७/१–ग२————तु त्रिसन्ध्यासु ; त– × × × × । ४७/२–त– × × × × ।
* न१, २, ३, ग१, २–अत्राधिका पंक्तिः–धारयेद्वत्सरार्धं वा तदर्धं वा प्रभंजनम् । ४७/३–न३–पिबेद्यस्तुंडमध्ये वा(?) ; न४, क– × × × × । ४७/४– न६–धारयंस्तुंदमध्यमे ;ग३–धारयेद्गुदमध्यमे ; न३–नाभौ वा पार्श्वयोस्तु वा ; न४, क– × × × × ।

गुल्माष्ठीला प्लीहा चान्ये त्रिदोषजनितास्तथा ।
तुन्दमध्यगता रोगाः सर्वे नश्यन्ति तस्य वै ।।४८।।

ज्वराः सर्वे विनश्यन्ति विषाणि विविधानि च ।
बहुनोक्तेन किं गार्गि पलितादि च नश्यति ।।४९।।

४८/१–अस्य चरणस्य पाठो यथोपरि स्वीकृतस्तथा न कस्मिन्नपि लेखे न वा मुद्रितपुस्तके विद्यते । मुद्रितपुस्तकेभ्यो त्रिवेन्द्रम्मुद्रिते "गुल्माषी वा प्लीहा चान्याः" इति यः स्वीकृतः पाठस्तत्र "गुल्माषी" इति शब्दोऽर्थहीन इव दृश्यते ; कोशे "अषी" "आषी" वा इति न कोऽपि शब्दो विद्यते, "अन्याः" शब्दे च व्याकरणदोषो दृश्यते। मुरादाबाद–कलिकातामुद्रितयोः "गुल्मप्लीहोदरं चान्ये" इति यः पाठः" सोऽपि दोषयुक्तः; "गुल्मप्लीहोदरं "इत्यत्र "उदरं" न कस्यापि रोगस्य नाम, समासान्ते नपुंसकलिंगस्यैकवचनप्रत्ययश्च न युक्तो ग्रन्थसन्दर्भे । मोहमय्यां मुद्रितपुस्तके "गुल्फप्लीहोदराश्चान्ये" इति यः पाठः सोऽपि न युक्तः, 'गुल्फम्' इत्यवयवस्य, न कस्यापि रोगस्य नाम ; 'उदरम्' इत्यपि न रोगस्य नाम । नडीआदपुस्तके 'गुल्मप्लीहोदराश्चान्ये' इति यस्तत्रापि समासान्ते "उदरम्" शब्दोऽस्त्येव। षोडश हस्तलेखेषु पंक्त्याः प्रथमषडक्षराणां १२ भिन्नभिन्न पाठाः; अन्त्याक्षरद्वयस्य च १० भिन्नभिन्न पाठाः दृश्यन्ते । तेषां समन्वये कृते सति किंचित्संशोधनेन च पंच पाठा आप्यन्ते, तेः–"ग१, ३, ४, ५, ६, न६, ८, त, क–गुल्माष्टीला प्लीहा ; न१, २, ५, ७–गुल्ममाला प्लीहा ; न३–गुल्मप्लीहा जरा ; न४–गुल्मादिनि लोम्नि वा ; ग२–गुल्फे निष्टावति, इति । तेभ्यः प्रथमः "ष्ट" स्थान "ष्ठ" निवेशनाद्यो लब्धः स स्वीकृतोऽत्र । अन्त्याक्षरद्वयस्यापि तथैव समन्वये कृते सति १० पाठा अवशिष्यन्ते, तेः–ग६–जन्यः; ग५–जान्य ; न१–वान्य ; ग३–वान्ये ; न७–वान्या ; न२ ५ वान्यान् ; ग१, त–चान्याः ; न३, ४, ८, ग४, क–चान्ये ; ग२–च यत् ; न६–हा वांता इति। तेभ्यः श्लोकस्य द्वितीयायां पंक्त्यां "रोगाः" शब्दो वर्तते इति स पाठो ग्रणार्हो भवति येन प्रथम चरणस्य द्वितीयेन सम्बन्धो युज्येत । तस्मात् "चान्ये" किं वा "वान्ये" पाठः समीचीनो भवति । तत्र "गुल्मः–" पंचप्रकारो रोगविशेषः ; "पंच गुल्मा इति वातपित्तकफसन्निपातशोणितजाः पंच प्लीहदोषाः इति गुल्मैर्व्याख्याताः" इति चरकसंहितायां १.१९.४ सूत्रे कथितत्वात् । "अष्ठीला", अपि द्विप्रकारो रोगविशेषः, "उत्तरापथे दीर्घवर्तुलयाषाणविशेष इत्येके, चर्मकाराणां वर्तुलदीर्घा लौही भाण्डिरित्यपरे (डल्हणं)" इति सुश्रुतसंहितायां निदानस्थाने १.८७-८८ श्लोकयोरुपरि टीकाकारस्य वक्तव्ये। तस्याः प्रकारौ "वाताष्ठीला" (१.८७,) प्रत्यष्ठीला" (१.८८) चेति वर्णितौ सुश्रुतेन। "प्लीहा" शब्दस्यार्थो प्लीहाविवर्धनं नाम रोग इत्यपि भवतीति शब्दकोशेभ्यः प्रतीयते। एवं गुल्म, अष्ठीला, प्लीहा, रोगाः, अन्ये च त्रिदोषजनितास्तुन्दरोगाः अधस्तात्कथितेन प्राणनिरोधनाभ्यासेन नश्यन्तीत्यर्थफलदायको प्रथमचरणस्य पाठः "गुल्माष्ठीला प्लीहा चान्ये" इति संगृहीतोऽस्मिन्ग्रन्थे । "जन्याः" इति पाठो न कुत्रापि विद्यते। यद्यपि सोऽपि समीचीनो भवेन्, यदि "गुल्म", "अष्ठीला", "प्लीहा" शब्दाः शरीरावयववाचका भवेयुः। तेभ्यः "गुल्म", "प्लीहा" च शब्दौ तद्वाचकौ स्तस्तथापि तौ पर्यायशब्दौ भवतस्तेन पुनरुक्तिदोष आगच्छति । तस्मात् "ग६" लेखान्तर्गतः "जन्यः" इति पाठो "जन्याः" इति बहुवचनप्रत्ययान्वितस्य मूलशब्दस्य विकृतिरिति मत्त्वा न संगृहीत : ।।

४८/२–ग३–तुन्दमध्यगतो रोगो(?) ग४–तुन्दमध्ये महारोगाः । ४८/४–न१, २, ५, ७–सर्वे नश्यन्ति किल्बिषाः; ग२————————तत्क्षणात् ।

४९/१–ग५–रुजः————————; ग२–ज्वरानल्पा(?)—————— ; ग४————सर्वेऽपि नश्यन्ति । ४९/३–ग४–किमत्र बहुनोक्तेन । ४९/४–न१, २, ग१, २, त, न८, क–पलितानि च(?)——————; न३, ४————विनश्यति ; ग५–पलितं च विनश्यति ; न५, ७ ग६–नश्यंति पलितानि च ; ग५–किं गार्गि फलितेन च ।

एवं वायुजयोपायः प्राणस्य तु वरानने ।

शक्यमासनमास्थाय समाहितमनास्तथा ॥५०॥

करणानि वशीकृत्य विषयेभ्यो बलात्सुधीः ।
अपानमूर्ध्वमाकृष्य प्रणवेन समाहितः ॥५१॥

*हस्ताभ्यां बन्धयेत्सम्यक्कर्णादि करणानि च ।
अङ्गुष्टाभ्यामुभे श्रोत्रे तर्जनीभ्यां च चक्षुषी ॥५२॥

नासापुटौ मध्यमाभ्यां प्रच्छाद्य करणानि वै ।
आनन्दानुभवं यावत्तावन्मूर्द्धनि धारयेत् ॥५३॥

५०/१–न४, ग५, ६–एष वायोर्जयोपायः ; ग२–एवं वायुजयो यस्य(?) ; ग४–ध्रुवं वायोर्जयोपायः । ५०/२–ग६, क–प्राणस्य च————————; न५, ७–प्राणस्य तु समाहितः ; ग२–प्राणस्तस्य समाहितः । ५०/३–ग२–दिव्यमासन————————; न६–स्वस्तिकासन————————; न३–शक्यते मास(?)————; ग३– × × × × । ५०/४–न५, ७————————मनस्तथा ; ग५, ६, क————————मनाःसती ; न४————————मनास्तदा ; ग४————————मनाः सदा ; ग३– × × × × ।

५१/१–ग३– ×××× । ५१/२–ग४————————बलात्सुखी; ग२———————— क्रमात्सुधीः; ग३–×××× । ५१/३–त–अपानमूर्ध्निमाकृष्य(?) ; न३–अपानमूर्द्धा————————; ग४————————मूर्ध्नि————————; ग३– × × × × । ५१/४–ग२–प्रणवे सुसमाहितः ; ग–६–प्राणं तत्रैव धारयेत् ; ग५–वायुमार्गविधानकम् ; क–वायुमार्गवितातकृत्(?) ; ग३– × × × × । *अत्र केषु लेखेष्वधिका पंक्तिः । सा च—न६, ग५, ६, त–वन्हिस्थाने निरुद्धयैनं प्राणं तत्रैव धारयेत् ; 'क, न८' लेखयोः सा विद्यत एव, तदुपरि च तस्याः पाठान्तरं–"बस्तिस्थाने निरुद्धचैनं प्राणं तत्र निरोधयेत्" इत्यपि दृश्यते ; : ।

५२/१–न३————————धारयेत्सम्यक् ; ग३– × × × × । ५२/२–न१, ४, ५, ग२–शब्दादि————————; ग३– × × × × । ५२/३–न५————————मुभौ श्रोत्रौ(?) न६, ८————————मुखे(?)श्रोत्रे ; ग४————————तथा श्रोत्रे । ५२/४–न३–तर्जनीभ्यां तु———————— ।

५३/१–न१, २, ३, ७, ग२,–नासापुटे————————; ग४, न८–नासापुटं————————; ग१—————————वथान्याभ्यां ; त, ग२————————च मध्याभ्यां ; न६————————वधानाभ्यां(?); न३————————तथा नाभ्यां । ५३/२–न८————————करणानि च ; न३————————करणाद्य वै(?) । ५३/३–ग१, ३, ४, ६, न८–आनन्दाविर्भवं————————; न१, २–आनन्दाप्तिर्भवेद्यावत्; त–आनन्दादि भवेद्यावत्; ग२–आनन्दाद्युद्भवो————————; न३–आनन्दाविर्भवो————————; न५–आनन्दानुभवेद्यावत् ; न६–अनादादिर्भवं(?)———————— । ५३/४–ग६–तावन्मूर्धनि रोधयेत् ; ग४–तावन्मूर्धनि चानयेत् ।

प्राणः प्रयात्यनेनैव ततस्त्वायुर्विघातकृत् ।
ब्रह्मरन्ध्रे सुषुम्णायां मृणालान्तरसूत्रवत् ॥५४॥

नादोत्पत्तिस्त्वनेनैव शुद्धस्फटिकसन्निभा ।
आमूर्ध्नो वर्तते नादो वीणादण्डवदुत्थितः ॥५५॥

शंखध्वनिनिभस्त्वादौ मध्ये मेघध्वनिर्यथा ।
व्योमरन्ध्रे गते नादे गिरिप्रस्रवणं यथा ॥५६॥

व्योमरन्ध्रे गते वायौ चित्ते चात्मनि संस्थिते ।
तदानन्दी भवेद्देही वायुस्तेन जितो भवेत् ॥५७॥

योगिनस्त्वपरे ह्यत्र वदन्ति समचेतसः ।
प्राणायामपराः पूता रेचपूरणवर्जिताः ॥५८॥

५४/१–ग३–प्राणं(?)————; न५–प्राण(:)———— । ५४/२–न१, २, ५, ग६–ततश्चायुर्विघातकृत् ; न३–तत आयु————; न६–ततस्यायु(?)————; न८–ततश्चायुर्विघातकः । ५४/४–न४, ग३–मृणालस्यांतसूत्रवत् ।

५५/१–"नालोत्पत्तिस्त्वनेनैव" इति पाठः, "त, ग२, ६," लेखेषु, शिष्टेषु सर्वेषु तु "नादोत्पत्ति————" इति; मुद्रितपुस्तकेभ्यो त्रिवेन्द्रम्पुस्तक एव प्रथमः, चतुःस्वीतरेषु च द्वितीयः। तयोः को मूल आसीदिति निर्णेतुं न शक्यते यतो यद्यपि द्वितीयायां पंक्त्यां ५६ तमे श्लोके च नादस्यैव वर्णनं विद्यते तथापि नादोत्पत्तिः "शुद्धस्फटिकसन्निभा" कथं भवेदिति न कल्पनाक्षमम् । द्वितीय चरणे ये पाठभेदास्तेऽपि न तत्करणे सहायभूताः । ५५/२–ग२————सन्निभम् ; न१, २, ४, ५, ६, ८, ग१, ३, ४, ६, क————सन्निभः । ५५/३–न१–आमूर्घ्नो(?)————; ग५–आमूर्घ्नि————; ग३–आमूर्धा————; ग२–आमूलो वर्धते नाड्या(?) ; ग४–आमूर्ध्नो वर्तते धीरो ; न२————वर्धते———— । ५५/४–ग२————दुत्थितम् ; ग६, क————समुत्थितः ; न८————समुद्भवः ; न६–वीणानादवदुत्थितः ; न४, ग३– × × × × ।

५६/१–न३————निभवन्नादो (?) ; न२————निभस्तादौ; ग६————निभश्चादौ ; न४, ग३– × × × × । ५६/२–न४– × × × × –स्तथा ; ग५, ६————भेरिध्वनिर्यथा ; ग३–मध्ये × × × । ५६/३–न१, २, ग३, ६–व्योमरन्ध्रगतो नादो ; न४–व्योमरन्ध्रगता नादो(?) ; न३, ग५– × × × × । ५६/४–न२–गिरिप्रस्रवणे————; न४,–गिरिप्रस्रवणस्तथा(?) ; ग६–गिरिप्रस्रवणो यथा ; न३, ग५– × × × × ; त–चित्ते चात्मनि संस्थिते ।

५७/१–त————नादे ; क–ब्रम्हरन्ध्रे गते———— । ५७/२–त–गिरिप्रस्रवणं यथा । ५७/३–न२, ७–तदानन्दी भवेद्योगी ; न४–तदानन्दो भवेद्योगी ; त–सदानन्दी भवेद्देही ; न३–तेनानन्दी————; न५–तदानन्दोद्भवो देही(?) ; न६————द्देवि; ग३–तदानादी भवेद्योगी ; ग४, न८–तदा नादो भवेद्देहे ; ग६–ततो नन्दी(?)भवेद्देही ; ५७/४–क–"एकं तालपत्रं गलितम्" इत्यत्र लेखकस्य टिप्पणी ।

५८/१–ग१, ४, ५, ६, न७————ऽन्यत्र ; ग२–योगिनस्त्वचले————; क– × × × × । ५८/२–क– × × × × । ५८/३————भूताः; न३————परोद्भूता ; न६————रताः पूर्वे ; क– × × × × । ५८/४–न३, ४, ८, ग३, ५, ६–रेचपूरक——; न६–रेचपूरविवर्जिताः(?) ; क– × × × × ।

दक्षिणेतरगुल्फेन सीवनीं पीडयेत्शिराम् ।
अधस्तादण्डयोः सूक्ष्मां सव्योपरि च दक्षिणम् ॥५९॥

जंघोर्वोरन्तरं गार्गि निश्छिद्रं बन्धयेद्दृढम् ।
समग्रीवशिरस्कन्धः समपृष्ठः समोदरः ॥६०॥

नेत्राभ्यां दक्षिणं गुल्फं लोकयन्नुपरिस्थितम् ।
धारयन्मनसा सार्धं व्याहरन्प्रणवाक्षरम् ॥६१॥

आसने नान्यधीरास्ते द्विजो रहसि नित्यशः ।
क्षत्रियश्च वरारोहे व्याहरन्प्रणवाक्षरम् ॥६२॥

आसने नान्यधीरास्ते रहस्येव जितेन्द्रियः ।
वैश्याः शूद्राः स्त्रियश्चान्ये योगाभ्यासरताः नराः ॥६३॥

५९/१–न३–दक्षिणोत्तरगुल्फेन ; क– × × × ×। ५९/२–त, न२, ४, ५, ७, ८– ————स्थिराम् ; न३–शीवनीं पीडये स्थिता(?) ; न६, ग४–पीडयेत्सीवनीं सिराम् ; ग१ सीवनीं पूरयेत्शिराम् ; ग२–सीवनीं पीडच सुंचिराम्(?) ; क– × × × ×। ५९/३–न१– अधस्तादण्डवत्सूक्ष्मां; न५, ६————सूक्ष्मं(?) ; न३–अधस्तान्निक्षिपेत्तद्वत्; क–× × × ×। ५९/४–न३, ७, ग५, ६————दक्षिणम् ; न२————दक्षिणे; क– × × × ×।

६०/१–न१, २, ५, ७, ग३, ५, ६–जंघोर्वोरन्तरे————; न६–जंघयोरन्तरे————; ग२– ग२–जंघेदारन्तरं(?)————; क– × × × ×। ६०/२–ग६–अछिद्रं————; ग३– निश्चिनुं बन्धयोर्दृढाम्(?)————; क– × × × ×। ६०/३–ग५, ६– × × शिरः कायः; न६, ग४————शिरस्कश्च । ६०/४–क– × × × × ।

६१/१–न१, २, ५, ७————दक्षिणे गुल्फे ; क– × × × ×। ६१/२–न१, २, ५, ७–लोकयन्नुपरि स्थितः(?) ; ग२–लोकयन्नुदरस्थिरम् ; ग३–लोकयाम परिस्थितम्(?) ; क– × × × ×। ६१/३–ग१, २, न६–भारत्या————; ग३–धारया मनसा(?)————; ग५–व्याहृत्य————; ग६–व्याहृत्या————; ग४————सिद्धं(?) ; न३, क– × × × ×। ६१/४–न३, क– × × × ×।

६२/१–न३, ६, ७, ८, ग३, ५, ६————नन्यधीरास्ते ; ग२–आसीतानन्यधीर्नित्यं ; क– × × × × । ६२/२–न३, ७–रहस्येव जितेन्द्रियः ; न६, ग३, ५–रहस्ये विजितेन्द्रियः ; ग६–रहस्ये विजितेन्द्रियाः(?) ; न१, २, ५, त–दीपं हस्ते विलोकयन् ; क– × × × ×। ६२/३–४–ग३, क– × × × × × × × × ।

६३/१–ग२–आसीतानन्यधीर्नित्यं ; ग३, ५, ६, क– × × × ×। ६३/२–न१, ५, ६–रहस्ये विजितेन्द्रियः ; न२, ३–दीपं हस्ते विलोकयन् ; ग२–द्विजो रहसि नित्यशः(?) ; ग३, ५, ६, क– × × × × । ६३/३–न२, क– × × × × । ६३/४–न३, ४, ६, ग३– ————रताः सदा ; न२, क– × × × ×।

शैवं वा वैष्णवं वाथ व्याहरन्नन्यमेव वा ।
आसने नान्यधीरास्ते दीपं हस्ते विलोकयन् ॥६४॥

आयुर्विघातकृत्प्राणस्त्वनेनाग्निकुलं गतः ।
धूमध्वजजयं यावन्नान्यधीरेवमभ्यसेत् ॥६५॥

धारणं कुर्वतस्तस्य शक्तिः स्यादिष्टभोजने।
देहश्च लघुतां याति जठराग्निश्च वर्धते ॥६६॥

दृष्टचिह्नस्ततस्तस्मान्मनसारोप्य मारुतम् ।
मन्त्रमुच्चारयन्दीर्घं नाभिमध्ये निरोधयेत् ॥६७॥

६४/१–न१, ४, ग३————————वापि ; न८————————वाथ ; ग२————————वान्यं ; न————————मन्त्रं ; न३–रौद्रं वा वैष्णवं वापि ; न२, क– × × × × । ६४/२–ग२–व्याहरन्मन्त्रमेव वा ; न४, ५, ७–व्याहरंतोऽन्यमेव वा ; ग५, ६–व्याहरन्नित्यमेव वा ; न८–मन्त्रं वाराहमेव वा ; न२, क– × × × ×। ६४/३–न३, ५, ६, ग३——————————नन्यधी ————; न४————————नन्यधीतयो(?) ; ग२–आधितः सुधियः कृत्या(?); क– × × × ×। ६४/४–ग२–हस्ते दीपं————————; न३–दीपमग्नावलोकयन्; न६–दीपं हस्तेऽवलोकयन्; न४–दीपहस्ते इर्च सुताः(?); क– × × × × । कलिकातामुद्रितपुस्तके 'दीपं हस्ते विलोकयेत्'।

६५/१–ग५, ६–आयुर्विघातकः————; ग२–आयुविपूतकृत्प्राणः(?); न४–आयुविधा+कृत्प्राणः; ग३–आयं विद्यूतकृत्प्राणः (?); क– × × × ×। ६५/२–ग२————कुलं चतः न३————————कुलं तपः(?) ; ग२–गच्छेद्गार्गि कुलं गतः(?ततः) ; क– × × × × । ६५/३–न२, ३, ६, ७, ग६–धूमध्वजजयो————; न१–धूमध्वनिर्जया————(?); न५–धूमध्वनिजयो————; क– × × × ×। ६५/४–तावद्धीरेव-(?)मभ्यसेत्; क– × × × ×।

६६/१–न३–धारणं कुकुतो रोप्य(?) ; ग२, क– × × × × । ६६/२–एतच्चरणं किंचित्संशयास्पदम् । तस्य हस्तलेखेषु पाठभेदाः–(?)न२, ५, ७, त–यथा ग्रन्थे स्वीकृतः; (२) न१, ग१–शक्तिस्थाने प्रभंजनम्; (३) न४–शक्ति——प्रभंजनः; (४) ग४–शक्ति——शिखिभ्रमम्; (५) न३, ८, ग५, ६–वह्निस्थाने प्रभंजनम्; (६) न६, ग३–वह्नि————प्रभंजनः; ग२, क– × × × × । मुद्रितपुस्तकेभ्यश्च नडीआदे, मुरादाबादे, कलिकातायां च मुद्रितेषु "वह्निस्थानं प्रभंजनम्" इति पाठो, यो न कस्मिन्नपि लेखे दृष्यते; मुंबापुर्यां च मुद्रिते "वह्निस्थाने प्रभंजनः" इति पाठो यः स "न६, ग३" लेखयोर्विद्यते; तथापि स न समीचीन इति मन्ये पूर्वापरसम्बन्धाभावात्। ग्रन्थे स्वीकृतः पाठस्तु सन्दर्भे युक्त इति मे मतिर्यतस्तेन द्वितीयचरणेनोक्तरीत्या प्राणधारणेन प्राणजयस्यैकस्य चिह्नस्य कथनं भवति, यथा द्वितीयतृतीययोः ३–४ चरणाभ्याम् । ६६/३–न१–देहस्तु————————; ग२, क– × × × ×। ६६/४–न२, ५–जठराग्नेश्च दीपनम्; ग४, ५, ६–जाठराग्निश्च वर्धते; न३–जठराग्निर्विवर्धितः(?); त–जाठराग्नेश्च दीपनम्; ग२, क– × × × × ।

६७/१–एतच्चरणं द्विधा विभज्य साम्यवैषम्ये निर्णितव्ये । तत्र प्रथमो विभागः "दृष्टचिह्न–" । तस्य ये पंच भेदा दृष्यन्ते तेः–न१, ३, ४, ६, ८, ग१, ४, ५, ६, त–दृष्टचिन्हः– ; न२, ५–दृष्टचिह्नं; ग३–दृष्टिचिह्नं; न६–दृष्टवा चिह्नं; न७–दृष्टचिह्ने । द्वितीयो विभागः "ततस्तस्मात्" । तस्य त्रयः पाठभेदा दृष्यन्ते, ते :–न३, ४, ६, ८, ग३, ४, ५, ६–ततस्तस्मात्; न१, ७–ततस्तस्मिन्; न२, ५, ग१,

यावन्मनो लयत्यस्मिन्नाभौ सवितृमण्डले ।
तावत्समभ्यसेद्विद्वान्नियतो नियतासनः ॥६८॥

एतेन नाभिमध्यस्थधारणेनैव मारुतः ।
कुण्डलीं याति वह्निश्च दहत्यत्र न संशयः ॥६९॥

सन्तप्ता वह्निना तत्र वायुना चालिता स्वयम् ।
प्रसार्य फणभृद्भोगं प्रबोधं याति सा तदा ॥७०॥

त–ततः स्थानात्; ग२, क–समस्ता पंक्तिरेव नास्ति। मुद्रितपुस्तकेभ्यो "दृष्टचिह्नस्ततः स्थानात्" इति पाठः भ्रिवेन्द्रमपुस्तके, मुम्बापुर्यां, नडीआदे च मुद्रितेषु स्वीकृतो दृष्यते, मुरादाबादे, कलिकातायां च मुद्रितयोः "दृष्टचिह्नस्ततस्तस्मिन्" इति। तत्र "दृष्टचिह्नः" शब्दः सामान्यः, स च १० हस्तलेखेष्वपि विद्यते। "ततस्तस्मिन्", इत्येको, ततः स्थानात्" इति च द्वितीय एतौ पाठौः केषु केषु दृश्येते तथापि ग्रन्थसन्दभ तयोरेकोऽपि न समीचीनः; "ततस्तस्मात्"च न केवलं समीचीनः परं च ८ हस्तलेखेषु विद्यत इति "दृष्टचिह्नस्ततस्तस्मात्" इति चरणं स्वीकरणीयं भवति। ६७/२–ग२, क– × × × ×। ६७/३–ग१, ५, न३, ६————गार्गि; न१, ६, ८, ग४————मुच्चारयेद्गार्गि; ग२, क– × × × ×। ६७/४–ग४————निरोधयन्; ग२, क– × × × ×।

६८/१–न१, २, ३, ५, ७, ८–यावन्मनोलयस्तस्मिन्; ग३–यावन्मनः स्थितस्तस्मिन्(?); न४–यावन्मनो भवेत्तस्मिन्; ग६–यावन्निरोधयेत्तस्मिन्; ग२, क– × × × ×। ६८/२–ग१–नाभौ सावित्रमण्डले; ग२, क– × × × ×। ६८/३–ग२, क– × × × ×। ६८/४–ग१, ४, ५, ६————नियताशनः; ग२, क– × × × ×।

६९/१–न१, २, ५, ७, ग१————नाभिमध्यस्थो; न३————नाभिमध्यस्थं(?) ग३————नाभिमध्यस्तु; ग४————नाभिमध्येन; ग२, क– × × × ×। ६९/२–ग३–वारणे नैव(?)————; न४–धारयेच्चैव मारुतम्; ग२, क– × × × ×। ६९/३–न३–कुंडलीं चाति(?)————; न८–कुंडलीं वाति————; ग५, ६–कुंडलीं वायु————; ग१–कुण्डली यत्र————(?)। ग२, क– × × × ×। ६९/४–ग३–देह्यन्यत्र(?)————; ग२, क– × × × ×।

७०/१–ग१, ४, न३, ४–सन्तप्तो————; न५, ८, ग३–सन्तप्तवह्निना————; न६–सन्तप्ते————; ग५, ६–सर्वतो————; ग२, क– × × × ×। ७०/२–त–————चारिता————; न६, ग४, ५, ६–वायुना च प्रवातितः; ग१————प्रवाहितः; न३, ४————प्रचालितः; ग३————अभिप्रचालितः; न८—तीव्र वातिता; ग२, क– × × × ×। ७०/३–न८–प्रसार्य फणिभृद्भोगं; ग२, क–× × ×। ७०/४–अस्मिश्चरणे पुनः साम्यवैषम्ये भवतस्तेन तं द्विधा विभज्य निश्चयो कर्तव्यः। तस्य द्वौ विभागौः—(१) प्रबोधं याति, (२) सा तदा चेति। तत्सम्बधिनो लेखभेदाः—(१)–न१, २, ३, ५, ७, ८, ग१, ४, ५, ६, त–प्रबोधं याति; तस्य विकृतयस्त्रयः—न४–प्रबाधं याति; न६– प्रबोधयति; ग३–अगाधं याति। (२) न२, ५, ७, त–सा तदा; न१, ४, ग१, ४–तत्तदा; न३, ६, ८, ग३, ५ ६–तत्तथा। ग२, क– × × ×। 'कुण्डली' (६९/३) शब्दस्य स्त्रीलिंगत्वात्तस्य गुणवाचकाः सर्वेऽपि शब्दाः स्त्रीलिंगप्रत्ययान्विता एव भवेयुरिति स्वीकृतपाठस्यौचित्यमवगन्तव्यम्।

प्रबुद्धे संसरत्यस्मिन्नाभिमूले तु चक्रिणि ।
ब्रह्मरन्ध्रे सुषुम्णायां प्रयाति प्राणसंज्ञकः ॥७१॥

सम्प्राप्ते मारुते तस्मिन्सुषुम्णायां वरानने ।
मन्त्रमुच्चार्य मनसा हृन्मध्ये धारयेत्पुनः ॥७२॥

हृदयात्कण्ठकूपे च भ्रुवोर्मध्ये च धारयेत् ।
तस्मादारोप्य मनसा साग्नि प्राणमनन्यधीः ॥७३॥

धारयेद्व्योम्नि विप्रेन्द्रे व्याहरन्प्रणवाक्षरम् ।
वायुना पूरिते व्योम्नि साङ्गोपाङ्गे कलेवरे ॥७४॥

७१/१–न१, २, ५, ७, त————संचरत्यस्मिन् ; न३, ग१, ३, ६————संस्मरत्यस्मिन् ; न४————प्रसृते ह्यस्मिन् ; ग५————च स्फुरत्यस्मिन् ; न६–प्रबुद्धच संस्फुरत्यस्मिन् ; ग४–प्रबुद्धः संस्मरत्यस्मिन् ; ग२, क– × × × ×। ७१/२–न१, २, ५, ७, त–नाभिमूले च————; ग३————च चाश्रणि(?); ग१–आदिमूले च चक्रिणि ; ग२, क– × × × ×। ७१/३–ग२, क– × × × ×। ७१/४–न२————प्राणसंज्ञिकम्(?) ; ग१, न७————प्राणसंज्ञकम्(?) ; ग३————प्राणसंक्रमः ; ग२, क– × × × ×।

७२/१–२–न४–एषा पंक्तिर्विद्यत एव तथापि सा न स्वस्थाने यथात्र, किन्तु ७२/३–४, ७३/१–४ अनन्तरम्। ७२/१–न२, ७, ग२, क– × × × ×; न६–खे प्राप्ते————। ७२/२–न२, ७, ग२, क– × × × ×। ७२/३–ग२, क– × × ×। ७२/४–न३, ग३————सुधीः ; ग४————धारयत्ततः ; न२, ७, ग२, क–× × × ×।

७३/१–ग५, ६–हृदयात्कण्ठमध्ये च ; न३–हृदये कण्ठकूपे(ऽ)थ ; न८–हृदयात्कन्दमुले च; न१, ४, ५, ग२, क–× × × ×। ७३/२–ग५————दक्षिणाम् ; न१, ४, ५, ग२ क– × × × ×। ७३/३–४–ग३–७१ श्लोकस्य पुनरुक्तित एषा पंक्तिर्विद्यत अत्र। ७३/३–न१, ग२, क– × × × ×। ७३/४–न२, ३, ६–साग्निप्राणमनन्यधीः ; ग२, क– × × × ×।

७४/१–अस्मिंश्चरणे पुनस्तं द्विधा विभज्य साम्यवैषम्ये निश्चितव्ये । तौ विभागौः–(१) "धारयेद्व्योम्नि", (२) "विप्रेन्द्रे" । तत्सम्बन्धिनो लेखविभागाश्चः–(१) न२, ५, ६, ७, ८, ग३, ४, ५, ६–धारयेव्योम्नि ; न१, ३, ४, ग१, त–धारयेद्यो हि ; ग२, क– × × × ×। (२) न१, २, ४, ५, ६, ७, ८, ग३, ५, ६, त–विप्रेन्द्रे ; ग१, ४–विप्रेन्द्रो ; न३–विप्रेन्द्र ; ग२, क– × × × ×। ७४/२–ग२, क– × × × ×। ७४/३–न८————पूरयेव्योम्नि (?); न१, ३, ४————पूरितो————; न६————पूरितं————; ग२, क– × × × ×। ७४/४–न१, २, ३, ग१, ४, ५–सांगोपांगकलेवरे; न६–सांगोपांगं कलेबरम्; ग२, क– × × × ×।

तदात्मा राजते तत्र यथा व्योम्नि विकर्तनः ।

शरीरं विसुसृक्षुश्चेदेवं सम्यक् समाचरन् ॥७५॥

एकाक्षरं परं ब्रह्म ध्यायन्प्रणवमीश्वरम् ।
संभिद्य मनसा मूर्ध्नि ब्रम्हरन्ध्रं सवायुना ॥७६॥

प्राणमुन्मोचयेत्पश्चान्महाप्राणे खमध्यमे ।
देहातीते जगत्प्राणे शून्ये नित्ये ध्रुवे पदे ॥७७॥

आकाशे परमानन्दे स्वात्मानं योजयेद्धिया ।
ब्रह्मैवासौ भवेद्गार्गि न पुनर्जन्मभाग्भवेत् ॥७८॥

तस्मात्त्वं च वरारोहे नित्यं कर्म समाचर ।
सन्ध्याकालेषु वा नित्यं प्राणसंयमनं कुरु ॥७९॥

७५/१–न३————रतिते(?)——; ग३–तथात्मा————; न१–तदा तु–————; ग४–तथा विराजते————; न७, त–तदात्मा राजते तस्य; न५–तदा तु——तस्य; ग२, क–× × × ×। ७५/२–न५————विर्वतिनः; न३–तथा————विकर्तनः; ग२, क– × × × ×। ७५/३–ग३–शरीरं मेवशि सूक्ष्मं चेत्(?); ग६–शरीरमपि सूक्ष्मं चेत्; ग२, क– × × × ×। ७५/४–न२, ३, ४, ६, ७, ८, ग४————समाचरेत्; ग५, ६–——समभ्यसेत्; ग३–——सर्म्य(?) समाचरेत्; ग२, क– × × × ×।

७६/१–न१, २, ५————ब्रह्म ध्यायन्; न४, ग३–एकाकारं परं ब्रह्म; ग१, २, क– × × × × । ७६/२–न१, २, ५–प्रणवमीश्वरं सदा; ग१, २, क– × × × × । ७६/३-न८–संभेद्य————; न३–संरुध्य————; ग१–संक्षिप्य(?)————; ग२, क– × × × ×। ७६/४–ग५, ६–ब्रह्मरन्ध्रस्य वायुना; ग४–ब्रह्मरन्ध्रस्व(?) वायुना; न५–ब्रह्मरन्ध्रसचायुना(?); न३–ब्रह्मरन्ध्रसमाधिना; ग२, क– × × × × ।

७७/१–ग३, ६–प्राणानुन्मोचयेत्पश्चात्; न४–प्राणांस्तु मोचयेत्पश्चात्; न६–प्राणं हि मोचयेत्पश्चात्; ग४, न८–प्राणं च मोचयेत्पश्चात्; ग१–प्राणं विमोचयेत्पश्चात्; ग२, क– × × × ×। ७७/२–न१, २, ४, ग३————सुमध्यमे; न३, ५, ७, ग६–महाप्राणेषु मध्यमे; ग१–महाप्राणे च————; ग४–महाप्राणश्च(?)————; न८–महाप्राणौध————; ग२, क– × × × ×। ७७/३–न३–देहातीते ततो योगी; ग३–चेहातीतजगत्प्राणे(?); न६————जयत्प्राणे(?); ग२, क– × × × ×। ७७/४–न३, ४, ७——नित्यध्रुवे————; ग३–शून्ये सत्ये——; ग२, क– × × × × ।

७८/१–न३–आकाशेयोपमानन्दे; ग२, क– × × × ×। ७८/२–न१, २, ४, ५, ७, ग३, त————सुधीः; न६————तदा; ग२, क– × × × × । ७८/३–न३, ग५–ब्रह्मैव स भवेद्गार्गि; न४–ब्रह्मैव संभवेद्गार्गि; ग४–ब्रह्मैवानुभवेद्गार्गि; ग३–ब्रह्मैव संभवेद्योगी; ग२, क– × × × ×। ७८/४–ग२, क– × × × ×।

७९/१–ग३–तस्मात्पंच——; न३, ग२, क– × × × × । ७९/२–ग१, ३, ४–नित्यकर्म——; न६————समाचरेः; न३, ग२, क– × × × ×। ७९/३-४–न३, क– × × × × × × × × ।

प्राणायामपराः सर्वे प्राणायामपरायणाः ।
प्राणायामविशुद्धा ये ते यान्ति परमां गतिम् ॥८०॥

प्राणायामादृते नान्यत्तारकं नरकादपि ।
संसारार्णवमग्नानां तारकः प्राणसंयमः ॥८१॥

तस्मात्त्वं विधिमार्गेण नित्यं कर्म समाचर (न्)।
विधिनोक्तेन मार्गेण प्राणसंयमनं कुरु ॥८२॥

इति श्रीयोगयाज्ञवल्क्ये षष्ठोऽध्यायः ॥

८०/१–क– × × × ×। ८०/२–न४–"ब्रह्मविष्णुशिवादयः"——प्रथमं लिखितं यथा-स्वीकृतं चरणं पिधाय ; क– × × × ×। ८०/३–न४, ६, ग४, ५, ६–प्राणायामैर्विशुद्धा ये ; क– × × × ×। ८०/४–क– × × × ×।

८१/१–२–ग२–प्राणायामातारं + + त्तारं नरकादपि(?) ; न६, क– × × × × × × × ×। ८१/१–न५–प्राणायामादृतं————। ८१/२–न५, ७————नरकादिषु ; न२, त–तारको नरकादिषु(?) । ८१/३–न६, क– × × × ×। ८१/४–ग३–तारकं प्राणसंयमम्(?) ; न६, क– × × × ×।

८२/१–ग४–तस्मात्त्वं च वरारोहे; क– × × × ×। ८२/२–न१, २, ४, ६, ग१ ३–नित्यकर्म————; ग२–नित्यं संयममाचर ; क– × × × ×। ८२/३–न३–विधिनो-, क्तेन मार्ग्रेण(?)म.ग्रोंण ; ग २, ४, क– × × × ×। ८२/४–न३–प्राणसंय(-म-)नं——; ग२ ४, क– × × × ×।

परिशिष्टम्

षष्ठाध्यायस्य ४।२ अनन्तरं + इति संज्ञितायां पादटिप्पण्यामुल्लिखिता अधिकाः श्लोकाः ॥

न८—नासाग्रे दृक् सदा सम्यक् सव्ये न्यस्येतरं करम् ।
नासाग्रे शशभृद्बिम्बे ज्योत्स्नाजालवितानके ॥(१)॥

अम्बोमा(?) सहितं शुभ्रं सोमसूर्याग्निलोचनम् ।
पंचवक्त्रं महादेवं चन्द्रशेखरमीश्वरम् ॥२॥

नन्दिवाहनसंयुक्तं सर्वदेवसमन्वितम् ।
प्रसन्नं सर्ववरदं ध्यायेत्सर्वायुधं शिवम् ॥३॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
अकारमूर्तिरेतेषां रक्तांगी हंसवाहिनी ॥४॥

दण्डहस्ता सती बाला गायत्रीत्यवधार्यताम् ।
अकारमूर्तिरेतेषां कृष्णांगी वृषवाहनी ॥५॥

चक्रहस्ता सती चैव सावित्रीत्यवधार्यताम् ।
मकारमूर्तिरेतेषां श्वेतांगी तार्क्ष्यवाहिनी ॥६॥

शूलानन्दमयी वृद्धा सरस्वत्यवधार्यताम् ।
माहेश्वरीति सा प्राज्ञैः पश्चिमा परिकीर्तिता ॥७॥

सृष्ठिस्थित्यन्तकालाद्या मकारोऽप्यन्तकात्मकः ।
अक्षरत्रयमेवैतत्कारणत्रयमिष्यते ॥८॥

त्रयाणां कारणं ब्रह्म सद्रूपं सर्वकारणम् ।
एकाक्षरं परं ज्योतिस्तमाहुः प्रणवं बुधाः ॥९॥

ग५—एभ्यः १, ४–१० श्लोका अस्मिन्नपि लेखे सन्ति निम्नलिखितैः पाठान्तरैः—

१/१—नासाग्रदृक्————————। १/३;—नासाग्रशशभृद्बिम्ब——। १/४—ज्योत्स्नाजालविता-नितम् । २–३– × × × × । ४/१—यद्वेदादौ——————। ५/३—उकारमूर्तिरेतेषां । ५/४—श्वेतांगी तार्क्ष्यवाहिनी। ६/४—कृष्णांगी बृषवाहिनी। ७/१—त्रिशूलानन्दमयी । ७/३—माहेश्वरीति सा प्राज्ञी । ८/१—सृष्टिस्थितिकृत्वाद्यौ(?) । ८/३—अक्षरत्रयमेतत्तु । ९/१—यात्राणां(?)———————। ९/२—भारूपं——————।

ग६—ये श्लोकाः (१, ४–१०) ग५ लेखे त एवास्मिन्नपि लेखे सन्ति तथापि तस्मिन्कानि विशिष्टानि पाठान्तराणि दृश्यन्ते, तानि:—

एवं ज्ञात्वा विधानेन प्रणवेन समन्वितम् ।
प्राणायामं ततः कुर्याद्रेचपूरककुम्भकैः ॥१०॥

१/१–नासाग्रदृक्————। १/३–नासाग्रशशभृद्बिम्बं । १/४–ज्योत्स्नाजालविता-नितम् । २–३– + + + + । ४/१–यद्वेदादौ————। ५/३–उकारमूर्तिरेतेषां । ५/४–श्वेतांगी तार्क्ष्यवाहिनी । ६/४–कृष्णांगी वृषवाहिनी । ७/१–त्रिशूलं दधती————। ८/१–सृष्ठिस्थित्यात्मकावाद्यौ । ८/२–मकारो त्यन्त–(?)–कारकः । ८/३–अक्षरत्रयमेतत्तु । ९/२–भारूपं————।

विशेषा टिप्पणीः–एभ्यो टिप्पणीभ्यो स्पष्टमेव प्रतीयते यत् "ग५, ६" लेखावेकस्यैव मूललेखस्य प्रति-लेखाविति, "न८" लेखश्च तस्यैव मूललेखस्य तृतीयप्रतिलेखस्य प्रप्रतिलेख इति ।

सप्तमोऽध्यायः ।।

*याज्ञवल्क्य उवाच--

उक्तान्येतानि चत्वारि योगाङ्गानि द्विजोत्तमे ।
प्रत्याहारादि चत्वारि शृणुष्वाभ्यन्तराणि च ।।१।।

इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
बलादाहरणं तेषां प्रत्याहारः स उच्यते ।।२।।

यद्यत्पश्यसि तत्सर्वं पश्येदात्मवदात्मनि ।
प्रत्याहारः स च प्रोक्तो योगविद्भिर्महात्मभिः ।।३।।

कर्माणि यानि नित्यानि विहितानि शरीरिणाम् ।
तेषामात्मन्यनुष्ठानं मनसा यद्वहिर्विना ।।४।।

सप्तमोऽध्यायः ।।

*न४, ५–श्री याज्ञवल्क्य उवाच ; न८–याज्ञवल्क्यः—; न३-श्री भगवान् ।। न६–भगवानुवाच ; ग६–ओम् भगवान्– ; न१, २, ७, ग१, २, ५, त, क—× × × × ।

१/२–न५, ७, ८, ग५, त— ————————वरानने । १/३–न१, २, ३, ५, ६, ८, ग२, ३, ४, ५, ६, त–प्रत्याहाराणि———————— ।

२/१–न३, ६– ——————————हि चरेतां(?)'; ग५– ——————————हि चरतां ; ग३– ——————————विचरतां । २/३–ग२–बलोदाहरणं(?)———————।

३/१–न४–यद्यत्पश्यति—; न३–यच्च पश्यति———————; ग३–यदु + + + + ति——————। ३/२–न१, २, ३, ४, ५, ६, ग१, ४–पश्येदात्मानमात्मनि ; ग२–पश्येदात्मानमात्मना । ३/३–ग६– ——————————स वै———————। ३/४–न६–योगिविद्भिर्महात्मभिः(?) ।

४/१–ग३–कर्मणो निधित्यानि(?) । ४/२–ग३–विदितानि——————————। ४/४–न३–मनसो यद्बहिर्विना ; ग३–मनसा युद्धविर्विना(?) ; ग१–मनसा यत्प्रकल्पितम् ।

प्रत्याहारो भवेत्सोऽपि योगसाधनमुत्तमम् ।
प्रत्याहारः प्रशस्तोऽयं सेवितो योगिभिः सदा ॥५॥

अष्टादशसु यद्वायोर्मर्मस्थानेषु धारणम् ।
स्थानात्स्थानात्समाकृष्य प्रत्याहारो निगद्यते ॥६॥

अश्विनौ च तथा ब्रूतां गार्गि देवभिषग्वरौ ।
†मर्मस्थानानि सिद्धयर्थं शरीरे योगमोक्षयोः ॥७॥

तानि सर्वाणि वक्ष्यामि यथावच्छृणु सुव्रते ।
पादाङ्गुष्टौ च गुल्फौ च जङ्घामध्ये तथैव च ॥८॥

चित्योर्मूलं च जान्वोश्च मध्ये चोरुद्वयस्य च ।
पायुमूलं ततः पश्चाद्देहमध्यं च मेढ्रकम् ॥९॥

५/१-२—न४, ग३— × × × × × × × ×। ५/३—न५, ८, ग१, ५, ६, क—प्रत्याहारे प्रशस्तं तत् ; न१, ४, ७, ग४—प्रत्याहारं प्रशस्तं तत् ; ग२—प्रत्याहारं प्रशस्तं तं ; न४, ग३—प्रत्याहार(?) प्रशस्तं तत् ; न३—प्रत्याहारं प्रशंसन्ति । ५/४—न१, ४, ५, ६, ७, ८, ग१, ३, ५, ६, क—सेवितं—————————; ग२—सेवन्ते योगिनः सदा ; ग४—योगिभिः सेवितं सदा ; न३—स वेत्ति(?सेवितं) योगिभिः सदा ।

६/१—न६—अष्टादशस्तु(?)———— —————। ६/२—न३— ———————धारयेत् ; न७— ————————धारणे(?) । ६/३—त, न४, ग४, ५, ६—स्थानात्स्थानं——————; न३—स्थानस्थानं(?)————————— ।

७/१—ग१— ——————तु यथाऽब्रूतां ; न४— ——————च तदाब्रूतां ; ग२— ————— तत्र तौ ब्रूतां ; न१, २, ५, ७, ८— ————————तथा ख्यातां । ७/३—न६— ———————— सिध्दचर्थे । ७/४—ग४, ५, क— ——————भोगमोक्षयोः ; न८— ——————स्वर्गमोक्षयोः ; ग२— ————————योगभोगयोः । † अत्र "न६" लेखे "मध्यमेऽपि हृदये च——————मनसोरुचिरूपम्" इति श्लोको वर्तते। सो नाधिकः किन्तु द्वादशाध्यायान्तर्गतो २३ तमः श्लोको लेखकस्य भ्रमेनात्र प्रविष्ट इति नासावुद्धृतोऽस्यां टिप्पण्याम् ।

८/२—ग४— ————————सांप्रतम् ; ग५— ————————सादरम् ; ग६— —————— संप्रति । ८/३— ग१, २, त—पादाङ्गुष्टे च। गुल्फे च(?) ८/४—न१, ग५, ६—जङ्घमध्ये———; ग२—जङ्घामध्यं———; न४, ७, ग३—जङ्घामध्यौ(?)———————; ग४—जङ्घामेढ्रौ——————।

९/१-२—अत्र दृश्यमाणानां पाठभेदानां वैशिष्टचाद्द्वावपि चरणावेकत्र विचारणीयौ भवतः। ताभ्यां भूतां समस्तां प्रथमां पंक्तिं च चतुर्धा विभज्य लेखानां साम्यवैषम्ये निर्णेतव्ये। ते च विभागाः—(१) चित्योर्मूले च ; (२) जान्वोश्च ; (३) मध्ये ; (४) चोरूद्वयस्य च। तत्सम्बन्धिनो लेखानां विभागाश्चेदृशाः—(१) ग३, ४ न३—चित्योर्मूले च; न७—स्फिजोर्मूलं च; न२—स्फिचोर्मूलं च ; न८—स्फिग्जोमूर्ते(?)च ; ग५, ६, क—स्फिजोर्मूले च ; न१, ४, ५, ६, ग१, त—चित्योर्मूलं च; ग२—

नाभिश्च हृदयं गार्गि कण्ठकूपस्तथैव च।
तालुमूलं च नासाया मूलं चाक्ष्णोश्च मण्डले ॥१०॥

भ्रुवोर्मध्यं ललाटं च मूर्धा च मुनिसत्तमे ।
मर्मस्थानानि चैतानि मानं तेषां पृथक् शृणु ॥११॥

पादान्मानं तु गुल्फस्य सार्धाङ्गुलचतुष्टयम् ।
गुल्फाज्जङ्घस्य मध्यं तु विज्ञेयं तद्दशाङ्गुलम् ॥१२॥

तयोर्मूलं च; (२) न१, २, ७, ग४, ५, ६, त, क–जान्वोश्च ; ग१, २, ३, न३–जानू च; न६–जानौ च ; न४–जानु(–मध्यं); क–जानोश्च; न८–बाह्वोश्च; (३) न१, २, ५, ७, ८, ग१, २, ४, ५, ६, त, क–मध्ये ; न३, ग३–मध्यात् ; न४, ६–मध्यं ; (४) न३, ४, ६, ८, ग१, २, ३, ४, ५, ६, त, क–चोरूद्वयस्य च ; न१, २, ५, ७–चोरूभयस्य च। ९/३-४–अस्याः पंक्तेरपि तयैव रीत्या लेखानां साम्यवैषम्ये निर्णेतव्ये । तस्याश्चतुर्विभागाः–(१) पायुमूलं ; (२) ततः पश्चात् ; (३) देहमध्यं च ; (४) मेढ्रकम् । तत्सम्बन्धिनो लेखविभागाः––(१)न१, २, ३, ४, ५, ६, ७, ग२, ४, ५, ६, त, क–पायुमूलं ; न८–वायुमूलं ; ग१–पादमूलेः ; ग३– × × ; (२) ग३– × ×; सर्वेष्वन्येषु–ततः पश्चात् : (३) ग२–देहमध्यं च ; न१–मध्यदेहं च ; न२, ५, ७, त–मध्यदेहश्च ; न३, ग१–मध्ये देहं च ; न६, ग६, क–मध्ये देहस्य ; ग५, न८–मध्यं देहस्य ; ग३– × × × ; (४) ग३– × × × ; सर्वेष्वन्येषु–मेढ्रकम् ।

१०/१–ग१–नाभिं च(?)———; ग३–× × × ×। १०/२–न२, ६, ७–कण्ठकूपं———; न ६–कण्ठकूपा(?)———; ग१–कृष्णकूपस्तथैव च(?); ग३–× × × ×। १०/३–त–तालुमूले च———; न८, क–तालवोमूलं च(?)———; न२–तालुमलं(?–मूलं) च नासाग्रं; न७–——————— नासाग्र (-मूलं)(?) ————; न३– ——————च नासा च। १०/४–न६–चाक्षोश्च (?)———; ग५, ६– ———————मण्डलम् ; न३– (नासा च) मूमनक्षणोश्च(?)————।

११/१–ग५, ६–भ्रूमध्यं च————; न७–भ्रुवोर्मध्ये(?)——————। ११/२–इदं चरणं द्विधा विभज्य लेखानां साम्यवैषम्ये निर्णेतव्ये । तस्य विभागौः–(१) मूर्धा च ; (२) मुनिसत्तमे । तत्सम्बन्धिनो लेखविभागाः––(१) त, न३, ४, ६, ७, ८, ग१, २, ३, ४, ५, ६-क–मूर्धा च ; न१–मूर्ध्नश्च(?) ; न२, ५––मूर्धं च(?): (२) न१, ग१–मुनिपुंगवि। ११/३–ग४–ब्रह्मस्थानानि————; न१, ग२ मर्मस्थानानि वै तेषां ; न८– ——————नैतानि(?)। ११/४–न१, त–मानं चाथ—————; ग२–मानं चैषां—————; ग५, ६–मानमेषां—————।

१२/१–इदमपि द्विधा विभज्य पाठभेदा निर्णेतव्याः। तस्य विभागौः–(१) पादान्मानं तु ; (२) गुल्फस्य। तत्सम्बन्धिनो लेखविभागाः– ———(१) ग४, न८–पादान्मानं तु ; न१, ३, ग१–पादात्मानं तु ; न४, ६, ग३–पादमानं तु ; ग५, ६, क–पादमूलं च ; न२, त–पादात्स्थानं तु ; ग२–पादांगुष्टे च ; (२) न२, ३, ४, ५, ६, ७, ८, ग१, ३, ४, ५, ६ त, क–गुल्फस्य ; ग२– गुल्फान्ते; न१– गुल्फाय । १२/२–न३–सार्धांगुलि————। १२/३–न८–गुल्फात्तु————; न४–गुल्फाच्च जंघमानं तु ; ग३–गुल्फाज्जंघस्य मानं तु ; न३–गुल्फजंघस्य मध्ये तु ; न५–गुल्फाज्जंघस्य मध्ये तु ; जंघयोर्गुल्फयोर्मध्यं । १२/४–न१, ३, ४, ५, ६, ७, ग१, ३,–विज्ञेयं तु——।

जङ्घमध्याच्चित्योर्मूलं यत्तदेकादशाङ्गुलम् ।
चित्योर्मूलाद्वरारोहे जानुः स्यादङ्गुलिद्वयम् ॥१३॥

जान्वोर्नवाङ्गुलं प्राहुरूरुमध्यं मुनीश्वराः ।
ऊरुमध्यात्तथा गार्गि पायुमूलं नवाङ्गुलम् ॥१४॥

देहमध्यं तथा पायोर्मूलादर्धाङ्गुलद्वयम् ।
देहमध्यात्तथा मेढ्रं तद्वत्सार्धाङ्गुलद्वयम् ॥१५॥

मेढ्रान्नाभिश्च विज्ञेया गार्गि सार्धदशाङ्गुलम् ।
चतुर्दशाङ्गुलं नाभेर्हृन्मध्यं च वरानने ॥१६॥

१३/१–अस्य चरणस्य द्वौ विभागौ पृथक्चिन्तनीयौ। तौ :—(१) जङ्घामध्यात् ; (२) चित्योर्मूलं। तयोः पाठान्तराणि–(१) ग२, ३, ५, ६, न६, ८—जङ्घामध्यात् ; न३, क– ××। (२) न१, २, ४, ६, ७, ग१, त–चितेर्मूलं ; न५– चितिमूलं ; ग४–च तन्मूलं(?) ; ग३–इति मध्यं(?) ; ग२–तु भित्तिश्च । १३/२–ग२–यत्तदेशे दशांगुलम्(?) न३, क– × × । १३/३–अस्य द्वयोर्विभागयोः पाठभेदाः–(१) चित्योर्मूलात् ; न२, ५, ७–चित्योर्मूलात्; ग१, ३, ४, न३, ४, ६, त—चितिमूलात् ; न१–चित्योर्मूलं ; न८, ग५, ६–स्फिजोर्मूलात् ; ग२–भित्तिमूलात्; (२) वरारोहे–ग१, ३, ४, ५, ६, न३, ४–वरारोहे ; ग२, न६–मुनिश्रेष्ठे ; न१, २, ५, ७–जानुमध्यं; (१-२)–क–×××× । १३/४–तथैवास्य द्वयोर्विभागयोः पाठभेदा :—(१) जानुःस्यात्—ग१, ३, ५, ६ न४, ६, ८, त–जानुःस्यात् ; न३–जानुत्पाद–(?) ; ग४–जानुभ्याम्(?) ; ग२,–जानुन्याम्(?); न१, २, ५, ७–विज्ञेयं : (२) अंगुलिद्वयम्–ग४, ५, ६, न६, ८, त–अंगुलिद्वयम् ; ग२, न३,–अंगुलद्वयम् ; न१, २, ७–द्वितयांगुलम् ; न५–हि तथांगुलम्(?) : (१-२)–क– ×××× ।

१४/१–ग१, न३–जानोर्नवांगुलं———; ग५–जान्वोः स्थानादूरुमध्यं; ग३–भासोर्नवांगुलं (?)———। ग६– ××××। १४/२–ग३– ————मुनीश्वरे ; ग५– नवांगुलमुदाहृतम् ; ग६– × × × ×। १४/३–न१–ऊरुमूलं तथा———; ग३–ऊरुमध्यं तथा ———; ग५–ऊरुमध्यात्पायुमूलं ; ग६– × × × × । १४/४–न३–पायोर्मुलं————; ग३, न८, क–वायुमूलं तथांगुलम्(?) ; ग५–नवांगुलमितं भवेत् ; ग६– ××××।

१५/१–न३–देहमध्यं तता पायो(?) ; ग५– ————ततस्तस्मात् ; न३–देहमध्यस्थितािद्वायो–(?) ; न८– ————वायो–(?)। ; ग१–पायोमूर्लाच्छिश्नमध्यं(?) ग६–××××। १५/२–न२, ३, ४, ५, ७– ———सार्धांगुलद्वयम् ; ग५, न८– —सार्धांगुलिद्वयम् ; ग६–स्यादंगुलिद्वयम् ; न३–देहस्यांगुलिसध्यकम्(?) ; ग६– ×××× । १५/३–ग२– ———— तथा मेढ्रात्(?); न६– ————त्पुनर्मेढ्रं ; ग४– ————त्तनोर्मेढ्रं ; न८–××××। १५/४–ग४–तथा————; ग६– तद्वदर्धांगुलिद्वयम् ; न३–तद्दशार्धांगुलद्वयम्(?) ; न५-तद्वत्सार्धांगुलत्रयम् ; न४–तत्स्यात्सार्धांगुलत्रयम् ; न७–तस्य सार्धांगुलत्रयम् ; न८–××××।

१६/१–न८, ग३, ६– ————विज्ञेयो(?) ; ग२–मेढ्रान्नाभेश्च(?)——; न३, ४–मेढ्रं नाभेश्च विज्ञेयौ(?) । १६/२–न१, २, ५, ७–सार्धं गार्गि————; न६–सार्थं(?) गार्गि———। १६/३—न३–चतुर्दशांगुलां नाभे(?) ; न५–चतुर्दशांगुलो नाभे(?) ; न६–चतुर्दशांगुलं नाभि–(?) । १६/४–न४, ६, ग३– —————द्विजोत्तमे ; ग२–हृन्मध्याच्च वरानने(?) ; न३–हृन्मध्यस्य द्विजोत्तमे ।

षडङ्गुलं तु हृन्मध्यात्कण्ठकूपं तथैव च ।
कण्ठकूपाच्च जिह्वाया मूलं स्याच्चतुरङ्गुलम् ॥१७॥

नासामूलं तु जिह्वाया मूलाच्च चतुरङ्गुलम् ।
नेत्रस्थानं तु तन्मूलादर्धाङ्गुलमितीष्यते ॥१८॥

तस्मादर्धाङ्गुलं विद्धि भ्रुवोरन्तरमात्मनः ।
ललाटाख्यं भ्रुवोर्मध्यादूर्ध्वं स्यादङ्गुलद्वयम् ॥१९॥

ललाटाद्व्योमसंज्ञं स्यादङ्गुलित्रयमेव हि ।
स्थानेष्वेतेषु मनसा वायुमारोप्य धारयेत् ॥२०॥

स्थानात्स्थानात्समाकृष्य प्रत्याहारं प्रकुर्वतः ।
सर्वे रोगा विनश्यन्ति योगाः सिद्ध्यन्ति तस्य वै ॥२१॥

१७/१–न२–षडंगुलं च———; ग२––षडंगुलस्तु————; न३–षडंगुलस्तु हृदयात् । १७/२–न१, ३, ४, ग१, २. ४, ५–कण्ठकूपस्तथैव च(?) । १७/३–ग२– ————जिह्वायां (?);। न६–कण्ठकूपाश्च(?)———; क–कण्ठमूलाच्च———। ग५–कण्ठकूपात्तालुमूलं । १७/४–ग२–मूलान्तं ————; ग३–मूलं (स्याच्च–) तुरंगुलम् ; ग५–षडंगुलमुदाहृतम् ।

१८/१–२–क– × × × × × × × × । ग५–तालुमूलाच्च नासाया मूलं स्याच्चतुरंगुलम् । १८/१———जिह्वायां (?) । १८/२–ग२, ३, न५– मूलं तु(?)————; न६–मुलात्तच्च-तुरंगुलम् ; ग४, न८–मूलात्स्याच्चतुरंगुलम् । १८/३–४–ग२–नासामूलाच्च नेत्राच्च चतुर्थांगुल-मिष्यते(?) । १८/३–क– —————तन्मूलं(?) । १८/४–ग६, क–तदर्धाङ्गुलमिष्यते; न७–गार्ग्यर्धांगुलमिष्यते ।

१९/१– न६–तस्मादर्धांगुलाद्विद्धि ; ग२–तस्मादर्धाङ्गुलं गार्गि । १९/२– न२–भ्रुवोरन्तर-मात्मभूः ; ग२–त्वया जित(?)ततो भवेत् । १९/३–४–ग२–आललाटं भ्रुवोर्मध्यादूर्ध्वं स्यादङ्गु-लत्रयम् ; १९/३– न३–लटाटं तु———; न६–ललाटाख्यां(?)———१९/४–न५– ––– –दङ्गुलत्रयम् ; न६, ७, ग४– ––––– –दंगुलित्रयम् ।

२०/१–अस्मिंश्चरणे ९ विकल्पा दृश्यन्ते । ते:–न१, २, ५, ७, क–ललाटाव्द्योमसंज्ञं स्यात् ; ग१, ४, ५, त– —————संज्ञं तु; न६– —————संज्ञातं; न४–ललाटे व्योमसंज्ञातं ; न३–ललाटव्योमसंज्ञं तत् ; ग३–ललाटं व्योमसंज्ञा तु(?) ; ग६–ललाटाव्द्योमसंक्रान्तं ; न८–ललाटा-ख्याव्द्योमसंज्ञं ; ग२–ललाटाव्द्योमरन्ध्रा(?)स्यात् । २०/२–न३, ५, ७, क–अंगुलत्रयमेव हि ; ग२–अंगुलत्रयमेव च ; ग१, ४, ५, न४, त–अंगुलद्वयमेव हि ; ग६–अंगुलिद्वयमिष्यते । अत्र वास्त-विकं मानं किमिति शंकास्पदम् । २०/३–ग२–स्थानेष्वेतानि(?)———; न३–कालेष्वेतेषु(?) ————; ग५– × × × × । २०।४–ग५– × × × × ।

२१/१–ग४, ५, ६–स्थानात्स्थानं————; त–स्थानात्स्थं(?)————; न१, ५–स्थानात्स्थानीयमुत्कृष्य । २१/२–ग४– —————प्रकुर्वते ; ग३– —————प्रकुर्वता ; ग२– —————प्रवर्तयेत्(?) । २१/३–न१, २, ५, ७, ८, त, ग४– –––––रोगाश्च नश्य-न्ति ; ग२,–– ————प्रणश्यन्ति । २१/४–न४, ग४– योगः सिद्ध्यति––––; न३– योग-सिद्धस्य————; ग५–आयुः सिद्ध्यति———॥

वदन्ति योगिनः केचिद्योगेषु कुशला नराः।
प्रत्याहारं वरारोहे शृणु त्वं तद्वदाम्यहम् ॥२२॥

सम्पूर्णकुम्भवद्वायुमङ्गुष्ठान्मूर्धमध्यतः ।
धारयेदनिलं बुद्धया प्राणायामप्रचोदितः ॥२३॥

व्योमरन्ध्रात्समाकृष्य ललाटे धारयेत्पुनः ।
ललाटाद्वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् ॥२४॥

भ्रुवोर्मध्यात्समाकृष्य नेत्रमध्ये निरोधयेत् ।
*नेत्रात्प्राणं समाकृष्य नासामूले निरोधयेत् ॥२५॥

नासामूलात्तु जिह्वाया मूले प्राणं निरोधयेत् ।
जिह्वामूलात्समाकृष्य कण्ठमूले निरोधयेत् ॥२६॥

२२/१–ग५–स्तुवन्ति(?)————————। २२/२–ग३– ————————कुशला नरः(?); ग२–योगे कुशलबुद्धयः। २२/३–क–प्रत्यारोहं————————। २२/४–ग२–शृणु तद्वद्वदाम्यहम्(?); न३– ————त्वं तं वदाम्यहम् ।

२३/१–न५– ————————कुम्भवद्वायोः; ग२–आरोप्य पादयोर्वायुः; ग३– ———————— कुम्भकत्वात्तैः। (?) २३/२———— ग१, २, ४, ६, न३, ४, ६, ८– ————————न्मूर्ध्नि————————; ग५–अङ्गुष्टादूर्ध्वमध्यतः; ग३–अंगुष्टा + + मध्यतः। २३/३–त– ————————विद्वान्; न३– ————————बद्धवा(?) ग२, न७– + + + +। २३/४–ग५, ६– ————————प्रचोदितम्; न८– प्राणायामः प्रचोदितः(?); न४–-प्राणायामप्रणोदितम्; ग२– + + + +; न७–धारयेन्मनः (?) + + + +।

२४/१–न३–व्योमरन्ध्रा(त्) समाकृष्य; ग४, न७– × × × ×। २४/२–न८–ललाटाद्धारयेत्पुनः; न२– ————————धारयेन्मनः; न४–नेत्रमध्ये निरोधयेत्; ग४, न७– × × × ×। २४।३–४–ग४– × × × × × × × × ।

२५/१–न१,–भ्रुवोर्मध्ये————————; ग१-भ्रुवोर्मध्ये तु जिह्वाया; ग४– × × × ×। २५/२–न१– ————————निरोधने; न७, ८– ————————निरोधनं; क-नेत्रे वायुं निरोधयेत्; ग१–मूले प्राणं————————; न६–नेत्रमूले————————; ग५–कर्णमूले————————; न८, ग६–कर्णमले निवेशयेत् । * "न८" लेखे २५/१ पुनर्लिखित्वा "कर्णमूले निवेशयेत्" इति २५/२ चरणं लिखितमस्ति; न४–ललाटे धारयेत्पुनः; ग२, ४– × × × ×। अत्राधिका पंक्तिर्लेखत्रये। सा–ग५, ६, न८–कर्णमूलात्समाकृष्य नेत्रे वायुं निरोधयेत् । २५/३–ग१–मूले प्राणं निरोधयेत्; ग२, ४– × × × × । २५।४–न२, ७–नासाग्रे सन्निरोधयेत्; ग३–नासामूले विलोकयेत्; न३–नेत्रमध्ये निरोधयेत्; ग२, ४– × × × × ।

२६/१–न८, ग६–नासाच्च जिह्वामूले च; ग५–नसश्च(?)जिह्वामूले च; क–नासा च(?) जिह्वामूले च; न२–नासामूले तु जिह्वायाः; न६–नासामूलं तु————————; ग२, ४– × × × ×। २६/२-न१—मूले च; न२–नासामूले तु जिह्वायाः; न६–नासामूलं तु————————; ग२, ४– × × × × । २६/२–न१–मूले———— ————————; न६–मूलं प्राणान्निरोधयेत्; न८–मूलात्प्राणं————————;

कण्ठमूलात्तु हृन्मध्ये हृदयान्नाभिमध्यमे ।
नाभिमध्यात्पुनर्मेढ्रे मेढ्राद्वह्न्यालये ततः ॥२७॥

देहमध्याद्गुदे गार्गि गुदादेवोरुमूलके ।
*ऊरुमूलात्तयोर्मध्ये तस्माज्जान्वोर्निरोधयेत् ॥२८॥

†चितिमूले ततस्तस्माज्जङ्घयोर्मध्यमे तथा ।
जङ्घामध्यात्समाकृष्य वायुं गुल्फे निरोधयेत् ॥२९॥

गुल्फादङ्गुष्ठयोर्गार्गि पादयोस्तन्निरोधयेत् ।
स्थानात्स्थानात्समाकृष्य यस्त्वेवं धारयेत्सुधीः ॥३०॥

न७– ————————नियोजयेत् ; ग५, ६, क–प्राणं नित्यं निरोधयेत् ; ग२, ४–× × × ×। २६/३–ग२, ४–× × × × । २६/४–न१, २, ४, ५, ग३, त–कण्ठकूपे———— ; ग६,–कण्ठकूपे निवेशयेत् ; ग४–× × × ×।

२७/१–न१, २, ४, ५, ६, ७, ग२, ३, त–कण्ठकूपात्तु—————; ग५, ६, न८–कण्ठमूलाच्च—————; ग४, क– × × × × । २७/२–ग४, क– × × × × । २७/३–न१, ४– ————————पुनर्मेढ्रं ; ग२–नाभिमध्यान्नयन्मेढ्रं ; ग४, त– × × × × । २७/४–ग३–मेढ्राद्वह्लचालयात्ततः(?) ; ग२– मेढ्राद्देहस्य मध्यमम् ; न४–मेढ्राद्देहस्य मध्यतः ; न६–मेढ्राद्गुदालये ततः ; ग४, त– × × × ×।

२८/१–ग२–देहमध्याद्गुदं————; ग३–देवं(?) मध्याद्गुदे————। २८/२–ग२, ५, ६, न८, क–गुदात्तत्रोरुमूलके; न१, २, ७–गुदान्तादुरुमूलके ; न३–गुदाद्वावुरुमूलके (?) न५–गुदात्तु ऊरुमूलके ; ग३–गुदतश्चोरुमूलके ; न४–गुदतो रौसमूलके(?) ; न६–गुदाद्वै जानुमूलके ; त, ग४– × × × × । *अत्रैकाधिका पंक्ति– न१, २, ५, ७–वह्लचालयात्पायुमूले पायुमूलादुरुद्वये। २८/३–न१, २, ५, ७–उरुमूलात्तथा गार्गि ; त–उरुमध्याच्च जान्वोश्च ; न६–जानुमूलात्तयोर्मध्ये ; न७–उरुमूलाज्जानुमूले ; ग६–उरुमूलात्स्फिजोर्मध्ये ; ग४–× × × × । २८/४–न५–जान्वोर्मूले —————; न८–तस्माद्वै जानुमूलके ; त–तस्मिन्वायुं—————; न७–समाकृष्य—————।

† अत्रैकाधिका पंक्तिः–न८–जानुमूलात्तयोर्मध्ये तस्माज्जान्वोर्निरोधयेत्। एषान्यस्मात्संस्करणादुद्धृता २८/३-४ चरणस्य पाठान्तर इव दृश्यते ।

२९/१–ग१–चितिमूलं————————; न३–चित्तमूले—————; ग२–भित्तिमूलात्ततस्तस्मात् ; ग५, ६, क–जान्वोर्मूलात्ततस्तस्मात् ; ग४–× × × × । २९/२–न२, ३, ५, ७–————————ततः ग४–× × × × । २९/३–ग१, न६–जंघातस्तं—————; न२, ग२–जंघामूलात्समाकृष्य ; न८–जंघात्ततः———; न४–जंघास्थानात्समाकृष्य ; त–जंघद्वयं समाकृष्ये(?ष्य) न५, ग४–× × × × । २९/४—न१–गुल्फमध्ये—————; ग२, ३, न४, ६, त–गुल्फमूले —————; न५, ग४– × × × × ।

३०/१–ग३–गुल्फादंगुष्टयोर्मध्ये ; ग६–गुल्फादंगुलयोर्गार्गि ; न५, ग४–× × × × । ३०/२–न५, ग४– × × × × । ३०/३–न४, ८–स्थानात्स्थानं—————; न३, ६, ७, ग३, ५, ६, क–स्थानं स्थानं– ————————; न५, ग४–× × × × । ३०/४–न३, ६, ७, ८–————————धारयेद्धिया ; ग५, ६, क– ————————धारयेन्नरः ; ग४–× × × × ।

सर्वपापविशुद्धात्मा जीवेदाचन्द्रतारकम् ।
एतत्तु योगसिध्द्यर्थमगस्त्येनापि कीर्तितम् ॥३१॥

प्रत्याहारेषु सर्वेषु प्रशस्तमिति योगिभिः ।

नाडीभ्यां वायुमापूर्य कुण्डल्याः पार्श्वयोः क्षिपेत् ॥३२॥

धारयेद्युगपत्सोऽपि भवरोगाद्विमुच्यते ।

पूर्ववद्वायुमारोप्य हृदयव्योम्नि धारयेत् ॥३३॥

सोऽपि याति वरारोहे परमात्मपदं नरः ।
व्याधयः किं पुनस्तस्य बाह्याभ्यन्तरवर्तिनः ॥३४॥

नासाभ्यां वायुमारोप्य पूरयित्वोदरस्थितम् ।
भ्रुवोर्मध्याद्दृशोः पश्चात्समारोप्य समाहितः ॥३५॥

३१/१–ग५–स च पापैर्विशुद्धात्मा ; क–स च पापविशुद्धात्मा; ग४– × × × × । **३१**/२–ग४– × × × × । **३१**/३–न६,—एतद्योगविशुद्ध्यर्थं (?); न३–एवं तु योगसिद्ध्यर्थं ; ग४– × × × × । **३१**/४–ग५– अगस्त्येनाभिभाषितम् ; ग२–अगस्त्येनाभिकीर्तितम् ; न५–अगस्त्येन प्रकीर्तितम् ; ग४– × × × × ।

३२/१–ग२–प्रत्याहारे त्विदं प्रोक्तं ; ग४– × × × × । **३२**/२–न८–प्रशस्तमिति कीर्तितम् ; ग४– × × × × । **३२**/३–न८, ग५, ६– ———वायुमाकृष्य ; ग४– × × × × । **३२**/४–न६, ग५, ६– ————पार्श्वयोर्नरः ; न८–कुण्डलीपार्श्वयोर्नरः ; ग४– × × × × ।

३३/१–न८, ग५, ६–धारयेद्युगपद्योगी ; ग३–धारयेद्योगिवित्सोऽपि (?–द्योगवित्सोऽपि) ; ग४– × × × × । **३३**/२–ग४– × × × × । **३३**/३–ग४– × × × × । **३३**/४–ग१, ३, ५, न६, त, क–हृदये व्योम्नि———; न८–हृदयाद्व्योम्नि———; ग२–धारयेद्हृदयाम्बरे; ग४– × × × × ।

३४/१–न५, ७, ८, ग२, ५, ६, क–स प्रयाति———; ग४–संप्रयाति——— । **३४**/२–ग५–परमं धाम वा नरः ; ग६, क–परमात्माथवा(?)नरः ; ग४, न८–परमात्मानमव्ययम् । **३४**/३–न३– ————किन्तु नस्तस्य (?किं पुनस्तस्य) ; ग५, ६, क–वायवः (?व्याधयः)——————— । **३४**/४–ग५, ६, क–बाह्यभ्यन्तरवह्लयः ।

३५/१–ग३–नासायां———— । **३५**/२–ग५–पूरयित्वोदरे स्थितम् । **३५**/३–एतस्य चरणस्य ८ भिन्नभिन्नाः पाठा विद्यमानलेखेषु दृश्यन्ते । ते च :—(१)ग१, ६, न४, ६, ८, क–भ्रुवोर्मध्याद्दृशोः पश्चात् ; ग३–भ्रुवोर्मध्यात्पुनः————; ग४– ————कृषेः(?)———; ग५–भ्रुवोर्मध्ये दिशः(?)———; न३–भ्रु– ——ध्ये दशा(?)———; न२ त– ————ततः ———; न१, ५, ७–भ्रु———ध्यं ततः——; ग२–भ्रु– ——ध्ये च कुचयोः । **३५**/४–न४, ग३–संरोप्य सुसमाहितः ।

धारयेत्क्षणमात्रं वा सोऽपि याति परां गतिम् ।
किं पुनर्बहुनोक्तेन नित्यं कर्म समाचरन् ॥३६॥

आत्मनः प्राणमारोप्य भ्रुवोर्मध्ये सुषुम्णया ।
यावन्मनो लयत्यस्मिंस्तावत्संयमनं कुरु ॥३७॥

इति श्रीयोगयाज्ञवल्क्ये सप्तमोऽध्यायः ॥

३६/१–न४– ---------क्षणमात्रं तु ; न२, ५, ७, त– ---------स्थितिमात्रेण । ३६/२–न१, ५, ग१, २, ५, ६, त, क– ------------परं पदम् ; ग३–न (?स) याति परमं पदम् । ३६/४–इदं चरणं द्विधा विभज्य साम्यवैषम्ये निर्णेतव्ये । तस्य विभागौ :–(१) नित्यं कर्म ; (२) समाचरन् । तयोर्ये ये पाठा लेखेषु दृश्यन्ते तेः–(१) न६, ७, ८, ग४, ५, ६, क– नित्यं कर्म ; न१, २, ४, ग१, ३, त–नित्यकर्म ; ग२–नित्यमेवं ; न३–निजकर्म, (२) न१, ५, ग१–समाचरन् ; न२, ४, ७, ग२, ३, ४, ५, ६, त–समाचर ; न३, ६, ८, क–समाचरेत् ।

३७/१–त–आत्मनि------------; ग२, ६–आत्मानं----------; ग५– × × × × । ३७/२–न४–भ्रुवोर्मध्यं----------; ग२–भ्रूमध्यान्तं-------; न६, ग४–आभ्रूमध्यात्सुषुम्णया ; न८–अभ्र–(?आभ्रू–) मध्यात्सुषुम्णया; ग५– × × × × । ३७/३–ग१, २, न५, ६– -------- –न्मनोलयस्तस्मिन् ; ग४, न८– -----मनोलयेत्तस्मिन् ; ग५, ६, क–यावन्नादो भवत्यस्मिन् । ३७/४–ग३–तावत्सलयं मनं(?)कुरु ।

अष्टमोऽध्यायः ॥

*याज्ञवल्क्य उवाच—

अथेदानीं प्रवक्ष्यामि धारणाः पंच तत्त्वतः ।
समाहितमनास्त्वं च शृणु गार्गि तपोधने ॥१॥

यमादिगुणयुक्तस्य मनसः स्थितिरात्मनि ।
धारणेत्युच्यते सद्भिः शास्त्रतात्पर्यवेदिभिः ॥२॥

अस्मिन्ब्रह्मपुरे गार्गि यदिदं हृदयाम्बुजम् ।
तस्मिन्नेवान्तराकाशे यद्बाह्याकाशधारणम् ॥३॥

एषा च धारणेत्युक्ता योगशास्त्रविशारदैः ।
तान्त्रिकैर्योगशास्त्रज्ञैर्विद्वद्भिश्च सुशिक्षितैः ॥४॥

धारणाः पंचधा प्रोक्तास्ताश्च सर्वाः पृथक् शृणु ।
भूमिरापस्तथा तेजो वायुराकाशमेव च ॥५॥

अष्टमोऽध्यायः ॥

*न४, ५–श्रीयाज्ञवल्क्य उवाच ; ग४– भगवानुवाच ; न१, २, ८, ग१, २, क–श्रीभगवानुवाच ; ग६–ओम । ; न३, ६, ७, ग५– × × × × ।

१/२–ग६–धारणात्पंच(?)————; ग२–धारणामन्त्रतत्त्वतः । १/३–न३–समाहितमना भूत्वा ; न६–समाहितमनास्ताश्च ; ग६–समाहितमनाः सत्त्वं(?) ग१– × × × × । १/४–न३, ६, ८, ग६– ——————वरानने ; ग१– × × × × ।

२/१–न२–शमादिगुणयुक्तस्य । २/२–न३, ग१– ————स्थैर्यमात्मनि ; न४, ५–मनसा स्थितिरात्मनि ; न६–मानसस्थिति—————; ग३–मननस्थितिः(?)———। २/३–न३–धारणान्मुच्यते–(?)———। २/४–न३–शास्त्रतात्पर्यवादिभिः ।

३/२–न२–यत्पदं——————; त, न६, ग३, ४, ५, ६– यदिदं दहराम्बुजम् ; न७–यत्पदहृदयाम्बुजे(?) ; न८–यदिदं दहरायुजम्(?) । ३/३–ग३–तस्मिन्नेवान्तराकाले(?) ; ग५, ६, क–तस्मिन्वै दहराकाशे; ग२–तस्मिन्नेकान्तवासेन ; क–दहराम्बुजमध्ये च । ३/४–न४–यद्वात्याकाशधारणे(?) ; ग२–बाह्ये वा धारणान्तरा(?) ; क–व्योम्नि यद्बाह्यधारणम् ।

४/१– ——————धारणेत्युक्तौ(?) ; न३–एषा ते धारणेत्युक्ता ; क–एतच्च धारणेत्युक्तं । ४/२–न३–योगशास्त्रविशारदे ; न१, २, ४, ७, ग३–शास्त्रतात्पर्यवेदिभिः ; न५–योगशास्त्रतात्पर्यवेदिभिः(?) । ४/३–४–ग२–तत्त्वज्ञैर्योगशास्त्रज्ञैर्विद्वभिश्च सुशिक्षितैः ; ग६– × × × × ।

५/१–न६– ——————पंच संप्रोक्ताः । केषुचिल्लेखेषु विसर्गलोप एव दृश्यते तल्लेखकस्य प्रमादजन्य एवेति मत्वावगणितः । ५/४–न१, २, ४, ६, ग२, ३, ६–वायुराकाश एव च ।

एतेषु पंचदेवानां धारणं पंचधोच्यते ।
पादादिजानुपर्यन्तं पृथिवीस्थानमुच्यते ॥६॥

आजानोः पायुपर्यन्तमपां स्थानं प्रकीर्तितम् ।
आपायोर्हृदयान्तं यद्वह्निस्थानं तदुच्यते ॥७॥

आहृन्मध्याद्भ्रुवोर्मध्यं यावद्वायुकुलं स्मृतम् ।
आभ्रूमध्यात्तु मूर्धान्तमाकाशमिति चोच्यते ॥८॥

अत्र केचिद्वदन्त्यन्ये योगपण्डितमानिनः ।
आजानोर्नाभिपर्यन्तमपांस्थानमिति द्विजाः ॥९॥

नाभिमध्याद्गलान्तं यद्वह्निस्थानं तदुच्यते ।
*आगलात्तु ललाटान्तं वायुस्थानमितीरितम् ॥१०॥

६/१–न८–एतेषां————————; क–एषु पञ्चसु देवानां । ६/२–न१, ३, ४, ६, ७, ग२, ३, ४, त– ————पञ्चधेष्यते ; न८– ——————पञ्च चेष्यते । ६।३–न७– ———— जानुपर्यन्तैः(?) ; न८,क– ————जानोः पर्यन्तं ।

७/१–न३, ४, ७, ८, ग३, ४, क–आजान्वोः ————; ग२–जान्वादि नाभिपर्यन्तं । ७/२–ग२–आपस्थानं——————। ७/३–न१, २, ३, ग५, ६, क–आपायोर्हृदयान्तं च ; न६–आपायुहृदयान्तं यद्– ; न३, ७–आपायोर्हृदयांते च ; न४–आपायोर्हृदयं यावद्–; ग२–नाभ्यादि हृदि पर्यन्तं । ७/४–ग२, ५, ६, क– ————————प्रकीर्तितम् ।

८/१–ग१–हृन्मध्यात्तु————; ग२–हृन्मध्याच्च————————। ८/२–ग२–तावद्वायुस्थलं———; न४–तावद्वायुकुलं——————; ग५–वायुस्थानं प्रकीर्तितम् । ८/१–२–न३– × × × × × × × × × । ८/३–ग१, ४–आभ्रूमध्यात्तदूर्ध्वान्तं ; ग२–भ्रुवोर्मध्याच्च मूर्धान्तं ; न७–श्रोत्राभ्र मध्यान्मूर्धांतं । ८/४–ग४–आकाश इति– ——————; ग५, ६, क–आकाश इति कीर्तितम् ; ग२–आकाशस्थानमिष्यते । ८/३–४– न३– × × × × × × × × × ।

९/१–न८, ग४– तत्र————————; ग२– —————— –द्वदन्त्यस्मिन् । ९/२–ग२–योगे पण्डितमानसः(?) ; न३–योगपण्डितमानितः(?) ; क–लोकपण्डितमानिनः । ९/३–४, ७, ८ ग३, ४–आजान्वोर्नाभिपर्यन्तं । ९/४–न३, ४, ८, ग३, ४–अपां स्थानं प्रकीर्तितम् ; ग६–अपां स्थानं द्विजोत्तमे ; क, ग५– ————————द्विजोत्तमाः ।

१०/१–न३, ग५, ६, क——————गलान्तं च ; न६– ————गलान्तं यद् ; ग४–नाभिमध्यादागलान्तं । १०/२–न८– ——————तथोच्यते ; ग५, ६———तेजसः स्थानमुच्यते ; क–तेजसां स्थानमच्यते । १०/३–ग१, २–आगलाद्भ्रूललाटान्तं ; ग३–आगलान्तं ललाटान्तं ; ग५, ६———गलाद्भ्रूमध्यपर्यन्तं ; १०/४–ग५, ६–वायुस्थानं प्रकीर्तितम् ; क–पवनस्थानमुच्यते ; न८–यावद्वायुकुलं स्मृतम् । *अत्र "ग५" लेखे द्वावधिकौ श्लोकौ । यद्यपि तयोरस्मिंस्थाने योग्यताहीनत्वं स्पष्टमेव तथापि कौतूहलवारणाय तावत्रोद्धृतौः–चतुरस्रं चार्धचन्द्रं त्रिकोणं च षडश्रकम् । संवृत्तं च पृथिव्यादि मण्डलाकृतयः क्रमात् ॥१०/१॥ पीतं शुक्लं तथा रक्तं कृष्णं धूम्रं च वर्णकम् । लवादैरथ वर्णं च हकारं चाक्षरक्रमम् ॥१०/२॥

ललाटाद्रन्ध्रपर्यन्तमाकाशस्थानमुच्यते ।
अयुक्तमेतदित्युक्तं शास्त्रतात्पर्यवेदिभिः ॥११॥

यदि स्याज्ज्वलनस्थानं देहमध्ये वरानने ।
अयुक्ता कारणे वह्नौ कार्यरूपस्य संस्थितिः ॥१२॥

कार्यकारणसंयोगे कार्यहानिः कथं भवेत् ।
दृष्टं तत्कार्यरूपेषु मृदात्मकघटादिषु ॥१३॥

*

पृथिव्यां धारयेद्गार्गि ब्रह्माणं परमेष्ठिनम् ।
विष्णुमप्स्वनले रुद्रमीश्वरं वायुमण्डले ॥१४॥

सदाशिव तथा व्योम्नि धारयेत्सुसमाहितः ।
पृथिव्यां वायुमास्थाय लकारेण समन्वितम् ॥१५॥

११/१—न३—ललाटं रन्ध्रपर्यन्तं ; न४—ललाटान्मूर्ध्निपर्यन्तं ; ग४—ललाटाकाशपर्यन्तं । ११/१-२—न१, २, ५, ७, ग२, ५, ६, त, क—× × × × × × × × × ×। ११/४—ग६—शास्त्रतत्त्वार्थयोगिभिः(?) । ११/३-४—ग५, क—× × × × × × × × ×।

१२/१—न६—यदि स्याज्जलसंस्थानं(?) । १२।२—ग६—देहमध्यं————————। १२/१-२—ग५, क——× × × × × × × × × ×। १२/३—न१, ग१, २—अमुक्तकारणे————; न२, ७, ८, ग४, ६—अयुक्तकारणे———; न४—अयुक्तकारणे चाह्नौ । १२/४—न३—कार्यरूपमिति स्थितिः ; ग३—कार्यारूपस्य संस्थितः(?) ; न६—कार्यरूप + संस्थितेः । १२।३-४—ग५, क—× × × × × × × ×।

१३/१-२—ग२, ६—कार्यकारणसंयोगात्कार्यं चापि दृढं भवेत् ; ग१—कार्यकारणसंयोगात्कार्यहानिर्दृढा भवेत् ; ग५, क— × × × × × × × × ×। १३/३—ग१—दृष्टान्तः————; न३—इष्टं तत्कार्यरूपेण ; ग६—दृष्टार्थं कार्यरूपेण । १३/४—ग२—मृदादिभ्यां घटादिकम् ; न३—मृदादिव घटादिषु ; ग६—मृदादिभ्यो घटादिकम् ॥ १३।३-४—ग५, क— × × × × × × × × ×।

*यौ श्लोकौ "ग५" लेखे १०-११ श्लोकयोरन्तराले तावेव "ग६" लेखे १३-१४ श्लोकयोरन्तराले । तयोः पुनरुक्त्या न काचिदर्थसिद्धिरिति सा न कृतात्र ।

१४/१—ग३— ——————धारणं गार्गि ; ग६— —————धारये(?)————। १४/२—ग३—ब्राह्मणं———————; न४—ब्रह्माणमुदकेषु च(?) । १४।१-२—ग१, ५, क— × × × × × × × × । १४/३—न६—विष्णुमप्यनले——— ; ग३——विष्णुमत्स्वनले————(?) ; ग६—विष्णुमप्सु गळे————(?) ; न४—विष्णुं विद्धचनले—————। १४/४-न४—मारुतं वायुमण्डले १४।३-४—ग१, ४, ५, क—× × × × × × × × × ।

१५/२—न३—धारये(त्)—————; ग६—धारयेस्सु –(?त्सु–) समाहितः । १५/१–२—ग१, ४, ५, क—× × × × × × × × × ×। १५/३—न१, २, ग२— —————वायुमास्थाप्य ; ग५ ६—पार्थिवे वायुमारोप्य । १५/४—न४, ग३—लकारेण समाहितः(?) । १५/३-४—ग१, ४, क—× × × × × × × × ।

ध्यायंश्चतुर्भुजाकारं ब्रह्माणं सृष्टिकारणम् ।
धारयेत्पंच घटिकाः पृथिवीजयमाप्नुयात् ॥१६॥

वारुणे वायुमारोप्य वकारेण समन्वितम् ।
स्मरन्नारायणं सौम्यं चतुर्बाहुं किरीटिनम् ॥१७॥

शुद्धस्फटिकसंकाशं पीतवाससमच्युतम् ।
धारयेत्पंच घटिकाः सर्वरोगैः प्रमुच्यते ॥१८॥

वह्नौ चानिलमारोप्य रेफाक्षरसमन्वितम् ।
त्र्यक्षं वरप्रदं रुद्रं तरुणादित्यसन्निभम् ॥१९॥

भस्मोध्दूलितसर्वांगं सुप्रसन्नमनुस्मरन् ।
धारयेत्पंच घटिकाः वह्निनासौ न दह्यते ॥२०॥

१६/१–न३–ध्यायन्चतुर्भुजाकारं ; ग५, ६,–ध्यायंश्चतुर्भुजाकारं; ग२–ध्यायन्चतुर्मुखाकारं ; न८–ध्यायन्वेदादिकर्तारं ; न१, २–ध्यायेच्चतुर्मुखाकारं ; न५–धारयेच्चतुर्भु + + × ; ग४–चतुर्भुज-मुखाम्भोज– । १६/२–ग३–ब्रह्माणं परमेष्ठिनम् ; ग४–हंसायितसरस्वतीम् ; ग५, ६, न८–चतुर्वक्त्रं हिरण्मयं ; न५– × × × × । १६/१-२–ग१, क– × × × × × × × × × । १६/३–न४, ग३, ४–––धारयन्पञ्च घटिकाः; ग१–धारयेत्घटिकास्तिस्रः; त–"धारयेत्पंच्च घटिकाः", "पृथिव्यां वायुमारोप्य" इति द्वौ पाठौ । १६/४–न३–पृथिवी वायुमाप्नुयात् ; ग५, क–सर्वान्कामा-नवाप्नुयात् ; त–"सर्वरोगैः प्रमुच्यते", पृथिवीजयमाप्नुयात्" इति द्वौ पाठौ ।

१७/१–न३–वारुणो वायुमारोप्य(?) ; न१, २, ५, ७––––अप्स्वेवं––––––––––। १७/२–न१–सकारेण–––––––; –न६, ग३–वकारेण समन्विते । १७/१-२–ग१, त, क– × × × × × × × × । १७/३–ग५, न७, क–स्मरन्नारायणं देवं ; त–स्मरेन्नारायणं देवं ; ग६–परं नारा-यणं देवं ; न३, ४, ग३–तस्मिन्नारायणं सौम्यं ; न६–अस्मिन्नारायणं सौम्यं । १७/४–न५, ६, ८–ग५, क– –––––––––––शुचिस्मितम् । १७/३-४–ग१– × × × × × × × × × ।

१८/२–न३–पीतवाससमच्युतम् (?–तम्) । ग३–पीतवाससमुच्यते(?) । १८/३–न४, ग३–धारयन्पंच घटिकाः ; ग१– × × × × । १८/४–न५, ग५, ६, त, क–सर्वपापैः–––––––; न८, ग४––महारोगैः–––––––––; न१, ७–भवरोगैर्विमुच्यते–ग१– × × × × । ; न६–अपां विजय-माप्नुयात् ।

१९/१–न३, ८–वह्नावनिलमारोप्य ; ग१– × × × × । १९/२–न३, ६– –––––––––––––––––समन्विते ; न१, २, ४, ७–रेफान्तरसमन्वितम् ; त–एकाक्षरसमन्वितम् । १९/३–न१, २, ५– त्र्यक्षं च वरदं–––––न७–अक्षं च वरदं–––––; न४–त्र्यम्बकं वरदं–––––––; ग२–त्रिनेत्रं––––––––––––; न३–अक्षरं वर+ –––––; त–अभयं वरदं–––––; ग३–अम्बिकावरदं –––––––; ग१– × × × ×। १९/४–न३–तरुणादित्यसंभवम्(?) ; ग१– × × × ×।

२०/१-२–ग१– × × × × × × × × × । २०/२–न१, २, ३, ५, ६, ७, ८, ग४, क––– –मनुस्मरेत् । २०/३-४–ग१– × × × × × × × × × । २०/३–न३, ४, ग३–धारयेद् घटिकाः पञ्च ; न५–धारयेत्पञ्च घटिकां ।

मारुतं मारुतस्थाने यकारेण समन्वितम् ।
धारयेत्पंच घटिकाः वायुवद्व्योमगो भवेत् ॥२१॥

आकाशे वायुमारोप्य हकारोपरि शकरम् ।
बिन्दुरूपं महादेवं व्योमाकारं सदाशिवम् ॥२२॥

शुद्धस्फटिकसंकाशं बालेन्दुधृतमौलिनम् ।
पंच वक्त्रयुतं सौम्यं दशबाहुं त्रिलोचनम् ॥२३॥

सर्वायुधोद्यतकरं सर्वाभरणभूषितम् ।
उमार्धदेहं वरदं सर्वकारणकारणम् ॥२४॥

मनसा चिन्तयन्यस्तु मुहूर्तमपि धारयेत् ।
स एव मुक्त इत्युक्तस्तान्त्रिकेषु सुशिक्षितैः ॥२५॥

एतदुक्तं भवत्यत्र गार्गि ब्रह्मविदां वरे ।
ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे ॥२६॥

२१/१-२–ग१– × × × × × × × × × । २१/१-न३, ४, ५-मारुतं मारुते स्थाने ; ग५, ६–मारुतं मरुतां स्थाने ; ग३–मरुतं मारुतस्थाने ; ग२–मारुतस्तन्मरुत्स्थाने । २१/२–ग२–वकारेण ————; न६– ————समन्विते; न३, ४, ५–सर्वदेवसमन्वितम् । २१/३–न५–धारयेत्पञ्च घटिकां ; ग१, २– × × × × × । २१/४–न१, ५, ७–युगपद् (?) व्योमगो भवेत् ; ग१–वायुमध्ये ततो भवेत् (?) ; ग२– × × × × ।

२२/१–ग१, २– × × × × । २२/२–न३, ग१-२– × × × × । २२/३–४–न३, ग१– × × × × × × × × × । २२/३–न७- ———महादेहं (?–देवं) ।

२३/१-२–न३– × × × × × × × × × । २३/२–ग२– ——— –शेखरम् ; न६– ——— –मौळिकम् (?) ; न८– ————युतमौलिनम् ; ग५, क–धृतबालेन्दु————। २३/३-४–न३, ग१– × × × × × × × × × । २३/३–न१, ५, ७, त–पञ्चवक्त्रयुतं शान्तं ; ग३–पञ्चवक्त्रं + + + युतं (?) ।

२४/१-२–न३, ग१– × × × × × × × × × । २४/१–ग५, ६, क–सर्वायुधैर्धृताकारं । २४/२–ग५, ६, क–सर्वभूषणभूषितम् । २४/३-४–न३, ग१– × × × × × × × × × । २४/३–उमार्ध– ——न६–उमार्थदेहं (?) । २४/४–ग२–सर्वकार्यादिकारणम् ।

२५/१-२–न३, ग१– × × × × × × × × × । २५/१–न२, ७–मनसा चिन्तयेद्यस्तु ; ग२–चिन्तयन्मान्यचित्तस्तु ; ग५–चिन्तया चिन्तयन्यस्तु ; ग६, क–चित्ते यश्चिन्तयेद्विद्वान् । २५/२–ग५–मुहूर्तमपि धारयन् ; ग३–महान्तमपि (?) धारयेत् । २५/३-४–न३, ग१– × × × × × × × × × । २५/३–न१, २, ५, ७–स एवमुक्तास्तु पञ्चेमाः, ग३–स विमुक्त इत्युक्तौ (?) । २५/४–न६–तान्त्रिकेष्वपि शिक्षितैः ; न२–तान्त्रिकैरपि———; न४–तान्त्रिकैश्च सुशिक्षितैः ; ग३ तान्त्रिकैश्च सुशोभितम् (?) ; न१, ५, ७, त–तान्त्रिकैरर्थशिक्षितैः ; ग२–त्रिलोकज्ञसुनिश्चितः (?) ।

२६/१-२–न३– × × × × × × × × × । २६/१–न८, ग४, क– ————भवत्यस्मिन् । २६/३-४– न३– × × × × × × × × × । २६/४– न६–स्वे स्वे संभृत्य——।

*तस्मिन्सदाशिवे प्राणं चित्तं चानीय कारणे ।
†युक्तचित्तस्तदात्मानं योजयेत्परमेश्वरे ॥२७॥

अस्मिन्नर्थे वदन्त्यन्ये योगिनो ब्रह्मविद्वराः ।
प्रणवेनैव कार्याणि स्वे स्वे संहृत्य कारणे ॥२८॥

प्रणवस्य तु नादान्ते परमानन्दविग्रहम् ।
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् ॥२९॥

चेतसा संप्रपश्यन्ति सन्तः संसारभेषजम् ।
त्वं तस्मात्प्रणवेनैव प्राणायामैस्त्रिभिस्त्रिभिः ॥३०॥

†ब्रह्मादि कार्यरूपाणि स्वे स्वे संहृत्य कारणे ।
विशुद्धचेतसा पश्य नादान्ते परमेश्वरम् ॥३१॥

---

*अत्र "न८" लेखे "प्रणवस्य तु नादान्ते परमानन्दविग्रहम्" इति पंक्तिर्वर्तते सा तु नाधिका किन्तु २९।१-२– अस्थाने लिखितास्ति ।

२७/१-२–न३, ४, ग४–× × × × × × × × × । २७।१-न२–तस्मिन्महाशिवे प्राणं ; ग२–तस्मिन्महाशिवे प्राण (–वायुं) ; त–तस्मिन्महाशिवे प्रोतं ; न१, ग१–तस्मिन्महाशिवे प्राणान् ; ग५–तस्मिन्शुभाश्रये प्राणं । २७/२–न६, ग३–चित्तं च निजकारणे ; न६, ग३–चित्तं वा निजकारणे; ग२–वायुं सर्वस्य कारणे ; न१, ग१, त–सृष्ठिस्थित्यन्तकारिणे । †"अत्र "न४, ५, ७" लेखेषु "विशुद्धमनसा पश्य नादान्ते परमेश्वरम्" इति पंक्तिर्वर्तते सा तु नाधिका किन्तु यान्येषु लेखेषु ३१/३-४ स्थाने वर्तते सैव । २७/३-४–न३, ४, ग३, ४, ५–× × × × × × × × × । २७/३–ग६–युक्तं च तस्य चात्मानं । २७/४–त, न८, क–युयोज——————; न६–संयोज्य—————।

२८/१-२–न३, ग४, ५, ६– × × × × × × × × × । २८/३-४–न३, ग४, ५, ६– × × × × × × × × × । २८/४–ग२– —————संगृह्य————।

२९/१-२–न३– × × × × × × × × × । २९/१–न६– ——————नादान्तं । २९/२-न१, २, ४, ७– ——————विग्रहे ; ग१– ———— –मीश्वरम् । २९/३-४–न३, ग२– × × × × × × × × × । २९/३–न८–इदं सत्यं——————।

३०/१-२–न३, ग२– × × × × × × × × × । ३०/२–न७– ———————+ + + भेषजम् ; त– ———————भेषजः । ३०/३-४–न३, ग२– × × × × × × × × × । ३०/३–न५–तत्तस्मात्प्रणवेनैव ; न८–तं तस्मात्प्रणवेनैव ।

३१/१-२————न३, ग२– × × × × × × × × × । †अत्र "ग६"लेखेपक्तित्रयम् :– "तस्मिन्सदाशिवे प्राणवायुं सर्वस्य कारणे । वायुरेव शिवो वायुः वायुधारि सदाशिवः ॥ युक्तं च तस्य चात्मानं योजयेत्परमेश्वरम् ॥ "एभ्यः प्रथमा या "ग२" लेखे २७/१-२ स्थाने विद्यते सैवास्ति । तृतीयाऽपि २७/३-४ पंक्त्यास्तस्मिन्नेव लेखे या पाठान्तरत्वेन वर्तते सैव । द्वितीयास्मिन्संदर्भे असम्बद्धा इव दृश्यते । ३१/३-४–न३– × × × × × × × × × । ३१/३–त– ——————पश्येत् ; न८————पश्यन् ; ग५ क– —————चेतसाविश्य ; ग२ – —————स्थाप्य ; ३१/४–ग२– —————परमात्मनि ; न६– —————कारणंशिवम् ; क–नानान्ते (?) परमेश्वरम् ।

अस्मिन्नर्थे वदन्त्यन्ये योगिनो ब्रह्मविद्वराः ।
भिषग्वरा वरारोहे योगेषु परिनिष्ठिताः ॥३२॥

शरीरं तावदेवं तु पंचभूतात्मकं खलु ।
तदेतत्तु वरारोहे वातपित्तकफात्मकम् ॥३३॥

वातात्मकानां सर्वेषां योगेष्वभिरतात्मनाम् ।
प्राणसंयमनेनैव शोषं याति कलेवरम् ॥३४॥

पित्तात्मकानां त्वचिरान्न शुष्यति कलेवरम् ।
कफात्मकानां कायश्च सम्पूर्णस्त्वचिराद्भवेत् ॥३५॥

धारणं कुर्वतस्त्वग्नौ सर्वे नश्यन्ति वातजाः ।
पार्थिवांशे जलांशे च धारणं कुर्वतः सदा ॥३६॥

३२/१-२– न३– × × × × × × × × × । ३२/१–ग–२ तस्मिन्नर्थे————— । ३२/२–न१, २, ७, ग५, ६,क–ब्रह्मवादिनः । ३२/३-४– न३– × × × × × × × × × । ३२/३–न१, २,–दिव्या भिषग्वरा ह्येते ; त–दैवे भिषग्वरारोहे(?) ; ग३–भिषस्वरो वरारोहे (?); न४–तदेव तु वरारोहे(?) । ३२/४–ग६–योगेषु परिनिष्ठितौ ; न४–× × × × ×। ३२/१-४– अस्मिन्श्लोके ये ये आयुर्वेदज्ञातारो योगिनस्तेषां मतमवलम्बितं, ३८ तमे श्लोके त्वश्विनयोर्देवभिषग्वरयोरेवेति विवेकः ॥

३३/१-२–न३, ४– × × × × × × × × × । ३३/१–ग५, ६– —————हि ; ग२– ————तावदेव त्वं ; न२, ६, ग१– ————तावदेतत्तु ; ग३– —————तावदेतन्तु । ३३/२– न१, २, ५, त– ——————श्रृणु । ३३/३-४–न३, ४–× × × × × × × × ×। ३३/३– ग३–तदेव तु– ————; ग५–तदा तत्र—————; न५, ७–तद्वदेतद्वरारोहे ; न६–तदेतं+वरारोहे । ३३/४–ग३—————तदापित्तकफात्मकम्(?) ।

३४/१-२–न३– × × × × × × × × × । ३४/२–न५–योगेष्वभिरतां नृणाम् ; ग४–योगेष्वपि रतात्मनाम् ; न१–योगेष्वभिरतं नृणाम् (?); ग२–योगेषु चरतां नृणाम् ; ग५, ६–योगेषु निरतात्मनाम् ; न६–योगे धीरवतां नृणाम् । ३४/३-४–न३– × × × × × × × × × । ३४/३–न२–प्राणसंयमने चैव । ३४/४–ग५, ६, क– —————शरीरकम् ।

३५/१-२–न३, ग२– × × × × × × × × × । ३५/१–न१, २, ४, ७, ग३, त– ——————सर्वेषां ; ग४, न८, क– ———— –मचिरात् ; न६– ————— –मचिरं। ३५/२–न८, ग४, क–विशुष्यति—————; ग३–स शुष्यति(?)—————। ३५/३-४–न३– × × × × । ३५/३– ग१, ४, ६, न६, क– ——————कायस्तु ; ग५– ———— ————सर्वेषां ; ग३– ————— –रौयस्थं(?) ; ग२–कफात्मस्य(?)संपूर्णं । ३५/४–न४, ५, ग१, ३, ४, ५, ६, त–सम्पूर्णमचिराद्भवेत् ; न६–सम्पूर्णमचिरं————; ग२–संपूर्णशरीरं हृचुक्षरो(?)————; न८–संशोषमचिराद्भवेत् ।

३६/१-२–न३– × × × × × × × × × । ३६/१–न४– ———— –स्त्वग्नेः ; न७– ————————सर्वे ; ग२– ———— –स्तस्याः । ३६/२–न७–न पश्यति(?)वातजाः । ३६/३-४–न३– × × × × × × × × × । ३६/३–न४– ————————वा ; ग१, ३, ४, ५, ६, न६, ७, ८, क–पार्थिवे च—————। ३६/४–न६–धारणां————————; ग१, ४, ५, ६, न८, क– —————कुर्वतस्तदा ।

नश्यन्ति श्लेष्मजा रोगा वातजाश्चाचिरात्तथा ।
व्योमांशे मारुतांशे च धारणं कुर्वतः सदा ॥३७॥

त्रिदोषजनिता रोगा विनश्यन्ति न संशयः ।
अस्मिन्नर्थे तथाब्रूतामश्विनौ च भिषग्वरौ ॥३८॥

प्राणसंयमनेनैव त्रिदोषशमनं नृणाम् ।
तस्मात्त्वं च वरारोहे नित्यं कर्म समाचर ॥३९॥

यमादिभिश्च संयुक्ता विधिवद्धारणं कुरु ॥४०॥

इति श्रीयोगयाज्ञवल्क्ये अष्टमोऽध्यायः ।

३७/१-२–न३– × × × × × × × × × । ३७/१– ग३–श्लेष्मजा वातजाश्चैव । ३७/२–न६–वातजाश्चाचिरं तथा ; न७-वातजास्त्वाचिरात्तथा ; ग६–वातजाश्चापि पित्तजाः ; ग४–पैत्ताश्चैवाचिरात्तथा ; न८, क–वैद्याश्चैवाचिरात्तथा (?) ; ग१, ५–विनश्यन्ति न संशयः ; ग३–नश्यन्त्यत्र न संशयः ; न४–सत्यं सत्यं न संशयः ॥ ३७/३-४–ग१, ३, ५, न३, ४, क– × × × × × × × × । ३७/३–न६–व्यामांशे (?व्योमांशे)———————। ३७/४–न१, ६, ग४, ६–धारणां———————।

३८/१-२–न३, ४, ग१, ३– × × × × × × × × × । ३८/२– — ग५, ६, क–विनश्यन्ति विषाणि च ; न६–नश्यन्त्यत्र न संशयः । ३८/३-४–न३– × × × × × × × × × । ३८/३–ग२–अस्मिन्नर्थे ब्रुवाते तौ ; न४–अस्मिन्नर्थे तु तौ ततोऽब्रूताम्(?) । ३८/४–ग२–अश्विनौ च———————।

३९/१-२–न३– × × × × × × × × × । ३९/२–ग२–त्रिदोषशमनं भवेत् । ३९/३-४–न३, ७– × × × × × × × × × । ३९/४–न२, ग३–नित्यकर्म———————।

४०/१-२–न३, ७– × × × × × × × × × । ४०/१–न२, ४, ६, ग३– ———————संयुक्तां(?) ; ग३–आ यस्माभिश्च संयुक्तां(?) ; न५– ———————संयुक्तं । ४०/२–ग२, ६, न४, ६– ———————धारणां———; ग४–विविधां धारणां कुरु ।

नवमोऽध्यायः ॥

*याज्ञवल्क्य उवाच—

अथ ध्यानं प्रवक्ष्यामि शृणु गार्गि वरानने ।
ध्यानमेव हि जन्तूनां कारणं बन्धमोक्षयोः ॥१॥

ध्यानमात्मस्वरूपस्य वेदनं मनसा खलु ।
सगुणं निर्गुणं तच्च सगुणं बहुशः स्मृतम् ॥२॥

पंचोत्तमानि तेष्वाहुर्वैदिकानि द्विजोत्तमाः ।
त्रीणि मुख्यतमान्येषामेकमेव हि निर्गुणम् ॥३॥

मर्मस्थानानि नाडीनां संस्थानं च पृथक्पृथक् ।
वायूनां स्थानकर्माणि ज्ञात्वा कुर्वात्मवेदनम् ॥४॥

नवमोऽध्यायः ॥

*न५–श्रीयाज्ञवल्क्य उवाच ; त–भगवानुवाच ; न६, ८, ग४, क–श्री भगवानुवाच ; न१, २, ३, ७, ग१, २, ५, ६–× × × × ।

१/१–न१, २, ५, ७–ध्यानं ततः——————; ग१, न४, त–ध्यानं सम्प्रति वक्ष्यामि ; न६, ग४–ध्यानं ते संप्रवक्ष्यामि ; न३– × × × × । १/२–ग२, न८, क– ——————तपोधने । १/३–ग१–ज्ञानमेव हि—————; ग४–ज्ञानमेकं हि————; ग५, ६, क–ध्यानमेव हि सर्वेषां ; न३– × × × × ।

२/१–न८–ध्यानमात्रस्वरूपस्य(?) ; न३– × × × × । २/२–न६–मनसा वेदनं———; न८–वन्दनं(?) मनसा—————; न३– × × × × । २/३–न४, ग३, ५, ६ क– ——————चैव ; न६–सुगुणं(?)—————चैव ; न३– × × × × । २/४–न१, २– —————बहुशः श्रुतम् ; ग२– ——————बहुलं स्मृतम् ; ग५– —————बहुधा श्रुतम् ; ग६, क– ——————बहुधा स्मृतम् ; न६– ————वेदनं(?)———; न४, ग३–द्विविधं वेदसम्मतम् ; न३– × × × × ।

३/१–न३– × × × × । ३/२–न४, ६, ८, ग३, ५– ———————द्विजोत्तमे ; न७– ——————द्विजोत्तम ; न३– × × × × । ३/३–ग२–तेषु च त्रीणि मुख्यानि ; ग१, ३–एषां त्रीण्येव मुख्यानि ; ज–एषु मुख्यतमास्तिस्रः ; न६–एषु त्रीण्येव मुख्यानि ; ग५–एषु मुख्यानि हि त्रीणि ; ग६, न८, क–एषु मुख्यानि च त्रीणि ; न३– × × × × । ३/४–ग२–एक एव च निर्गुणः(?) ; न३– × × × × ।

४/१–न३– × × × × । ४/२–ग१, २, ४, त–संधानं च——————; न६–संस्थानानि (?)———————; न३– × × × × । ४/३–न२–चत्तुना(?)———————; न७–चतुर्णां(?)————————; ग१, ५, न३– × × × × । ४/४––त—————कर्मात्मवेदनम्(?) ; ग३–जित्वा—————————; न८———तस्मात्कुर्यात्तु वेदनम् ; न३– × × × × ।

एक ज्योतिर्मय शुद्धं सर्वगं व्योमवद्दृढम् ।
अव्यक्तमचलं नित्यमादिमध्यान्तवर्जितम् ॥५॥

स्थूलं सूक्ष्ममनाकारमसंस्पृश्यमचाक्षुषम् ।
न रसं न च गन्धाख्यमप्रमेयमनौपमम् ॥६॥

आनन्दमजरं नित्यं सदसत्सर्वकारणम् ।
सर्वाधारं जगद्रूपममूर्तमजमव्ययम् ॥७॥

अदृश्यं दृश्यमन्तःस्थं बहिःस्थं सर्वतोमुखम् ।
सर्वदृक्सर्वतःपादं सर्वस्पृक् सर्वतःशिरः ॥८॥

५/१–न८– ————————सिद्धं ; ग२–एवं————————; ग३–एतज्ज्योतिर्मयं ———; न३– × × × × । ५/२–ग१–सर्वांगं——————; ग२–सर्वांगं व्योममध्य(–म–)म् ; न१, २, त–तत्सर्वं व्योमवद्दृढम् ; न३–× × × × । ५/३–अत्र पाठभेदानां बाहुल्यान्मूले च तेभ्यः कः स्यादिति निश्चयपूर्वकं निर्णेतुमशक्यत्वाद्य एको पञ्च लेखसमूहे विद्यते स स्वीकृतो ग्रन्थे, सर्वे च पाठा अत्र दीयन्ते:—न१, २, ५, ७, त–अव्यक्तमचलं नित्यं ; ग२, न४–अत्युच्चममलं ———; ग १, ५, क–अत्यच्छममलं———; ग४–अत्यच्छमकलं————; न८–अत्यच्छमचलं———; ग३–अत्युच्चमचलं———; ग६–अत्यन्तनिर्मलं———; न३, ६–प्रत्यक्षमचलं—————।

६/१-ग६– ———— –मनाकाशं ; न१, ५–– ———— –मना सम्यक्(?) ; न२, ७– ———— –मनाशक्यं(?) ; ग५, ६, न८, क–अस्थूलं सूक्ष्ममाकाशं(?) । ६/२–न८–असंवृत्य (?)——————; न१, २, ७–असंस्पर्श——————; त–असंस्पर्श्य——————; न५–समस्पर्श– ——————। ६/३–न१, ६, ७, ८, ग४, त– ——————गन्धाढ्यं ; ग६– × × × × । ६/४–न३, ४, ६, ग४–अप्रमेयमनूपमम् ; न७– ———— –मनौपदम्(?) ; न२–अप्रमेयं मनोमयम् ; न५, ग३, त– ——— –मनोपमम् ; न८– ——— –महोपमम् ; ग६– × × × × ।

७/१–ग५, क–आनन्दममलं———; ग२–आनन्दमचलं———; न३–आनन्दमक्षरं————; न६–अनन्तमजरं————; ग१, ६– × × × × । ७/२–न८–सदा-(?सद–) सत्सर्व————; न३–सर्वव (?सदसत्) सर्व——; ग१, ६– × × × × । ७/३–ग४–सर्वाकारं——————; ग२–सर्वाधारं जगद्व्याप्तं ; ग१, ६– × × × × । ७/४–ग४–अर्मूर्ति——————; न२–अर्मूतिमजमच्युतम् ; न५, ७–अमूर्तमजमच्युतम् ; न८–अमूर्तमय-(?-मज-) मव्ययम् ; ग१, ६– × × × × ; ग२–उत्तमं शिवमच्युतम् ।

८/१–न२, ७, ग५, ६, क– —————— –मध्यस्थं ; न३–सदृशं(?)————————। ८/२–न१, ६, ८, ग१, २, ४, ५, ६, त––– बहिष्ठं——————; क–बहिष्ठं विश्वतोमुखम् । ८/३–ग१, २–सर्वगं—————; न६–सर्व दिक्– ——————। ८/४–ग१, २–सर्वाक्षिः—————; ग३, ६–सर्वदृक्—————; ग४, न८–सर्वगं—————; न४–सर्वस्पृक् सर्वतं(?)शिवम् ।

ब्रह्म ब्रह्ममयोऽहं स्यामिति यद्वेदनं भवेत् ।
तदेतन्निर्गुणं ध्यानमिति ब्रह्मविदो विदुः ॥९॥

*अथवा परमात्मानं परमानन्दविग्रहम् ।
†गुरूपदेशाद्विज्ञाय पुरुषं कृष्णपिङ्गलम् ॥१०॥

ब्रह्म ब्रह्मपुरे चास्मिन्दहराम्बुजमध्यमे ।
अभ्यासात्सम्प्रपश्यन्ति सन्तः संसारभेषजम् ॥११॥

हृत्पद्मेऽष्टदलोपेते कन्दमध्यात्समुत्थिते ।
द्वादशाङ्गुलनालेऽस्मिंश्चतुरङ्गुलमुन्मुखे ॥१२॥

९/१-४–"ग५, ६" लेखयोरस्मिन्श्लोके पंक्तयोः क्रमविपर्ययो दृश्यते । ९/१–ग२– —————यस्यां(?) । ९/२–न२, ग३–इति तद्वेदनं———; न३–इति यद्विदं(?)———; ग५–इति यद्वेदनं धिया । ९/३–ग४, ६– ––– –न्निर्गुणध्यानं ; न३–तदेव निर्गुणध्यानं ; न५–तदेतत्त्रिगुणं ध्यानं । ९/४–न१, २, ६, ७, ८, त– ————योगविदो विदुः ; न५–परमानंद-विदो———।

*अत्र "न३" लेखे "अयं पंथा मुनिः श्रेष्ठ सांख्या संसारनाशनः।" इत्यशुद्धासम्बद्धा च पंक्तिः । "ग५, ६, क" इति लेखत्रयेऽप्यधिकाः पंक्तयः । ताः–ग५–ब्रह्म ब्रह्मपुरे चास्मिन्दहराब्दे[१] खमध्यमे। सत्यामृते[२] परानन्दे निर्गुणे परमात्मनि[३] ॥ तदेतन्निर्गुणं ध्यानमिति ब्रह्मविदो विदुः ॥ अन्ययोर्लेखयोस्तस्य पाठान्तराणिः––(१) ग६, क–दहराब्जे ; (२)-ग६, क–सत्येऽमृते ; (३) ग६, क–अत्रैकाधिका पंक्तिः । सा––"अदृश्ये दृश्यरूपेऽस्मिन्वेदनं परमं भवेत्" इति । तेन "ग५" लेखे त्रयः पंक्तयः, "ग६, क" लेखयोश्च चतुः पंक्तयोऽधिका अत्र ।

१०/१–न३–अपाय चमात्मानं(?) । १०/३–न६, ८–गुरूपदेशाद्विज्ञेयं । १०/४–न४, ग३–प्रकृतं—————। †अत्रैकाधिका पंक्तिः– न८, ग४–ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं महाद्युतिम् ।

११/१–ग१, ५, न३, त– —————वास्मिन् ; न८, ग४– —————गार्गि । ११/२–अस्य पादस्य ९ पाठभेदाः हस्तलेखेषु, ४ च मुद्रितपुस्तकेषु दृश्यन्ते । तेभ्यः ग१, ३, न३, ४–दहराम्बुजमध्यमे ; न१, ५, ८, त–दहराख्यस्य मध्यमे ; ग४–दहराब्जस्य मध्यमे ; ग६, क– दह-राब्जे खमध्यमे ; न६–दहराकाशमध्यमे-इति पंच शुद्धाः । शेषेभ्यः ग२–दहराख्यक(?ख–) मध्यमे ; ग५–दहराब्दे(?-ब्जे) खमध्यमे; न७–हृत्सख्यस्य तु (?हृदाख्यस्य तु) मध्यमम् (?मध्यमे) ; न२–हृत्सख्यस्य (हृदाख्यस्य) मध्यमम् (?मध्यमे)–एते हस्तलेखान्तर्गताः ; मु. पु, क. पु–देहराजे(?) सुमध्यमे ; मुं. पु–दहराख्ये स्व–(?ख–) मध्यमे ; न. पु.–देह बाह्ये(?) सुमध्यमे ; त्रि. पु.–देहे रुन्धन्खमध्यमे(?)–एते मुद्रितपुस्तकान्तर्गताः; एवमष्ट विकृतियुक्ताः । ११/३–ग२–अभ्यासात्तं —————; ग१–स्वधिया सं—————; न३–चेतसा सं—————। ११/४–ग१, ३, न८, क–सन्तस्त्वं च तथा कुरु ; ग५–सन्तस्त्वं तत्तथा कुरु ; ग६–सन्त——————सदा––; न४, ग३–मनस्त्वं च तथा————।

१२/१– न१–हृत्पद्मेऽष्टदलोपेतं(?) ; न८–हृन्मध्ये—————; न७–हृत्यग्रे(?)–ग३– हृत्पदाष्टतलोपेत(?) । १२/३–ग१, ४, न८– —————मानेऽस्मिन् ; न७– ————————माले(?)————; ग६, क– ——————नाभे(?)———। १२/४–न१, ६, त– ————— –सम्मुखे ; न२, ५– ———— –सन्मुखे ; न३– ———— –सम्मिते ; ग२– ———— –मुन्नते ; ग३– ———— –विस्तृते ।

प्राणायामैर्विकसिते केसरान्वितकर्णिके ।
वासुदेवं जगन्नाथं नारायणमजं हरिम् ॥१३॥

चतुर्भुजमुदाराङ्गं शङ्खचक्रगदाधरम्।
किरीटकेयूरधरं पद्मपत्रनिभेक्षणम् ॥१४॥

श्रीवत्सवक्षसं विष्णुं पूर्णचन्द्रनिभाननम् ।
पद्मोदरदलाभोष्ठं सुप्रसन्नं शुचिस्मितम् ॥१५॥

*

शुद्धस्फटिकसंकाशं पीतवाससमच्युतम् ।
पद्मच्छविपदद्वन्द्वं परमात्मानमव्ययम् ॥१६॥

प्रभाभिर्भासयद्रूपं परितः पुरुषोत्तमम् ।
मनसालोक्य देवेशं सर्वभूतहृदि स्थितम् ॥१७॥

१३/२–ग५, ६, क–वैराग्यान्वितकर्णिके । **१३**/३–न१, ५– ————————जगद्योनिं ; न७–× × × × । **१३**/४–न१, ५, ग२, ५, त, क– ————————————विभुम् ; न४, ग३–नारायणमनामयम् ।

१४/१–त– चतुर्भुजमहापद्मं ; **१४**/३–ग५–किरीटहारकुयूरं(?) ; क–किक्कटाहारकेयूरं । **१४**/४–ग५, ६, क–पद्मपत्रायतेक्षणम् ।

१५/१–न१, २, ५, ७, त– ——————————देवं; ग२– ————————श्रीदं; **१५**/१-२–क–× × × × × × × × ×। **१५**/३–न३– ———————— –दलं भोष्ठं(?); न८– ————— –दला-भाक्षं ; न१, २– ————————करांभोजं ; ग२–पद्मोत्पलदशां यासं(?) ; क–× × × × । **१५**/४–ग५–सूर्यकोटिसमप्रभम् ; क–× × × × ।

* अत्रैषाधिका पंक्तिः केषुचिल्लेखेषुः–न३, ४, ६, ग३, ५, ६–कौस्तुभोद्भासितोरस्कं वनमा-लाविभूषितम् ;. स एव "ग१"– ——————————वनमालाविराजितम् ।

१६/२–न४–पीतवासःसमन्वितम् ; ग३–पीतवाससमन्वितम् ; ग५, ६–सूर्यकोटिसमप्रभम् । **१६**/१-२– क–× × × × × × × × × । **१६**/३–न२, ५, ७–पद्मोपमपदद्वन्द्वं ; ग६–पद्मा-चिन्त्य(?)–पदद्वन्द्वं ; क–× × × × । **१६**/४– ग१, ३, ५, ६– ———————— –मीश्वरम् ; न३, ६–परमानन्दमीश्वरम् ; क–× × × × ।

१७/१–ग५, ६–प्रभाभिर्भाविसद्रूपम् ; ग४, न८–प्रभाभिर्भ्रामयद्रूपं(?) ; न६– ————— –र्भासिय-द्रूपं(?) ; ग३– —————र्भसियद्भूत्यं(?) ; क–× × × ×; न३–सुप्रभाभिर्भासयन्तं । **१७/२–ग३, क**–× × × × । **१७**/३–ग५, ६– ————————भूतेशं ; न६– ——————देवदेवेशं ; **न३–समस्तलोकदेवेशं** ; ग३, क–× × × × । **१७**/४–ग३, क–× × × × ।

सोऽहमात्मेति विज्ञानं सगुणं ध्यानमुच्यते ।

हृत्सरोरुहमध्येऽस्मिन्प्रकृत्यात्मककर्णिके ॥१८॥

अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते ।
ज्ञाननाले बृहत्कन्दे प्राणायामप्रबोधिते ॥१९॥

विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतोमुखम् ।
वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् ॥२०॥

तापयन्तं स्वकं देहमापादतलमस्तकम् ।
निर्वातदीपवत्तस्मिन्दीपितं हव्यवाहनम् ॥२१॥

दृष्ट्वा तस्य शिखामध्ये परमात्मानमक्षरम् ।
नीलतोयदमध्यस्थविद्युल्लेखेव भास्वरम् ॥२२॥

१८/१–ग५, ६–सोऽहमेवेति यद्धयानं ; ग३, क–× × × × । १८/२–न८–सगुणध्यान-मुच्यते ; ग३, क–× × × × । १८/३–ग३, क–× × × × । १८/४–ग६–प्रकृत्याकार–––––––; न३, ४–प्रकृत्यात्मनि––––––; न ६–प्रकृत्यान्वित–––; ग२–धर्मकर्मसमुत्थिते ; ग३, क × × × × ।

१९/१–ग५–ऐश्वर्याष्टदलोपेते ; ग३, क–× × × × । १९/२–न१, २, ५, ७–विकारैर्केसरैर्युते ; ग३–कर्णिकाकेसरैर्युते ; ग२–कर्णिकाकेररै-(?–केसरै-) र्युते ; न४–कर्णिकाया रसैर्युते ; क–× × × × । १९/३–ग४, ५, ६, न८– –––––––––महत्कन्दे ; न३, ग१– –––––––––महाकन्दे; न६–× × × × दे; क–× × × ×; ग३–––––––––बृहत्संद–(?बृहत्कन्दे); ग२–प्राणनाले प्रभाभिज्ञे । १९/४–ग५, ६–प्राणायामैः–––––––; न३, ६–प्रणवेन––––––; न४; ग३–प्राणायामप्रणोदिते ; क × × × × ।

२०/१–न३–विश्वा ++ वह्निरूपं ; क–× × × × । २०/२–ग१, न६– –––––––––सर्वतोमुखम् ; क–× × × × । २०/३–क–× × × × । २०/४–न१, २, ३, ४, ७–शिखातन्वित––––––; त– –––––––लम्बित–––––; ग२–शिखाभिर्युत––––––; क–× × × ×।

२१/१–न१–तावयन्तं–––––––––––; ग२–दीपयन्तं–––––––––; न३, क–× × × × । २१/२–न३, क–× × × × । २१/३–ग१, ४, ५, ६, न६, ८–निवातदीप–––––––; न३, क–× × × ×; ग३–पवतस्यां (?) × × × × । २१/४–ग३–देवितं(?)––––––––; न३, क–× × × × ।

२२/१–न४, ग३– –––––––––शिखावह्नेः(?) ; क–× × × ×। २२/२–न३, ४, ग१, ३, ६– ––––––– –मीश्वरम् ; क–× × × × । २२।३–न४, ८, ग५– –––––––––मध्यस्थं(?) ; न१, २, ७–नीलोत्पलस्य मध्यस्थं(?) ; न५–नीलोत्पल × × मध्यस्थं(?); क–× × × ×। २२/४–न२–विद्युल्लेखेवमीश्वरम्(?) ; त– –––––––––राजते ; न३–विद्युद्विक्षेपभास्करम्(?) ; ग१, क–× × × × ।

नीवारशूकवद्रूपं पीताभं सर्वकारणम् ।
ज्ञात्वा वैश्वानरं देवं सोऽहमात्मेति या मतिः ॥२३॥

सगुणेषूत्तमं ह्येतद्ध्यानं योगविदो विदुः ।
वैश्वानरत्वं सम्प्राप्य मुक्तिं तेनैव गच्छति ॥२४॥

अथवा मण्डले पश्येदादित्यस्य महाद्युतेः ।
आत्मानं सर्वजगतः पुरुषं हेमरूपिणम् ॥२५॥

हिरण्यश्मश्रुकेशं च हिरण्मयनखं हरिम् ।
कप्यासस्य समं वक्त्रं सृष्टिस्थित्यन्तकारणम् ॥२६॥

२३/१–ग१, न४, क–× × × × । २३/२–न३–पीताङ्गं———————; ग१–पीतं भास्वदणूपमम्; ग३–पीताभास्वत्यणूपमम्(?पीतं भास्वदणूपमम्); न४, क–× × × × । २३/३–ग४, न८–ध्यात्वा————————; क–× × × × । २३/४–ग१, ४, न३–सोऽहमेवेति——————; न६–सोऽहमित्येव——————; क–× × × × ।

२४/१–ग१– ————————ह्यत्र; न६– ————————चैतत्; ग४, न८–सगुणादुत्तमं ह्येतत्(?); न१, २, ५, ७–सगुणेषूत्तमेष्वेतत्(?); ग३–सगुणोत्तमं ह्येतत्; क–× × × × । २४/२–क × × × × । २४/३-४–क–× × × × × × × × × ।

२५/१–न१, २– ————————पश्यत्; त– ————————पश्यन्; न३, ६– ——————————ह्यस्मिन्; ग५, ६– —————मण्डलं—————; ग२– ————————मण्डलं तस्य(?); क–× × × × । २५/२–न१, ३– ——————————महाद्युतिः(?); न२, ७– ——————————महाद्युतिम्; न५– ——————————महाद्युतं; न६– ————————महाद्भुते(?); ग३– ————————महच्च्युते(?); क–× × × × । २५/३–ग५, ६– न८– ————————सर्वजगतां; ग४– ————————हेमजगतं(?); क–× × × × । २५/४–ग३– ————————प्रेमरूपिणम्; न३– ————————देहरूपिणम्; न६– ————————हंसरूपिणम्; क–× × × × ।

२६/१–न४–हिरण्यकेशश्मश्रुश्च; न३–हिरण्यश्रवणं देवं; क–× × × × । २६/२–न३–हिरण्यपुरुषं हरिम्; न७–हिरण्यनयनं हरिम्; क–× × × × । २६/३–अस्मिंश्चरणे बहुशो वैकल्पिकाः पाठा लेखेषु मुद्रितपुस्तकेषु च दृश्यन्ते । तेभ्यो यः सान्वर्थः स ग्रन्थे स्वीकृतस्तथापि स एव मूलग्रन्थे स्यान्नवेति निश्चयपूर्वकं कथयितुं न शक्यते। तस्मात्सर्वेऽपि त इहोद्धृता विदुषां विमर्शनाय स्वतन्त्रनिर्णयकरणाय च । ग१, २, त–कप्यासस्य समं वक्त्रं (कपेः गुदस्य समं वक्त्रं यस्य तमित्यर्थः); न१, ७–कप्यासनवद्दृष्टि; न२–कपाशामनवद्दृष्टिः (?); न५–कर्व्याशासनवद्दृष्टि(?); न६–कप्यास्यासनवद्युक्तं; ग४, न८–कनकाम्बुजवद्वक्त्रं; न४–कैलासहिमवद्वक्त्रं (?); ग३–कैलासपोतवद्वक्त्रं(?); न३–रथासनं चन्द्रवक्त्रं; ग५, ६–विकासिपद्मवदनं; क–× × × × इति लेखेषु; त्रि. पु.–कप्यास्यासनमन्वक्त्रं; मुं. पु–कप्यासनं चतुर्वक्त्रं; न. पु–यथासनं (?रथासन-) समंवक्त्रं; मु. पु–रथासनं चतुर्वक्त्रं–इति मुद्रितपुस्तकेषु । २६/४–न१, २, ५, ७, ८, ग१, ३, त– ————————कारिणम्; ग२–सृष्टिसंहारकारणम्; क–× × × × ।

पद्मासनस्थितं सौम्यं प्रबुद्धाब्जनिभाननम् ।
पद्मोदरदलाभाक्षं सर्वलोकभयप्रदम् ॥२७॥

जानन्तं सर्वदा सर्वमुन्नयन्तं च धार्मिकान् ।
भासयन्तं जगत्सर्वं दृष्ट्वा लोकैकसाक्षिणम् ॥२८॥

सोऽहमस्मीति या बुद्धिः सा च ध्यानेषु शस्यते ।
एष एव तु मोक्षस्य महामार्गस्तपोधने ॥२९॥

ध्यानेनानेन सौरेण मुक्तिं यास्यन्ति सूरयः ।

भ्रुवोर्मध्येऽन्तरात्मानं भारूपं सर्वकारणम् ॥३०॥

२७/१–ग३, न७–पद्मासने स्थितं–––; न८–पद्मासनस्थं सौम्यं च ; न३–पद्मासनगतं सौम्यं ; त, क–× × × × । २७/२–ग१–प्रफुल्लाब्ज–––––––––; ग२–प्रफुल्लकमलेक्षणम् ; न३–प्रबुद्धाब्जनिभेक्षणम् ; न६–प्रसिद्धाब्जनिभाननम् ; त, क–× × × × । २७/३–न१, २, ३, ४ ५, ७, ग१–पद्मोदरदलाभासं ; ग५, ६, न८–पद्मोत्पलविशालाक्षं ; त, क– × × × × ।, २७/४–अस्मिश्चरणे पाठभेदास्त्रय एव । तथापि "सर्वलोक" शब्दात्पश्चात् "भय" शब्दो "अभय" शब्दो वा वास्तविक इति निश्चयपूर्वकं निर्णेतुं पूर्वापरसन्दर्भादि न किमपि चिह्नं सहायकारी । तेनोपलब्धसाधनानि कथं विभक्तानीत्यत्र प्रदर्श्यते:––न१, २, ग१, २, ३, ४, ५, त्रि. पु., मुं. पु., न. पु.,–सर्वलोकभयप्रदम् ; न४, ५, ६, ७, ८, ग६, मु. पु. क. पु.–सर्वलोकाभयप्रदम् ; न३–सर्वलोकभयावहम् ; त, क– × × × × ।

२८/१–ग१, ५, ६, त–विजानन्तं सदा सर्वं; ग२–विजानन्ति(?)सदा सर्वं ; ग४–विजानन्तु(?)–––––––––; ग३–जानन्तः सर्वदा सर्वं ; क– × × × ; न१, २, ५, ७–सदा सर्वनिजानन्दं । २८/२–अस्मिंश्चरणे पाठभेदानां बाहुल्यं परस्परविसंगतता च लेखेषु दृश्येते । तेन सर्वेऽपि भेदा अत्र प्रदर्श्यन्ते। न १, ५, ७, ग१, ३, त–उन्नयन्तं च धार्मिकान्; न१–प्रणयन्तं च––––––; न४–अनुयंतंच–––––––; ग२–मुनयस्तं च धार्मिकाः ; मु. पु., क. पु.–स एव स्वीकृतः पाठः ; त्रि. पु.–× × × धार्मिकाः ; मुं पु; न, पु.–अनन्तं चैव धार्मिकाः ; न३, ग४, ६–उन्नयन्तं च धार्मिकम् ; ग५-आनयन्तं च धार्मिकम्, न८–ऋङ्ङयंतं(?)च धार्मिकम् ; न६, क– × × × × । २८/३–न६, क– × × × × । २८/४–न८– ––––––––––साक्षिकम् ; क– × × × × ।

२९/१–ग२, ३, ६, न५– –––––मात्मेति–––––––; क–× × × ×। २९/२–ग२––––––––––––कथ्यते(?) ; न१,–साऽपि–––––––शक्यते(?) ; न२, ७–साऽपि–––––––शस्यते ; ग५–सात(?सा च)–––––––––––; ग१– –––––––ज्ञानेषु शस्यते ; ग३– ––––––––––धन्येषु(?)–––––––; ग४–सर्वप्राणिषु–––––––; न८–सर्वप्राणेषु (?–प्राणिषु)––––––; ग६–एतद्धयानेषु––––––; क–× × × ×। २९।३–ग३– ––––––––––मुक्तस्य ; न६–एक एव तु–––––; ग५, ६–एषोपायस्तु––––––; क–× × × × । २९।४–न२, ७–सम्यग्मार्ग––––––––; न१, ५–मार्गः प्रोक्त–––––––––; क–× × × × ।

३०/१–ग२– ––––––––––यान्ति हि। ३०/१-२–क–× × × × × × × × × ; ग५, ६–अभ्यासेनैव सौरेण मुक्तिं यास्यन्ति योगिनः । ३०/३–न१, २–उच्चैर्मध्येऽन्तरात्मानं ; क–× × × × । ३०/४–ग३–भास्वद्रूपं नकारिणाम्(?) ; ग५–ओजोरूपिणमीश्वरम् ; ग६–महोरूपिणमीश्वरम् ; क– × × × × ।

स्थाणुवन्मूर्धपर्यन्तं मध्यदेहात्समुत्थितम् ।
जगत्कारणमव्यक्तं ज्वलन्तममितौजसम् ॥३१॥

मनसालोक्य सोऽहं स्यामित्येतद्ध्यानमुत्तमम् ।

अथवा बद्धपर्यङ्के शिथिलीकृतविग्रहे ॥३२॥

शिव एव स्वयं भूत्वा नासाग्रारोपितेक्षणः ।
निर्विकारं परं शान्तं परमात्मानमीश्वरम् ॥३३॥

भारूपममृतं ध्यायेद्भ्रुवोर्मध्ये वरानने ।
सोऽहमेवेति या बुद्धिः सा च ध्यानेषु शस्यते ॥३४॥

अथवाष्टदलोपेते कर्णिकाकेसरान्विते ।
उन्निद्रहृदयाम्भोजे सोममण्डलमध्यमे ॥३५॥

३१/१–ग१, ३, न३, ४, ५– ——— –न्मूर्ध्नि——; ग६–स्थाणुं चामूर्ध————; ग२–स्थाणु वा सर्वपर्यन्तं(?) ; क–× × × × । **३१**/२–न३,–मध्ये देहात्समुत्थितम् ; ग३–मध्ये देहे————; ग६–देहमध्ये————; क–× × × × ; न८–धारयेदचलं स्थिरम् । **३१**/३––ग२–जगत्कारणमध्यस्थं ; क–× × × × । **३१**/४–न३–ज्वलन्तममितोजसम् ; ग५–ज्वलन्तमिव तेजसा ; ग६–ज्वलन्तमिव तेजसम् ; न१, क–× × × × ।

३२/१–न१, क–× × × × । **३२**/२–ग२, ३– ——— –ज्ज्ञानमुत्तमम् ; न५–आदित्ये ध्यानमुत्तमम् । **३२**/३–न३– ————पर्यंकः ; न४, ग१, ३, त– ———— पर्यङ्कं ; ग२– ————पर्यङ्कात् ; न६– ——फणिपर्यङ्कं ; क–× × × × । **३२**/४–न३, न६– ————विग्रहः ; ग१, ३, ५, ६, न४, त– ————विग्रहम् ; ग२–अशिनीकृत–विग्रहः(?) ; क–× × × × ।

३३/१–ग२–नाडीद्वयं निगृह्यम्चं(?); न६–हरिरेव स्वयं भूत्वा; न८–शिकटीन(?)———; क–× × × × । **३३**/२–न१, २, ३, ४, ५, ग१, ३––नासाग्रे रोपितेक्षणः ; न६– ——— रुपितेक्षणः; (?) ; ग२– ————रोपितेक्षणम् ; ग४–नासाग्रन्यस्तलोचनः ; न८–नासाग्रन्यस्तलोचने ; क × × × × । **३३**/३–न६–निर्विकारपदं————; ग३–निराकारं परं——; क– × × × × । ३३।४–न१, ५, ७–परमात्मानमच्युतम् ; ग२–परमात्मानमव्ययम् ; क–× × × × ।

३४/१-२–न१, २, ५, ७, क–× × × × × × × × × । ३४।१–ग६–भावयन्नत्र तद्धयायेत् ; न६–भारूपमच्युतं ध्यायेत् । ३४।३–४–न१, २, ५, ७, क– × × × × × × × × × । ३४।४–न८–सा ध्यानेषु प्रशस्यते ; ग२–सा च ध्यानेन कथ्यते(?) ; ग६–सा तद्धयानेषु शस्यते ।

३५/१-२–क–× × × × × × × × । **३५**/१–न६– ——षोडशोपेते ; ग४– ———त्मदलोपेते ; ग३–× × ×ष्टदलोपेते । **३५**/२–न३, ७– ——केशरान्विते । **३५**/३–४–क–× × × × × × × × × । **३५**/३–न३, ८, ग२, त–उन्निद्रहृदयाम्भोजे ; ग३–उन्मील्य———; न२–उँन्निदे(?उन्निद्रे) हृदयांभोगे (?–भोजे) । **३५**/४–न१, ४, ६, ग२– ————मध्यगे ; ग५, ६–साग्निमण्डलमध्यमे ।

स्वात्मानमर्भकाकारं भोक्तृरूपिणमव्ययम् ।
सुधारसं विमुञ्चद्भिः शशिरश्मिभिरावृतम् ॥३६॥

षोडशच्छदसंयुक्तशिरःपद्मादधोमुखात् ।
निर्गतामृतधाराभिः सहस्राभिः समन्ततः ॥३७॥

प्लावितं पुरुषं तत्र चिन्तयित्वा समाहितः ।
तेनामृतरसेनैव साङ्गोपाङ्गकलेवरे ॥३८॥

अहमेव परं ब्रह्म परमात्माहमव्ययः ।
एवं यद्वेदनं तच्च सगुणं ध्यानमुच्यते ॥३९॥

एवं ध्यानामृतं कुर्वन् षण्मासान्मृत्युजिद्भवेत् ।
वत्सरान्मुक्त एव स्याज्जीवन्नेव न संशयः ॥४०॥

३६/१-२–क–× × × × × × × × × । ३६/१–न६–आत्मान————————; ग१–स्वात्मानममलाकारं; ग४, न८– स्वात्मानं विहगाकारं; ग६– ———————— –मक्षयाकारं । ३६/२–ग१, ४, त, न८– ——————— –मक्षरम्; ग५, ६– ——————— –मक्षयम्; ग२–हेमरूपिणमक्षरम्; न४–कृष्णरूपिणमव्ययम् । ३६/३–न२, ७, त–सुधासारं———————; न३, ४–सुधारसं विमुंचन्तं; ग३– ————————–विमलवत्(?) । ३६/४–ग१–सितराजिभिरावृतम्; न४–शशिरश्मिकराकृति (?) ।

३७/१-२–न३, क–× × × × × × × × × । ३७/१-न१, २, ४, ५, ७, ग१, २, त–षोडशच्छदसंयुक्तं; ग४, ५–षोडशस्वरसंयुक्तात्; ग६–षोडशस्वरसंयुक्तं । ३७/२–ग२–शिरः सितपदोपमम्; न४–करे पद्ममधोमुखम् । ३७/३–४–क–× × × × × × × × × । ३७/३–ग२–निर्वातामृत–(?निर्गतामृत–)———————। ३७/४–ग५, ६–समृद्धाभिः——————————।

३८/१-२–क–× × × × × × × × × । ३८/१–ग२–प्रापितं पुरुषं———————। ३८/२–न२– —————————–समाहितम् । ३८/३-४–क–× × × × × × × × × । ३८/४–न५– ————————————–कलेवरम्; न८, ग२, त–साङ्गोपाङ्गे कलेवरे; न४–साङ्गोपाङ्गकलेवरः; न२, ३, ६, ग१, ३, ५–साङ्गोपांङ्गकलेवरे ।

३९/१-२–क–× × × × × × × × × । ३९/२–न३, ४, ग३–परमात्माहमव्ययम्(?); न६–परमात्मानमव्ययम्(?); ग५–परमात्माकमव्ययम्(?) । ३९/३-४–क– × × × × × × × × । ३९/३–न५–७– ——————————–तत्र । ३९/४–न२, ५, ७, ग१, ४, ५–सगुण-ध्यान———————; ग३–सुगुणं(?)——————————।

४०/१-२–क–× × × × × × × × × । ४०/१-न३– ——————ध्यानमतं(?)———; न४– ———————ध्याने मतं———————; न६–एतद्ध्यानामृतं———————; ग५, ६, न८–एवं ध्यानमिदं——————। ४०/२–ग३–वर्ण(?) × × × –द्भवेत् । ४०/३-४–क– × × × × × × × × × । ४०/३–न६–वत्सरान्मृत्युदेवस्या × (?); ग१–संसारान्मुक्त———————। ४०/४–न२–जीवंस्तेन——————————; न७–जीवस्तेन(?)——————————।

जीवन्मुक्तस्य न क्वापि दुःखावाप्तिः कथंचन।
किं पुनर्नित्यमुक्तस्य मुक्तिरेव हि दुर्लभा ॥४१॥

तस्मात्त्वं च वरारोहे फलं त्यक्त्वैव नित्यशः ।
विधिवत्कर्म कुर्वाणा ध्यानमेव सदा कुरु ॥४२॥

अन्यानपि बहून्याहुर्ध्यानानि मुनिसत्तमाः ।
मुख्यान्युक्तानि चैतेभ्यो जघन्यानीतराणि तु ॥४३॥

सगुणं गुणहीनं वा विज्ञायात्मानमात्मनि ।
सन्तः समाधिं कुर्वन्ति त्वमप्येवं सदा कुरु ॥४४॥

इति श्रीयोगयाज्ञवल्क्ये नवमोऽध्यायः ॥

४१/१-२—ग१, क— × × × × × × × × × । ४१/१-न३-जीवन्मुक्तौ न वै क्वापि । ४१/३-४—ग१, क—× × × × × × × × × । ४१/३—ग४— ———नित्ययुक्तस्य । ४१/४—न८—मुक्तिरेव ह्यदुर्लभा(?); ग५, ६—मुक्तिरेव न दुर्लभा; न१, २, ५—योगिनो विदितात्मनः; न७—योगिनो विहितात्मनः(?) ।

४२/१-२—न२, ५, ७, ग१, क— × × × × × × × × × । ४२/२—न३— ————— त्यक्त्वा च————; ग५— ———त्यक्त्वेह————; ग२— ———तत्रैव(?त्यक्त्वैव) निश्चला । ४२/३-४—ग१, क— × × × × × × × × × । ४२/३—न१, २, ५, ग२, त—कर्माणि विधिवत्कृत्वा; ग४, न८—कर्माणि विधिवत्कुर्यात् । ४२/४—न७—ध्यानमेवं—————।

४३/१-२—ग१, क—× × × × × × × × × । ४३/२—न३— —————मुनिसत्तमा(:); न४, ग३— ———————मुनिसत्तमे; ग५, ६—मर्त्यानां मुनिसत्तमाः । अस्य मुद्रितपुस्तकेषु दृश्यमाणाः पाठा अपि विचारार्हा इति मत्वात्र दीयन्तेः-त्रि. पु.— ——————मुनिसत्तमाः; मुं. पु., न. पु.— —————मुनिपुङ्गवाः; मु. पु., क. पु.—वैदिकानि द्विजोत्तमाः । ४३।३-४—ग१, क— × × × × × × × × × । ४३/३—न६, ग५— ——————वै तेभ्यो; न३—मुख्यान्मुक्तानि (?—न्युक्तानि) चैतेभ्यो; न१, २, ७—मुख्यान्युक्तानि चैतानि; न५— —————— चेतानि; ग२—मुक्तानि (?मुख्यान्युक्तानि) चैतानि । ४३/४—न२, ४, ५, ६, ७, ग४, ५— ————————तु; न८—बह्वन्यानीतराणि तु ।

४४/१-२—ग१, क—× × × × × × × × × । ४४/१—न२, ७— ——————च; न१—सगुणे—————च; न८—सगुणं निर्गुणमपि; ग४—सगुणं निर्गुणं वापि । ४४/२—ग४—विज्ञेयात्मानमात्मनि । ४४/३-४—ग१, क— × × × × × × × × × । ४४/३—न१, २, ७—मनयः—————। ४४/४—न३— —————समा कुरु; ग५— —————तथा कुरु ।

दशमोऽध्यायः

*याज्ञवल्क्य उवाच--

समाधिमधुना वक्ष्ये भवपाशविनाशनम् ।
भवपाशनिबद्धस्य यथावच्छ्रोतुमर्हसि ॥१॥

समाधिः समतावस्था जीवात्मपरमात्मनोः ।
ब्रह्मण्येव स्थितिर्या सा समाधिः प्रत्यगात्मनः ॥२॥

ध्यायेद्यथा यथात्मानं तत्समाधिस्तथा तथा ।
ध्यात्वैवात्मनि संस्थाप्यो नान्यथात्मा यथा भवेत् ॥३॥

दशमोऽध्याय : ॥

* न५–श्री याज्ञवल्क्य उवाच ; ग४–श्री भगवान्याज्ञवल्क्यः ; न६, ८–श्री भगवानुवाच ; ग६–ओम् भगवान् ; न१, २, ३, ७, ग१, २, ५, त, क–× × × × ।

१/१-२–क– × × × × × × × × × । १/१–ग२– --------विधिना-----; न१, ५– --------ते प्रवक्ष्यामि ; न२, ७– ------- –मथ वक्ष्यामि । १/२–न३– --------विमोचनम् ; न४– -----------विनाशनम् ; ग२– ------पापप्रणाशनम् ; ग१, त– ------पापविनाशनम् ; ग६–श्रृणु पापविनाशनम् ; न१, २, ५, ७–× × × × । १/३-४–क–× × × × × × × × ×। १/३–ग२–भवपाशविनाशाय ;–न१, २, ५, ७–× × × × । १/४–न१–यथावच्छ्रोतुमिच्छसि (?) ; ग५–यथावज्ज्ञातुमर्हसि ।

२/१-२–क– × × × × × × × × × । २/१–न१, २, ७, ग५, ६–समाधिस्तु समावस्था । २/३-४–क–× × × × × × × × × । २/३–न४, ६, ७, ग३– -----------स्थितिर्वा सा ; ग५, ६–ब्रह्मण्यवस्थितिर्या सा ; ग४–ब्रह्मणा अस्तिति–(?ब्रह्मण्यवस्थिति-) र्या सा ।

३/१-२–न१, क–× × × × × × × × × । ३/१–न३–ध्यायद्यथा-----; न२, ४, ५, ६, ७, ८, ग१, २, ३, ४, ५,, ६, त–ध्यायन्यथा--------। एवं लेखेषु । मुद्रितपुस्तकेषु तु–त्रि. पु., मुं. पु. मु. पु.–ध्यायन्यथा------; क. पु.–ध्यायद्यथा– ------; न. पु.–ध्यायेद्यथा-------- इति स्थितिः । तेभ्य अन्तिम एव ग्रन्थसन्दर्भे युक्त इति मत्वा सः स्वीकृतः । ३।२–न४–समाधिस्तु तथा तथा ; ग६–तत्समाधिस्तु तत्तथा । ३/३-४–क–× × × × × × × × × । ३/३–ग१, ३, ४, ६, न५, ८, त– -------------संस्थाप्य(?प्यो) ; न३–ध्यात्मा(?ध्यात्वा) चात्मनि संस्थाप्य (?प्यो) ; न४–ध्यात्वात्मनि सुसंस्थाप्यो ; न१–ध्यात्वैवमात्मनि स्थाप्यो ; ग५–ध्यात्वेवा-(?ध्यात्वैवा-)-त्मनि सुस्थाप्य (प्यो) ; न२, ७–ध्यात्वैवात्मनि स्थंयो (?संस्थाप्यो) । ३/४–न३–तान्यथात्मा (?नान्यथात्मा);---------न४–नन्यथात्मा (?नान्यथात्मा) यज्ञो(?)यतो; ग५–नान्यथात्मा यतो------; ग६–नान्यथात्मा ह्यतो------; ग४–नियतात्मा यथा------; न८–नियतात्मा यतो-----; ग२–नान्यथात्मा वशो------; न२–नान्यथात्मा यथा भवत् (?भवेत्) ।

एवमेव तु सर्वत्र यत्प्रपन्नस्तु यो नरः ।
तदात्मा सोऽपि तत्रैव समाधिं समवाप्नुयात् ॥४॥

सरित्पतौ निविष्टाम्बु यथाभिन्नतयान्वियात् ।
तथात्माभिन्न एवात्र समाधिं समवाप्नुयात् ॥५॥

एतदुक्तं भवत्यत्र गार्गि ब्रह्मविदां वरे ।
कर्मैव विधिवत्कुर्वन्कामसंकल्पवर्जितम् ॥६॥

वेदान्तेष्वथ शास्त्रेषु सुशिक्षितमनाः सदा ।
गुरुणा तूपदिष्टार्थं युक्त्युपेतं वरानने ॥७॥

विद्वद्भिर्धर्मशास्त्रज्ञैर्विचार्य च पुनः पुनः ।
तस्मिन्सुनिश्चितार्थेषु सुशिक्षितमनाः सदा ॥८॥

४/१-२—क— × × × × × × × × × । ४/२—न१, २, ४, ५, ७, ग३, त—यथारूपस्तु ———; ग६—यः प्रपन्नस्तु———; न६—यत्प्रसन्नस्तु————; ग१—यत्प्रयत्नस्तु———। ४/३-४—क— × × × × × × × × × । ४/३—न१, ६, ग३—तथात्मा————; ग४—तदात्मनोऽपि ———।

५/१-२—न१, ५, त, क— × × × × × × × × × । ५/१—ग२—सरित्पतो————; ग५—सरित्पतौ निविष्टात्तु; न३—स × × × तौ निविष्टात्तु; ग१—सरित्पतौ निविष्टाम्भः; न८—सरिद्वरनिविष्टाम्बु; ग३—सरित्पतौ विशिष्टाम्बु(?); न४—सरित्पतौ गतं तोयं। ५/२—अत्र मूललेखे कः पाठो भवेदिति निर्णेतुमशक्यत्वात् सर्वे दृश्यमाणाः पाठा दीयन्ते । न६,, ८—यथा भिन्न-तयान्वियात्; न४— ————भवेत्; ग३—यथाभिन्नालयस्त्वया(?); ग२—यथाभिन्नं फलं त्वियात्; न२, ७, ग४— ————लयं————; ग१, ५, ६, न३—यथा लवणतामियात्; त्रि. पु.—यथाभिन्नं फलं त्वियात्; मुं. पु., न. पु.— ————लयं———; मु. पु—यथाभिन्नत्वमाप्नुयात्; क. पु.—× × × × ×। ५/३-४—न५, त, क—× × × × × × × × ×। ५/३—ग१, न७, ८—तथात्म-(?तथात्मा-) भिन्न————; न१—तथात्म-(?तथात्मा-) भिन्न तत्रैव; न३—तथात्माभ्यन्न (?-भिन्न) एवात्र; ग२—तथात्वभिन्न एवात्र; ग५—तथाभिन्न(?)एवात्र ।

६/१-२—क—× × × × × × × × × । ६/१—त— ————भवेदत्र; न८— ———————भवत्यग्रे। ६/२—ग३— ————यनें(?)। ६/३-४—क—× × × × × × × × ×। ६/३—ग५, ६—कर्मैवं————; न८—कर्तैव(?कर्मैवं)————; न३, ग४—कर्मैव विधिवत्कुर्यात् ।

७/१-२—क— × × × × × × × × × । ७/१—ग१, ४—वेदान्तेष्वर्थशास्त्रेषु; न३, ४, ६, ग३—वेदान्ते सर्वशास्त्रेषु(?) न८—वेदान्तेषु च शास्त्रेषु; ग६—वेदार्थेष्वर्थशास्त्रेषु । ७/३-४—क—× × × × × × × × × । ७/३—न१,, ४, ग४, ६, ८— ————चोपदिष्टार्थं; न३————चोपदिष्टार्थो; ग५— ————चोपदिष्टं यत्; ग२— ————नोपदिष्टार्थं (?)। ७/४—ग६—युक्त्यापेतं(?)————; ग२—युक्तं ह्यतद्वरानने; न३—मुक्तिमेति वरानने ।

८/१-२—क—× × × × × × × × × । ८/१—न१, ३, ४, ५, ७, त—विद्वद्भिः सर्वशास्त्रज्ञैः; ग२—विद्वद्भिर्वेदशास्त्रज्ञैः । ८/२—न२—विचार्यैवं————। ८/३-४—क—× × × × × × × × ×। ८/३—न१, २, ५—तस्मिन्विनिश्चितार्थे तु; त—तस्माद्विनिश्चितार्थेषु; न३—तस्मिन्सुनियतार्थे तु; ग१, ३, ६, न६—तस्मिन्सुशिक्षितार्थेषु; ग २—निश्चितार्थेषु तेष्वेव ।

योगमेवाभ्यसेन्नित्यं जीवात्मपरमात्मनोः ।

ततस्त्वाभ्यन्तरैश्चिन्हैर्बाह्यैर्वा कालसूचकैः ॥९॥

विनिश्चित्यात्मनः कालमन्यैर्वा परमार्थवित् ।
निर्भयः सुप्रसन्नात्मा मर्त्यस्तु विजितेन्द्रियः ॥१०॥

स्वकर्मनिरतः शान्तः सर्वभूतहिते रतः ।
प्रदाय विद्यां पुत्रस्य मन्त्रं च विधिपूर्वकम् ॥११॥

संस्कारमात्मनः सर्वमुपदिश्य तदानघे ।
पुण्यक्षेत्रे शुचौ देशे विद्वद्भिश्च समावृते ॥१२॥

९/१-२–क– × × × × × × × × × । ९/१–ग४, न८–तस्मिन्नेवाभ्यसेदैक्यं । ९/२–त–जीवात्मपरमात्मवित् ।

१०/१-२–त, क– × × × × × × × × ×। १०/१–ग२– ————————काल:(?) ; न३– ————————कामं(?); न६–विनिश्चितात्मधीः(?)————; ग३–विनिश्चितात्मनः(?) कालं । १०/२–ग२–अन्ये वा(?)————————; न३–निवार्णपरमार्थवित् । १०/३–४–क– × × × × × × × ×। १०/३–ग३–निर्भयस्तु प्रसन्नात्मा । १०/४–अस्मिंश्चरणे बहवः पाठभेदाः हस्तलेखेषु दृश्यन्ते। मुद्रितपुस्तकेष्वपि त्रयः सन्ति। तेभ्य एक ८ हस्तलेखेष्वस्ति तथापि तेन वाक्यात्सम्यगर्थबोधो न भवतीति मन्ये। तेन द्वाभ्यां हस्तलेखाभ्यां प्राप्तः पाठोऽत्र स्वीकृतः समीचीनत्वहेतुमवलम्ब्य, सर्वे च भेदा अत्र प्रदर्श्यन्ते । न१, २–मर्त्यस्तु————; ग१, ४, ५, ६, न३, ७, ८ त–मृत्योस्तु————————; त्रि. पु.–मृत्योस्तु————————; ग२–भृत्या तु(?)————————; न४, ग३–कुर्वीत————————; न६–कुवति (?कुर्वीत)————————; न५–ह्यर्थविच्च जितेन्द्रियः ; मुं. पु., न. पु–भूतेषु विजितेन्द्रियः ; मु. पु., क. पु.–भूत्वा तु————————।

११/१-२–क– × × × × × × × × × । ११/१–ग१, ५, ६, न४, ६, ८–स्वधर्मनिरतः ————; न२–स्वकर्मनिरतः शान्तं(?) । ११/३–४–क– × × × × × × × × । ११/३-ग५, ६– ————योगं————। ११/४–ग२–समन्त्रं– ————————।

१२/१-२–क– × × × × × × × × × । अत्र यद्यपि ७ हस्तलेखेषु त्रि. पु. च दृश्यमाणः पाठः स्वीकृतः समीचीनत्वदृष्ट्या तथापि सर्वेऽपि पाठभेदा अत्र दीयन्ते । १२/१–न१, २, ५, ७, ८, ग४, त, त्रि. पु.–संस्कारमात्मनः सर्वं ; ग१– ————————कार्यं ; न३–संस्काराद्यात्मनः कार्यं ; न६–संस्काराद्यात्मनः सर्वं ; ग५, ६–संस्कारान्वा तथा सर्वान् ; ग३–संस्कारेणात्मनः सर्वं(?) ; न४–संस्कारेणात्मनं(?)सर्वं; मुं पु.–संस्कारानात्मनः सर्वान् ; न. पु.–संस्काराण्यात्मनः सर्वाणि(?) ; मुं. पु., क. पु.–संस्काराण्यात्मनः सर्वं(?) ; ग२–संस्कारस्यात्मनः पूर्वं । १२/२–न२, ३– ————तदानघे ; ग१, २, त्रि. पु.————————तदानध ; न६–तदानधः ; ग४–————————तथानधः ; ग५– ————————तथानध(?) ; न१, ५, ७, ८, ग६, न. पु., मुं. पु. मु. पु., क. पु.–तथानधे ; न४, ग३– ————————यथाविधि । १२/३-४–क– × × × × × × × × । १२/४–ग१, ५–विद्वद्भिः सुसमावृते ।

भूमौ कुशान्समास्तीर्य कृष्णाजिनमथापि वा।
तस्मिन्सुबद्धपर्यङ्को मन्त्रैर्बद्धकलेवरः ॥१३॥

आसने नान्यधीरास्ते प्राङमुखो वाप्युदङमुखः ।
नवद्वाराणि संयम्य गार्ग्यस्मिन्ब्रह्मणः पुरे ॥१४॥

उन्निद्रहृदयाम्भोजे प्राणायामैः प्रबोधिते ।
व्योम्नि तस्मिन्प्रभारूपे स्वरूपे सर्वकारणे ॥१५॥

मनोवृत्तिं सुसंयम्य परमात्मनि पण्डितः।
मूर्ध्न्याधायात्मनः प्राणं भ्रुवोर्मध्येऽथवानघे ॥१६॥

कारणे परमानन्दे आस्थितो योगधारणाम्।
ओमित्येकाक्षरं बुद्धया व्याहरन्सुसमाहितः ॥१७॥

१३/१-२—क— × × × × × × × ×। १३/१—ग३—भौमाकाशान्समास्तीर्य(?)। **१३**/३-४—क—× × × × × × × × × । **१३**/३—न१, २, ५, ७, ग२—तस्मिंस्तु बद्धपर्यङ्के ; ग१, ३, ४, ५, ६, त—तस्मिंस्तु बद्धपर्यङ्को । **१३**/४—न३, ग६—मन्त्रैर्बद्धकलेवरं(?) ; न४—मन्त्रैर्बध्द्वा कलेवरं । † न१, २, ५, ७, ग२—मन्त्रैर्न्यस्तकलेवरे ।

१४/१-२—क—× × × × × × × × × । **१४**/१—न१, २, ४, ५, ६, ग३— ———— ऽनन्यधीरास्ते ; न७— ————ननाधीरास्ते(?) ; ग२—आसीनः स्वस्थचित्तस्तु ; ग५, ६—आसने ह्यधिरुह्यास्ते । **१४**/२—न७— ————वा उदङमुखः (?उदङमुखः) । **१४**/३-४—क—× × × × × × × × × । **१४**/३—ग१—पुनर्द्वाराणि———।

१५/१-२—क—× × × × × × × × × । **१५**/१—ग३—उन्मिन्न—(?)————; न२—उभ्दिदृ(?)———। **१५**/२—त—प्राणायामैर्विबोधिते ; ग१, न७, ८—प्राणायामप्रबोधिते ; ग२—प्राणेन प्रतिबोधिते ; न१, ५—प्राणेनैव प्रबोधिते ; न२, ४—प्रणवेन प्रबोधिते ; न६—प्रणवेन प्रचोदिते ; ग३—प्रणवेन सुबोधिते । **१५**/३-४—क— × × × × × × × × × । **१५**/४—न१, ७ ग४, ५—त्वरूपे (?त्वंरूपे)————; न३—त्वंरूपे————; न८—व्यरूपे(?)————।

१६/१-२—क—× × × × × × × × × । **१६**/१—न१, २, ५, ७—मनोवृत्तीः————; न३—मनोवृत्तं————; न४—मनो हृदि————। **१६**/२—ग१, ३,— ————पण्डिते । **१६**/३—४—क— × × × × × × × × × । **१६**/३—ग१— ————प्राणान् । **१६**/४—ग४, ६, न८— ————वरानने ; न३— ————तथानघे ; ग२— ————ऽथवा भवेत् ; न४, ग३— ————ऽथवा नयेत् ।

१७/१-२—न१, २, ग१, २, ४, त, क— × × × × × × × × × । **१७**/१—न४—कारणं परमानन्दं(?) ; ग३—कारणं (?कारणे) परमानन्दे । **१७**/२—ग३— ————योगधारणे । **१७**/३-४—क— × × × × × × × × × । **१७**/३—न१, ३, ४, ८, ग५, ६— ———————ब्रह्म । **१७**/४—न४, ग३—व्याहरन्मुनिसत्तमे ।

शरीरं संत्यजेद्विद्वानात्मैवाभून्नरोत्तमः ।
यस्मिन्समभ्यसेद्विद्वान्योगेनैवात्मदर्शनम् ॥१८॥

तदेव संस्मरन्विद्वांस्त्यजेदन्ते कलेवरम् ।
यं यं सम्यक्स्मरन्भावं त्यजत्यन्ते कलेवरम् ॥१९॥

तं तमेवैत्यसौ भावमिति योगविदो विदुः ।
त्वं चैवं योगमास्थाय ध्यायन्स्वात्मानमात्मनि ॥२०॥

स्वधर्मनिरता शान्ता त्यजान्ते देहमात्मनः ।
ज्ञानेनैव सहैतेन नित्यकर्माणि कुर्वतः ॥२१॥

१८/१-२–क– × × × × × × × × । १८/१–ग५– ————संत्यजेद्धीमान् । १८/२-न१, २, ५, ७–आत्मवांस्तु———; ग५, ६–आत्मैवायं————; ग२–आत्मनैव————; न८–आत्मैव स्यान्नसंशयः । १८/३-४–क–× × × × × × × × × । १८/३–ग५– —————समभ्यसेद्धीमान् ; न४, ग३–यद्वा———————। १८/४–न६–त्यजेदन्त्ये (?) कलेवरम्; ग३– × × × ×. ।

१९/१-२–क– × × × × × × × × × । १९/१—न१, २, ३, ४, ५, ७, ग१, ४–तदेव संस्मरेद्विद्वान् ; न८–तदेव संस्मरन्वापि ; ग५, ६–यदेव संस्मरेद्विद्वान् ; ग ३– × × × × । १९/२–न२–त्यजत्यन्ते(?)———; न५–त्यजन्नन्ते————। १९/३-४–न१, ५, ग५, ६, क– × × × × × × × × × । १९/३–न२, ३, ६, ७, ८, ग३, ४, त–यं यं वापि——————; न४–यं यं चापि——————।

२०/१-२–क–× × × × × × × × × । २०/१–न३– ————व्रजेद्भावं ; न४, ग३– —————भवेद्भावं(?) ; न१, २, ५, ६, ७, ८, ग१, ४, ५, ६, त– —————भजेद्भावं (?) । २०/२–ग४, न८–इति वेदविदो———। २०/३-४–क– × × × × × × × × × । २०/३–न४, ५, ६, ७, ८, ग३, ४, ५, ६–त्वं चैव——————; न३–त्वं चैव योगमभ्यस्य । २०/४-अत्र दृश्यमाणेभ्यो पाठेभ्यो य समीचीनो मतः सो यद्यपि स्वीकृतस्तथापि सर्वेऽपि पाठभेदा यथा तथा दीयन्ते । न३, ६, ८, ग४–ध्यायन्स्वात्मानमात्मनि ; न५–ध्यायन्स्वात्मानमात्मना ; न४, ग३–ध्यायन्नात्मानमात्मना ; न२, त–ध्यायन्त्यात्मानमात्मनः(?) ; न१, ७, ग१, २, ५, ६–ध्यायन्यात्मानमात्मना (?) ; मुं. पु., न. पु., मु. पु.–ध्यायन्त्यात्मानमात्मनि ; क. पु.–ध्यायन्नात्मानमात्मनि ।

२१/१-२–क– × × × × × × × × × । २१/१–न१, ७– ———निरता त्वं च ; न५– —————निरतत्वं च (?निरता त्वं च) ; न२, ग२, त–स्वकर्मनिरता शान्ता । २१/२–ग१-त्यजस्व– ——————; ग२, न४, ६, ८–त्यजन्ते(?त्यजान्ते)——————; ग४–त्यजान्ते देहमात्मना(?) । २१/३-४–क– × × × × × × × × × । २१/३–त, ग४, न८–ध्यानेनैव(?) ——————; न१, २, ५–ज्ञानेनैव सहितेन । २१/४–ग२–नित्यं———————।

निवृत्तफलसङ्गस्य मुक्तिर्गार्गि करे स्थिता ।

यदुक्तं ब्रह्मणा पूर्वं कर्मयोगसमुच्चयम् ॥२२॥

तदेतत्कीर्तितं सर्वं साङ्गोपाङ्गं विधानतः ।
त्वं चैव योगमभ्यस्य यमाद्यष्टाङ्गसंयुतम् ॥२३॥

निर्वाणं पदमासाद्य प्रपंचं संपरित्यज ॥२४॥

इति श्रीयोगयाज्ञवल्क्ये दशमोऽध्यायः ॥

२२/१-२–क–× × × × × × × × । २२/१–ग३– ————संगम्य(?) ; न३–निवृत्तिफलसंगम्य(?) । २२/२–न१– ————करे स्थिते। २२/३–ग१, क–× × × × । २२/४–न३– ————समुच्चयः(?) ; क–+ + + + + समुच्चयम् ; ग६– ————समन्वयम् ; न४–सर्वयोगसमुच्चयम् ।

२३/१–ग३–तत्ते–(?तदे–) तत्कीर्तितं––; न६–तवैतत्कीर्तितं––; ग५–तदेतत्कीर्तिदं––––; ग१, न४–तदेतत्कथितं––––; न३–स एषः कीर्तिः(?) सर्वत्र। २३/२–न३, ४, ५, ८; ग३, क–साङ्गोपाङ्गविधानतः। २३/३–न१, २, ८, ग५, ६, क–त्वं चैवं————; न४, ग३–त्वं चैव योगमास्थाय ; ग१–× × × × । २३/४–ग३– ————संयुता; न७– ————संपुटं ; ग२–योगाष्टाङ्गैः सुसंयुतम् ; ग१–× × × × ।

२४/१–ग३– ————परमासाद्य ; क– ————पदमास्थाय ; न३, ५, ६, ग५–निर्वाणपदमासाद्य ; ग२–सर्वासां पदमासाद्य(?) ; ग१–× × × × । २४/१-२–ग१–× × × × × × × × । २४/२–ग२–तं व्रतं च परित्यज ; न४–त्यजांते च कलेवरम् ; ग३–त्यजस्वान्ते कलेवरम् ; न१, २, ५, ६, ७, ८, ग४, ५, ६, त, क–सप्रपंचं परित्यज ।

एकादशोऽध्यायः ।।

इत्येवमुक्ता मुनिना याज्ञवल्क्येन धीमता ।
ऋषिमध्ये वरारोहा वाक्यमेतदभाषत ।।१।।

*गार्ग्युवाच—

योगयुक्तो नरः स्वामिन्सन्ध्ययोर्वाथवा सदा ।
वैधं कर्म कथं कुर्यान्निष्कृतिः का त्वकुर्वतः ।।२।।

इत्युक्तो ब्रह्मवादिन्या ब्रह्मविद्ब्राह्मणस्तदा ।
तां समालोक्य भगवानिदमाह नरोत्तमः ।।३।।

एकादशोऽध्यायः ।।

१/१–न८–इत्येवमुक्तं———; ग१– —————विधिना ; न३– × × × × । १/२–न३–× × × × ×। १/३–ग१, २, न४–ऋषीनालोक्य नेत्राभ्यां ; न३– × × × × । १/४–ग१, २, न४–वाक्यमेतदुवाच ह, न३– × × × × ।

*ग४, न८, क–गार्गी ।; न२, ७– × × × × ।

२/१–न१, २, ५, ७, त–योगयुक्तो नरः स्वामिन् ; ग१–योगयुक्तनरस्यास्य ; ग२–योगयुक्तं(?) मनुष्यस्य । २/२–न३– —————वाप्यवा(?) सदा ; ग५, ६– —————वापि वा———; ग३– —————वा न वा सदा; न४– ————वा यथा सदा । २/३–ग२–यत्कर्तव्यं मुनिश्रेष्ठ । २/४–अत्र पाठभेदानामतीव बाहुल्याच्चरणं द्विधा विभज्य साम्यवैषम्ये निर्णेतव्ये भवतः ; सर्वेऽपि भेदाश्चोल्लिख्यन्ते । स्वीकृतस्य पाठस्य मूलग्रन्थेऽस्तित्वविषये न शङ्कायै स्थानं वर्तते । तस्य द्वौ विभागौ :—(१) निष्कृतिः ; (२) का त्वकुर्वतः । प्रमाणग्रन्थेषु तु (१) न१, ३, ७, ग५, ६, त, क, त्रि. मुं. न. मु. पुस्तकानि–निष्कृतिः ; न२, ५, ग१, न. पु.–निःकृति : (?निष्कृतिः); न४, ६–निकृतिः (?निष्कृतिः) ; ग४, न८–निष्कृतिं(?); ग३–निर्वृत्तिं(?); ग२– तत्सर्वं; (२) न२, ४, ६, ७, ८, ग३, ४, क, त्रि. पु.–का त्वकुर्वतः ; मुं. पु.————ह्यकुर्वतः ; न. पु.–का च तत्वतः; ग२–वद तत्त्वतः; न१–का च कुर्वतः(?) !; त, मु. पु., क. पु.– का न कुर्वतः ; न३–कात्र कुर्वतः; ग१–का तु कुर्वतः(?) ; न५–कालकुर्वतः(?); ग५, ६–किमकुर्वतः ।

३/१–न२, ग१, त–इत्युक्ते—————; न७– —————+ + + +। ३/२–न६– ——————स्तथा ; ग५, ६, क–ब्रह्मविद्ब्राह्मणप्रियः । ३/३–न३, ८, ग२, ४– —————कृपया ; ग५, ६, क– —————नेत्राभ्यां। ३/४–ग३– + + + + +रोत्तमः ; ग२– ————महामतिः ।

†याज्ञवल्क्य उवाच–

योगयुक्तमनुष्यस्य सन्ध्ययोर्वाथवा निशि ।
यत्कर्तव्यं वरारोहे योगेन खलु तत्कृतम् ॥४॥

आत्माग्निहोत्रवह्नौ तु प्राणायामैर्विवर्धिते ।
विशुद्धचित्तहविषा विध्युक्तं कर्म जुह्वतः ॥५॥

निष्कृतिस्तस्य किं बाले कृतकृत्यस्तदा खलु ।
वियोगे सति सम्प्राप्ते जीवात्मपरमात्मनोः ॥६॥

विध्युक्तं कर्म कर्तव्यं ब्रह्मविद्भिश्च नित्यशः ।
वियोगकाले योगी च दुःखमित्येव यस्त्यजेत् ॥७॥

---

† ग५, ६, क–याज्ञवल्क्यः ; न३, ६, ८, ग२, त–श्रीभगवानुवाच; न१, २, ५, ७, ग१– × × × × । ४/१–न४–योगयुक्तो मनुष्यस्तु ; ग५, ६, क–योगयुक्तस्य मर्त्यस्य। ४/२– न२, ३, ६, ग१, ४, क– ––––––––––वा निशम् ; न५– –––––––दिवा निशम् ; ग५, ६–––––र्वापि वा सदा। ४/३–ग४, न८–न कर्तव्यं–––––; ग५, ६, क–किं कर्तव्यं––––––––। ४/४–न१, २, ७–योगतः ––––––––––––––।

५/१–ग५, ६– ––––––––––––वह्नौ च । ५/२–न३, ४, ६, ग३– –––––––विदीपिते ; न१, ग१– प्राणयज्ञैर्विधीयते ; न२–प्राणयज्ञैर्विवर्धिते ; ग४–प्राणायामो विवद्यते ; न८–विध्युक्तं कर्म जुह्वतः । ५/३–ग५–विशुद्धचित्तवपुषा ; न६–विशुद्धशुद्धहविषो(?) ; न८–विशुद्धचित्ते विषय– । ५/४–न१, २, ३, ५, ७, ग१, २, ५, ६, क– –––––––कुर्वतः ; न६–विशुद्धं कर्म कुर्वतः ; न४–विध्युक्तं कर्म तु कुतः ; न८– –––प्राणायामो विवक्ष्यते ।

६/१–न३– ––––––––––––किं पाले (?बाले); न७– –––––––किं वास्ते(?); न८– ––––––––––किं वाते(?) ; न५– ––––––––––––किं चांते। ६/२–न२, ६, ७, ८, ग१, ६, क– ––––––––––तथा खलु ; ग४–कृतरन्ध्रस्तथा खलु । ६/३–ग६–वियोगे खलु––––––––। मुद्रित– पुस्तकेभ्यो, त्रि. पु., मुं. पु.–वियोगे सति––––––; न. पु.–संयोगे––––––––––––; मु. पु., क. पु.– प्रयोगकाले––––––––। ६/४–न५–जीवात्मपरमात्मनः(?) ।

७/१–ग१–विध्युक्तमेवं––––––––; ग५–विध्युक्तमेव––––––––। ७/२– न८–––––––––––– निश्चितः (?नित्यशः) ; न३, ४, ६, ग३–योगविद्भिश्च––––––। ७/३–ग३– –––––––––––– योगाच्च ; ग२–विशुद्धकाले गार्ग्येतत् ; ग६, क–कालेनैव पुनर्योगी ; ग५–कामेनैव पुनर्योगं(?) ; न४–× × × × । ७/४–न१, २, ५, ७, ग१, २, ४, त– ––––––––––यत्त्यजेत् ; न६– ––––––––यद्व्रजेत् ; न३– ––––––यस्य यत् ; न४–× × × × ।

कर्माणि तस्य निलयः निरयः परिकीर्तितः ।
न देहिनां यतः शक्यं त्यक्तुं कर्माण्यशेषतः ॥८॥

तस्मादामरणाद्वैधं कर्तव्यं योगिभिः सदा ।
त्वं चैव मात्यया गार्गि वैधं कर्म समाचर ॥९॥

योगेन परमात्मानं यजंस्त्यज कलेवरम् ।

इत्येव मुक्त्वा भगवान्याज्ञवल्क्यस्तपोनिधिः ॥१०॥

८/१–ग५, ६, क– ————वै गार्गि ; न१, ५, ७– ————निरये(?) ; न२– ————नीरूपे(?) ; ग१– ————निलयं ; –न८–कर्मणा————; ग२–कर्मणस्तस्य निलयः ; न४, ग३–कर्मयोगस्य निलयो । ८/२–न४, ग३–निलयः————; न१–निलयं परिकीर्तितम् ; न२–निलये परिकीर्तितम् ; ग१–निरयं परिकीर्तितम् ; ग२–विलयः परिकीर्तितः ; ग५, ६–निष्क्रियः (?) परिकीर्तितः । क–निष्क्रयः परिकीर्तितः । ८/३–ग५– ————ततः शक्यं ; न१, ३, ६, ग६–न देहिना————; न८, क–न देहिना यत्तच्छक्यं ; न४, ग३–न देहिनाऽपि यच्छक्यं ; न२, ७–नो देहेन यतः शक्यं । ८/४–न८–त्यक्तु कर्माण्यदोषतः(?) ।

९/१–क–तस्मादामरणाद्गार्गि ; न६–तस्मादामरणाच्चैवं ; ग२–तस्मादाहरणं चैव । ९/२–न१, २, ५, ६, ७, त– ————योगिना———; ग५– ————योगिनां———। ९/३–अस्मिश्चरणे पुनः पाठानामतीव वैविध्यं दृश्यते । तेन तत्त्रिधा विभज्य साम्यवैषम्ये निर्णेतव्ये भवतः । ते विभागाः–(१) त्वं चैव ; (२) मात्ययाः ; (३) गार्गि । तेभ्यो "गार्गि" शब्दोऽन्ते सर्वत्रैव वर्तते । प्रथमद्वयोर्विभागयोः पाठास्तुः–(१)–न१, २, ३, ४, ५, ७, ८, ग१, ३, ४, त, त्रि. पु., मुं. पु., न. पु. क. पु.–त्वं चैव ; मु. पु.– त्वं सं————; न६–पंचैव; ग२, ५, ६, क–तस्मात् : (२)–न३–मात्ययाः ; ग१, न४, त्रि. पु., मुं. पु.–मात्ययात्(?) ; ग४, न८–मा त्यजेत्; न६–मात्रया(?) ; ग३–मात्राया (?); न१, २, ५, ७, त–आत्मतया; न. पु.–(त्वं चैव) संत्यजन्; क. पु.–(त्वं चैव) संत्यजन्तीह ; मु. पु.–(त्वं) संत्यजन्ती(वै) ; ग२–(तस्मात्) आहरणं ; ग५, क–(तस्मात्) आमरणात् ; ग६–(तस्मात्) आरम्भणात् । ९/४–ग३–वैदि(?) कर्म———; ग२–सर्वं कर्म————; ग१–वैधं कर्म समाचरेः ; न७– ————समाचार(?) ।

१०/२–अत्र पुनः पाठानामतीव वैविध्यं दृश्यते । तेन चरणं द्विधा विभज्य साम्यवैषम्ये निर्णेतव्ये । तौ विभागौः–(१) यजंस्त्यज ; (२) कलेवरम् । प्रमाणग्रन्थेषु तुः–(१)–ग१, ४, त्रि. पु., मुं. पु.–यजंस्त्यज ; क. पु.–युञ्जंस्त्यज ; न. पु.–युज्यत्त्यज ; न३, ५, ६–यज त्यज ; ग४–यजत्त्यज ; मु. पु.–युञ्जन्ती त्यज(?); न२–योजयित्वा ; ग२–यजेदन्ते(?त्यजेदन्ते); न१, ४ –यज स्थित्वा ; ग३–यजा(?) स्थित्वा ; न७–पूजयित्वा(?); ग५, ६, क, न८–जय त्वं च; (२)–ग१, २, ३, ४, ५, ६, न१, ३, ५, ६, ८, त, क, त्रि. पु., मुं. पु., न. पु. मु. पु., क. पु.——कलेवरम् ; न२, ४, ७–कलेवरे । १०/३–न१–इत्युक्त्वा स भगवान् ; न५– इत्येवमुक्त्वा स भगवान् । १०/४–ग५–याज्ञवल्क्यस्तपोधनः ।

ऋषीनालोक्य नेत्राभ्यां वाक्यमेतदभाषत ।
सन्ध्यामुपास्य विधिवत्पश्चिमां सुसमाहिताः ॥११॥

गच्छन्तु साम्प्रतं सर्वे ऋषयः स्वाश्रमं प्रति ।

इत्येवमुक्ता मुनिना मुनयः संश्रितव्रताः ॥१२॥

विश्वामित्रो वसिष्ठश्च गौतमश्चाङ्गिरास्तथा ।
अगस्त्यो नारदश्चैव वाल्मीकिर्बादरायणिः ॥१३॥

पैङ्गिर्दीर्घतमा व्यासः शौनकश्च तपोधनः ।
भार्गवः काश्यपश्चैव भरद्वाजस्तथैव च ॥१४॥

११/१–न६– ————————भगवान् । ११/३–न६–सन्ध्यामुपास्ते(?)————। ११/४–न१, २, ३, ५, ६, ग३– ——————सुसमाहितः(?) ; न८– —————तु समाहितः(?) ; ग५– ——————तु समाहिताः ।

१२/२–न६– ———— –श्चाश्रमं———; ग२– ———स्वाश्रमान्स्वकान्; न३, ८, ग४, क–मुनयः स्वाश्रमं———। १२/३–ग५, ६, क–इत्युक्तो(?) मुनिना तेन ।

१३/२–न३–गौतमश्चाङ्गिरस्तथा ; ग६–गौतमाङ्गिरसोस्तथा (?) ; न८–गौतमाश्चाङ्गिरास्तथा । १३/४–न३, ५, ग१, ४, ५–वाल्मीकिर्बादरायणः ।

१४/१–अस्मिश्चरणे पुनः पाठानां क्षोभोत्पादकं वैविध्यं दृश्यते। तेन तं त्रिधा विभज्य साम्य-वैषम्ये निर्णेतव्ये भवतः । ते विभागाः–(१) पैङ्गिः ; (२) दीर्घतमा (३) व्यासः । तेभ्यो "व्यासः" शब्द सर्वसामान्यः । प्रथमविभागद्वयसम्बधिनाः पाठाश्चेदृशाः—(१)– न१, ८, ग१, ४, क, त्रि. पु., मुं. पु.–पैङ्गिः ; न. पु.–पैली(?) ; ग६–पंगीक(श्च) ; ग५–अङ्गिरा(श्च) ; न२, ५, ७–गार्ग्यः ; त, न६, मु. पु., क. पु.–योगी ; ग२–मुनिः ; ग३–गर्गः ; न३–ऐंद्रा; न४–× × ; (२)—न१, ५, ग१, ३, ४, त, त्रि. पु.–दीर्घतमा ; न२, ३, ७, ८, ग२, ३, क, मुं. पु., न. पु., मु. पु., क. पु.–दीर्घतपा ; ग५–(अंगिरा–)श्चतपा(?) ; ग६–(पंगीक-) श्चतपो(?) ; न४–× × × × । १४/२–न३– —————तपोनिधिः ; न६– —————महानिधिः(?) ; न४– × × × × । १४/३–न२, ५, ७, ८, ग३, क– —————कश्यपश्चैव; त– ——— –श्च्यवनश्चैव; ग२, न४–× × × × । १४/४–न६–भारद्वाजस्तथैव च ; ग१, ४, न८, त–भरद्वाजस्तपोधनः; ग५, ६, क–भरद्वाजस्तपोनिधिः ; न१, २, ५, ७–भारद्वाजस्तपोधनः ; ग२–× × × × ।

तपस्विनस्तथा चान्ये वेदवेदाङ्गवेदिनः ।
याज्ञवल्क्यं सुसम्पूज्य गीर्भिराशीर्भिरुत्तमैः ॥१५॥

ते यान्ति मुनयः सर्वे स्वाश्रमेषु यथागतम् ।

गतेषु स्वाश्रमेष्वेषु तापसेषु तपोधना ॥१६॥

प्रणम्य दण्डवद्भूमौ वाक्यमेतदभाषत ।

*गार्ग्युवाच--

भगवन्सर्वशास्त्रज्ञ सर्वभूतहिते रत ॥१७॥

भवमोक्षाय योगीन्द्र भवद्भिर्भाषितं तु यत् ।

१५/१–न४–तपस्विनस्तथा + + । १५/२–न४, ग३– ------- –वादिनः ; न८, क– -------वेदान्तवेदिनः ; त– × × × × । १५/३–ग१– ---------समभ्यर्च्य ; ग४–नमस्कृत्य---------; त– × × × × । १५/४–इदं चरणं त्रिधा विभज्य पाठो निश्चितः। ते विभागाः–(१)गीर्भिः ; (२) आशीर्भिः ; (३) उत्तमैः । यथा स्वीकृतं चरणं "न८, क" लेखयोरेव लभ्यते । तदन्तर्गताः शब्दास्तु विशेषेषु दृश्यन्ते। सर्वेऽपि पाठभेदा विभागश अत्र प्रदर्श्यन्तेः– (१) न१, २, ३, ४, ५, ६, ७, ८, ग१, ३, ४, ५, क, त्रि. पु., मुं. पु., मु. पु., क. पु.–– गीर्भिः ; ग२–वाग्भिः ; ग६–गंभी–(रग्र्याभिः(?) ; न. पु.–गार्गी(?) ; त– × ×। (२) न३, ६, ८, क, न. पु.–आशीर्भिः ; न१, २. ५, ७–आप्ताभिः ; ग१, ३, ४, न४, मु. पु.–अग्र्याभिः ; ग५, क. पु.–अन्याभिः ; ग६–(गंभी-) रग्र्याभिः; ग२–अर्थ्याभिः; त्रि. पु., मुं. पु.–पुण्याभिः ; त– × × ×। (३) ग२, न८, क–उत्तमैः ; न१, २, ३, ४, ५, ६, ७, ग१, ३, ५, ६, मु. पु. क. पु.–उत्तमम् ; न. पु.–उत्तमाम्(?) ; त्रि. पु., मुं. पु.–उत्तमाः(?) ; त– × × ; ग४–– तपोधनम् ।

१६/१–न१, ४–ते याताः------; न२, ७–ते ययु.---; ग२–ते गताः-------; ग५, ६, क– तेनैव--------; त– × × × ×। १६/२–ग२–स्वाश्रमांस्तु-----; ग४–स्वाश्रमं तु---------; न७–स्वाश्रमेषु यथायथम्; त– × × × ×। १६/३–त–गतेषु ते स्वाश्रमेषु; ग३, न३, ४– -------स्वाश्रमे तेषु । १६/४–न५–तपसिषु (?तापसेषु)--; न१–स्वाश्रमेषु-------; न३–तापसेषु तपोनिधौ(?) ; न८– -------तपोधनाः (?तपोधना); ग४–स्वरूपेषु तपोधनम्(?) (?) ; ग५, क–स्वाश्रमे सा तपोधना ; ग६–स्वाश्रमे वा तपोधनम्(?) ।

१७/१–न३– ------- –दभाषतः (?–द्भाषत); ग३– ----- –दुवाच ह; त–तमेतदभिभाषत। *न४–श्रीगार्ग्युवाच; ग५, ६–गार्गी–; ग४, न८– × × × × ।

१८/१–ग५, ६, क–भवमोक्षाय योगीन्द्र; न४, ५, ६, ७, ८, ग१, २, त–योगं-----------; न१,–यन्मे---------; न३–योगो विज्ञाय(?)-------; ग४–भोगमोक्षाय(?)-------; ग३–योग मुक्षाय गार्गि(?) ।

यमाद्यष्टाङ्गसहितो योगो मुक्तेस्तु साधनम् ॥१८॥

तदेतद्विस्मृतं सर्वं सर्वज्ञ तव सन्निधौ ।
योगं ममोपदिश्याद्य साङ्गं संक्षेपरूपतः ॥१९॥

त्रातुमर्हसि सर्वज्ञ जन्मसंसारसागरात् ।

इत्युक्तो ब्रह्मवादिन्या ब्रह्मविद्ब्राह्मणस्तदा ॥२०॥

आलोक्य कृपया दीनां स्मितपूर्वमभाषत ।

उत्तिष्ठोत्तिष्ठ किं शेषे भूमौ गार्गि वरानने ॥२१॥

वक्ष्यामि ते समासेन योगं सम्प्रति तं शृणु ॥२२॥

इति श्रीयोगयाज्ञवल्क्ये एकादशोऽध्यायः ॥

१८/२–न१, २, ४, ५, ६, ७, ८, ग१, ३, ४, ५, ६, त, क–भवद्भिर्भाषितं तु यत् ; न३, ग२–भवता भाषितस्तु यः । १८/३–ग१, ५, ६, न५–यमाद्यष्टांगसंयुक्त (:); न१, ४, ६, ८, ग४, क– ––––––––––सहितं (?); ग३–यद्यदृष्टांगसहितं(?) । १८/४–न३, ८––––––––––कारणम्; न१, ४, ६, ग१, क–योगं मुक्तेस्तु साधनम्; न५–योगमुक्तिस्तु––––––––; ग३–योगयुक्तस्तु––––––––; न७–योगस्तु मुक्तिसाधनम् ।

१९/१–ग४–तदेतेन स्मृतं सर्वं(?) ; न३–स एव विस्मृतः सर्वैः (?) ; ग२–तदेतच्च स्मृतं ++ । १९/२–न३– ––––––––––तदसंनिधौ (?तव संनिधौ) ; ग२–यज्ज्ञानं तव सन्निधौ (?) । १९/३–न१, २, ग१, त– ––योगं ममोपदिश्यात्र ; ग४– ––––––मे चोपदिश्याद्य ; ग६, क–योगं ममाद्योपदिश; ग२– –––––––मे योगशास्त्रं त्वं(?); न३– –––––(म–) मोपदिश्याद्य त्वं (?) ; ग३– ––––––––तु नोपदिश्याद्य(?) । १९/४–ग५, ६, क–सर्वं––––––––––; न३– ––––––––संज्ञेयरूपतः ; ग१– ––––––––संक्षेपतः पुनः ; ग२–ब्रूहि संक्षेपतो यतः ।

२०/१–ग६–श्रोतुमर्हसि(?)–––––। २०/२–ग२–यन्मां–––––––––––––––। २०/४–ग४– ––––––––––––– –स्तथा ; ग६– ––––––––––– –स्त्वया(?) ; ग१–याज्ञवल्क्यस्तपोनिधिः ।

२१/१–ग३– –––––––––– –दिनां (?दीनां); न१, २, ३, ५, ६, ७, ८, ग१, ४, त–क– –––––––––कृपणां–––––––––। २१/२–न१, २, ५, ७, ८, ग१, ४, त– ––––––––– –मथाब्रवीत्; न३–तेन पूर्वमभाषत। २१/३–न२, ५, ७, ग१– –––––––– किं शेते(?)। २१/४–ग५, ६, क–गार्गि भूमौ–––––।

२२/१–न१, २, ५– –––––––तं–––––––; न६–वक्ष्यामीति––––––––––; ग३– वक्ष्यामि त(?ते)–––––––। २२/२– न१, २, ५, ७, ८, ग३, ४, ५, ६, क– ––––––––––––तच्छृणु ; ग२– ––––––––स्थिरमना–––––।

द्वादशोऽध्याय :

*याज्ञवल्क्य उवाच--

सव्येन गुल्फेन गुदं निपीडच सव्येतरेणैव निपीडच सन्धिम् ।
सव्येतरं न्यस्य करेतरस्मिन्शिखां समालोकय पावकस्य ॥१॥

द्वादशोऽध्याय: ॥

*ग५, ६, न८–याज्ञवल्क्य: ; न१, २, ३, ५, ६, ७–श्रीभगवानुवाच ; ग१, २, त– × × × × । "क" लेख: एकादशाध्यायान्ते समाप्यते । तेनास्मिन्नध्याये १५ भ्य एव हस्तलेखेभ्यो टिप्पण्यो भविष्यन्ति । "ग१" लेखे यद्यपि द्वादशाध्यायो न कुत्राप्यङ्कितस्तथापि तत्स्था: श्लोकास्तस्मिन्नेकादशाध्याये वर्तन्त एव । ग२", "ग६" लेखयोरध्यायान्तर्गतानां श्लोकानामारम्भात्पूर्वं ३ अधिका विसङ्गता: श्लोका विद्यन्ते ते :—

ग२–दुर्लभं जन्म मानुष्यं, विवेकमतिदुर्लभम् ।
दुर्लभा देवमुक्तिस्तु[१] ज्ञानं त्रैलोक्यदुर्लभम् ॥१॥

पुण्यक्षेत्रे[२]विषयविरति:सत्तप:[३]सत्यवाक्यम्
दाना[४] वाक्यं परुषरहितं[५] व्याप्य+ + +श्च योग:[६] ।
धर्मो जन्तुष्वगतिषु तया[७] जन्मने पापशुद्धि:[८]
सत्यज्ञानं[९] भवभयहरं तुष्टिरिष्टं विभूति:[१०] ॥२॥

चित्तायत्तं धातुबद्धं शरीरं[११] चित्ते नष्टे धातवो[१२]यान्ति नाशम् ।
तस्माच्चित्तं यत्नना[१३] रक्षणीयं[१४] स्वस्थे चित्ते बुद्धय: संभवन्ति ॥३॥

"ग६" लेखे पाठन्तराणि–१. देवभक्तिश्च ; २. पुण्यक्षेत्रं ; ३. संतप: ; ४. दानं ; ५. पुरुषरहितं ; ६. प्राणिहिंसावियोग: ; ७, धर्मो जीवेष्वगतिषु दया ; ८. जान्हवी पापशुद्धि: ; ९. सम्यग्ज्ञानं ; १०. तुष्टियिष्टा विभूति: ; ११. पातु सर्वं शरीरं ; १२. यातवो ; १३. यत्नत: ; १४. चिक्षणीयं । द्वयोरपि लेखयोरशुद्धयो दृश्यन्ते तथापि प्रस्तुतग्रन्थविसङ्गता इमे श्लोका इति तेषां शुद्धपाठनिर्णये यत्नो न क्रियते ।

१/१–न१, ५, ७– ————निबध्द्य; ग१– ————निरस्य ; न२– ———— निबध्द्वा । १/२–ग२– ——————शक्तिम्(?) ; न४– ——————दण्डम् (?) ग४– ————सव्यम्; न३– ————सन्धिम् ; न५, ७–सव्ये करेणैव(?)————; ग६–सव्ये तले न्यस्य तथेतरश्च(?) । १/३–इदं चरणं त्रिधा विभज्य साम्यवैषम्ये निर्णेतव्ये । ते विभागा:–(१)सव्येतरं ; (२) न्यस्य ; (३) करेतरस्मिन् । लेखादिविभागा:–(१)–ग१,

आयुर्विघातकृत्प्राणो निरुद्धस्त्वासनेन वै ।
याति गार्गि तदापानात्कुलं वह्नेः शनैः शनैः ॥२॥

वायुना वातितो वह्निरपानेन शनैः शनैः ।
ततो ज्वलति सर्वेषां स्वकुले देहमध्यमे ॥३॥

प्रातःकाले प्रदोषे च निशीथे च समाहितः ।
मुहूर्तमभ्यसेदेवं यावत्पंचदिनद्वयम् ॥४॥

ततस्त्वात्मनि विप्रेन्द्रे प्रत्ययाश्च पृथक्पृथक् ।
सम्भवन्ति तदा तस्य जितो येन समीरणः ॥५॥

४, त, त्रि. पु., मुं. पु., मु. पु., क. पु.–सव्येतरं ; न३, ४, ८, ग२, ३–सव्येतरे ; ग५, ६–सव्ये तले; न१, २, ५, ७–सव्ये करे ; (२)–ग१, ४, न८, त, त्रि. पु., मुं. पु., न. पु., मु. पु., क. पु.–न्यस्य; न२, ३, ४, ५, ७, ग२, ३, ५, ६–न्यस्त ; न१–अभ्यस्त(?) ; न६–स्वस्त्य ; (३)–न. पु.–करेतरस्मिन् ; ग१ २, न१, २, ३, ५, ७, त्रि. पु., मुं. पु., क. पु.––करेतरेऽ-(?करेतर–)स्मिन् ; न६–करे परेऽस्मिन् ; न४, ग३–करेतरस्तु(?) ; ग४–करं करेतरे ; त, मु. पु.–कलेवरेऽस्मिन् ; ग५, न८–तथेतरं च ; ग६– तथेतरश्च । १/४–ग३– ––––––––––––––पावनस्य(?) ; न३–शिलां(?)–––––––––; ग२–शिखां समालोक्य च ।

२/१–न३–आयुर्विघातकप्राणः ; ग५–आयुर्विघातकः–––––; ग३–आयुविध्यांत कृत्प्राणः (?); ग२–आयुर्निपूतकणे(?)+++ । २/२–ग१, ६– ––––––––––––––तु ; न५–निरुद्धः श्वसनेन वै ; न४–रुद्धयस्व स्वासनेन वै ; ग२–निरुद्धय स्वां(?) शनैः शनैः । २/३–न६– ––––––––तथापानात् ; न१–––––––––––तदापाने(?) ; न२, ७– ––––––––––––तदापानं(?) ; ग२–––––––––––––सदापानात् ; ग५, ६, न८––तथापानः(?) ; न४, ग३– –––––––तदादौ च ; ग४–× × × × । २/४–ग३– –––––वह्नि शनैः शनैः (१) ; न१–कुले वह्नेः–––––––; न२–कुम्भं(?)–––––––––––; ग२–तत्कुलं वह्निना–––––; ग४–× × × × ।

३/१–न४, ग३– –––––––पातितो(?)–––; त– –––––––चालितो–; ग२– –––––––वासिरो(?)–––––; न३– ––––––वर्धितो–––––; ग४–× × × × । ३/२–न३–तस्पानेन(?) –––––––; ग४–× × × × । ३/३–ग५– –––––ज्वरति(?)–––––; ग४,––× × × × । ३/४–न१, २, ५, ७, ग६–स्वकुलं–––––––; ग२–भास्वरे–––––––; ग३–नकुशे(?)–––––––––; ग५– –––––––––हेममध्यमे(?) ; ग४, क. पु.–× × × ×।

४/१–न४–प्राप्तकाले(?)–––––––––––; ग४–× × × × । ४/२–न१, त– –––––––––समाहिता ; न३–निशीथाभ्यां–––––––; ग४–×× ×× । ४/४–ग४, न८– –––––––––––दिनत्रयम् ; न१– ––––––दिने द्वयम्(?) ।

५/१–न६, ८––––––– –श्चात्मनि–––––; न२, ४, ७– –––––––स्वात्मनि–––––; ग५, ६–––– –स्त्वेतानि–––; ग३–स्वात्मनि विप्रेन्द्र(?) ; न३–तपः(?) स्वात्मनि विप्रेन्द्र(?) । ५/२–न६, ग१, ५, ६––प्रत्ययानि(?)–––––––; ग४, न८–प्रत्यङ्गानि(?)–––––––। ५/३–न६, ८– ––––––––––––तथा तस्य ; न४– –––––––तदास्यांतर् ; ग३––––––––सदा स्वांतर् ; न१–संभवति(?)–––––––; ग५, ६– –––––––––सदा तस्य । ५/४–ग१, न१, ५– –––––––यस्य ; न८–जितेन न सजारणः(?) ।

शरीरलघुता दीप्तिर्वह्नेर्जठरवर्तिनः ।
नादाभिव्यक्तिरित्येते चिह्नान्यादौ भवन्ति हि ॥६॥

अल्पमूत्रपुरीषः स्यात्षण्मासे वत्सरेऽपि वा ।
आसने वाहने पश्चान्न भेतव्यं त्रिवत्सरात् ॥७॥

*ततोऽनिलं वायुसखेन सार्धं धिया समारोप्य निरोधयेत्तम् ।
ध्यायन्सदा चक्रिणमप्रबुद्धं नाभौ सदा कुण्डलिनीनिविष्टम् ॥८॥

शिरां समावेष्ट्य मुखेन मध्यामन्याश्च भोगेन शिरास्तथैव ।
स्वपुच्छमास्येन निगृह्य सम्यक्पथश्च संयम्य मरुद्गणानाम् ॥९॥

६/१–न५– ————दीप्तिः(?) ; न४, ग३–शरीरे————। ६/२–ग४–वह्नेर्जठर-वर्तिनः(?) ; ग३–वह्निजठर———(?) । ६/३–न४– ———— –रित्येतत्(?) ; न१– ———— –रित्येव ; न५, ७– ———— –रित्येवं । ६/४–न३–प्रत्ययाः संभवन्ति हि ।

७/१–न१, २, ३, ५, ७, ग२, ३, ६, त– ———मूत्रपुरीषं———। ७/२–न१, २, ३, ४, ५, ७, ग१, ३, ४, त– ————वत्सरे तथा; न८–षण्मासाद्वत्सरेण वा ; ग२–षण्मासे वत्सरे तव (?ऽथवा) । ७/३–न४–प्रासने वाहने———; न८–आसनेन भवेत्पश्चात्(?) ; ग२–आहारं बहुभोजत्वं(?) ; ग६–"आहारं बहुभोजित्वं" इत्यधिकायां पंक्त्याम् । ७/४–ग५–न भेत्तव्यं (?भेतव्यं) —————; ग६–"न भोक्तव्यं त्रिवत्सरात्" इत्यधिकायां पंक्त्याम् ; न१, २, ४, ५, ७, ग३, त–न गन्तव्यं—————; ग२, ६–लघुत्वं वत्सराद्ध्रुवम् ; न८–लभेदेवं त्रिवत्सरात् ।

*अत्र "न१, २, ५, ७" लेखेषु त्रयः श्लोकाः "दृष्टचिन्हस्ततस्तस्मिन्" इत्याद्याः "दहत्यत्र न संशयः" इत्यन्ताः। ते नाधिकाः किन्तु ६. ६७–६९ एवेति नात्रोद्धृताः।

८/१–न३–ततो बिलं(?)—————; न७–सतो बिलं——सम्यक्; न२–ततोऽनिलं————सम्यक् ; न४– ——————वायुमुखेन(?)सार्धं। ८/२–न४– ————— निरोधय त्वम्; ग३– ———————निरोधयित्वा ; ग४–धिया समासाद्य निरोधयेत्तम्। ८/३–न२, ३, ६–ध्यायेत्सदा —————; ग५, ६, न८–ध्यायन्सदा चक्रिणमप्रमेयम् । ८/४–ग२, ४, न८– —————कुण्डलीसंनिविष्टम् ; न६– —————कुण्डलीसंप्रविष्टम् ; ग५, ६– ———————कुण्डलिनं प्रविष्टम् ; न२, ३, ५, ग१—— ——————कुण्डलिनं निविष्टम् ; न४– —————कुण्डलिनीं प्रविष्टाम्(?) ; ग३– + + + + + कुण्डलिनीं प्रतिष्ठाम्।

९/१–इदं चरणं चतुर्धा विभज्य साम्यवैषम्ये निर्णेतव्ये भवतः। ते च विभागाः–(१) शिरां ; (२) समावेष्टच ; (३) मुखेन ; (४) मध्यां । तेभ्यो "मुखेन" शब्दः सर्वसमानः । १, २, ४ शब्दानां च विषये पाठभेदा अत्र दृश्यन्तेः–(१)–न३, ६, ८, ग१, ४, ५, ६, ५ मुद्रितानि पुस्तकानि–शिरां; न४–शिरः ; ग३–मुखं ; न१, २, ५, ७, ग२, त–द्वारं; (२)–न२, ३, ४, ६, ८, ग१, २, ४, ६, मुं. पु., न. पु., मु. पु., क. पु.––समावेष्टच ; त्रि. पु.– × × ; न१, ५, ग३, त–समावेश्य ; न७–समावेक्ष्य ; ग५–सुषुम्णां च ; (४) न६, ग१, ४, ५, त्रि. पु.– मध्यां ; न४, ८, ग३–मध्यात् ; न१, २, ७, ग२, त–मध्यमं ; न५–मध्यं ; न५–मध्यं ; न३, मुं. पु., न. पु., मु. पु., क. पु.–मध्ये; ग६–बद्धौ(?) ९/२–ग२–त्वन्येन——————; न१, ५–अन्यानुभोगेन शिरस्तथैव ; न२–अन्येन भोगेन शिरा——; न७–अन्येन योगेन शिरा———; ग३, न८, त–अन्यांश्च भोगेन शिरांस्तथैव। ९/३–न१–स्वपुछ–(?–पुच्छ) मासेन (?मास्येन)———; न८–स्वपुच्छमन्येन(?)—————; ग३– ——————निगूह्य———; ग५–स्वच्छन्दमास्येन—————। ९/४–न६–प+श्च —————; ग४– ———संस्मृत्य(?)———; न८–पथं च(?)——————।

प्रसुप्तनागेन्द्रवदुच्छ्वसन्ती सदा प्रबुध्दा प्रभया ज्वलन्ती ।
नाभौ सदा तिष्ठति कुण्डली सा तिर्यक्सु देहेषु तथेतरेषु ॥१०॥

वायुना विहृतवह्निशिखाभिः कन्दमध्यगतनाडिषु संस्थाम् ।
कुण्डलीं दहति यस्त्वहिरूपां संस्मरन्नरवरस्तु स एव ॥११॥

सन्तप्ता वह्निना तत्र वायुना च प्रचालिता ।
प्रसार्य फणभृद्भोगं प्रबोधं याति सा तदा ॥१२॥

बोधं गते चक्रिणि नाभिमध्ये प्राणाः सुसम्भूय कलेवरेऽस्मिन् ।
चरन्ति सर्वे सह वह्निनैव यथा पटे तन्तुगतिस्तथैव ॥१३॥

१०/१–त–प्रसुप्तनागेन्द्र इवोच्छ्वसन्ती; ग३–प्रबुद्ध————————; न२–प्रबुद्धनागेन्द्र-बहुं (-वदु-) च्छ्वसन्ती; ग५, ६–सुषुप्तनागेन्द्र इव श्वसन्ती। १०/२–ग४–सदा प्रबुद्धप्रभया————; ग३–सदा प्रबुद्धा प्रलये(?)———; ग१, न४–सदा प्रबुद्धा प्रभया———; न२, ५, ७–तदा प्रबुद्धा प्रभया———; न१–हृदात्प्रबुद्धा——————; ग५, ६, न८–सदा प्रबुद्धाग्निरिव————। १०/३–ग६– ————————सदा। १०/४–न४, ग३–तिर्यक्सु देहेषु + + + +; न३–तिर्यक् स्वदेहेषु– —————।

११/१–न३– ———विगत—————; ग४, ५, ६– ———विधृत—————; न७–————वितत———; न१, २, ५– ———वातितो वह्नि———(?); न८–वायुना विधृतो वह्निः; (अनुष्टुप् छन्दोऽस्मिंल्लेखे); न४, ग३–× × × ×। ११/२–न२, ३– ————————संस्था (?संस्थाम्); त– —————नाडीभिः संस्था(?); ग५, ६–तुन्दमध्यगतवह्निषु संस्थाम्(?); न४, ग३–+ + + +सुपूर्य संस्थाम्; न८–शिरोभिः कन्दमध्यगः (अनुष्टुप् छन्दः)। ११/३–ग३, न२, ३–कुण्डली (?कुण्डलीं————————; ग४–कुण्डला (?कुण्डलीं)——————; न८– —————यमस्त्वहिरूपां (?यस्त्वहिरूपां); न४–× × × ×। ११/४–ग४– ——— –न्नरवरः स स एव; न२–संस्मरनेह(?)वरस्तु; न३–संस्तुत + + + + + एव; ग३–संस्मरन्नरवरस्तु + + +; न४–× × × × × × ×; त–सो भवेद्गिरिधरस्तु न वान्यः।

१२/१–न७– ————वायुना(?)———; न१, ५–सन्तप्तवह्निना;——— ग१, ४, न६–सन्तप्तो—————; ग५, ६–सन्तप्तो वह्निना यस्तु –; न४– ग३–× × × ×। १२/२–न३– —————प्रवातिता; न८– —————प्रपातिता; न६, ग४– —————प्रवातितः; ग६– —————प्रचोदितः; ग५– —————प्रचोदिता; ग२– —————प्रबोधिता; न४, ग३–× × × ×। १२/३–न२, ७, ग२– ———फणिवद्भोगं; न५– ————फणवद्भोगं; न३– ————फलवद्भोगं; न१– ————पूर्णवद्भोगं(?); न४, ग३–× × × ×। १२/४–न२, ५, ७, ग२– प्रबोधं याति सा तदा; ग६–भ्रुवोधं (?प्रबोधं) याति सा तदा; न३, ६, ८, ग१, ५, ६, त, त्रि. पु., मुं. पु.– —————तत्तथा(?); न. पु., मु. पु., क. पु.– ————यात्यसौ तदा; ग४–प्रबोधयति(?) तत्तदा; न४, ग३–× × × ×।

१३/१–न३–बोधं गति (?गते)————; न१, ५, ग४–बोधं गता कुण्डली————; न८–बोधं गतां कुण्डली——————(?); न२–बोधं गता कुण्डलिनी च नाभिं(?); न७–बोधं गता कुण्डलिनी च मध्ये; त, न४, ग३–× × × × × ×। १३/२–न८–प्राणान्(?)——————; न५–प्राणास्तु संभूय————; न१, २–प्राणस्तु(?) संभूय————; ग५–प्राणः सुसम्भूय(?)———; न७–प्राणोस्तु (?प्राणास्तु)————; न३–+ + + + + +कलेवरेऽस्मिन्; त, न४, ग३–× × × × × ×। १३/३–न७–चरन्ति सर्वं (?सर्वे)——————; ग५–चलन्ति————————; त, न४, ग३–× × × × × × ×। १३/४–न३– ————तंतुगतस्तथैव(?); न६– ————————तंतुततिस्तथैव; न८–यथा पटास्तन्तुगतास्तथैव; त, न४, ग३–× × × × × ×।

जित्वैवं चक्रिणः स्थानं सदा ध्यानपरायणः ।
ततो नयेदपानं तु नाभेरूर्ध्वमिदं स्मरन् ॥१४॥

वायुर्यथा वायुसखेन सार्धं नाभिं त्वतिक्रम्य गतः शरीरे ।
रोगाश्च नश्यन्ति बलाभिवृद्धिः कान्तिस्तदानीमभवत्प्रबुद्धे ॥१५॥

ब्रह्मरन्ध्रमुखमत्र वायवः पावकेन सह यान्ति समूह्य ।
केनचिदिह वदामि तवाहं वीक्षणाद्हृदि सुदीपशिखायाः ॥१६॥

निरोधितः स्याद्हृदि तेन वायुः मध्ये यदा वायुसखेन सार्धम् ।
सहस्रपत्रस्य मुखं प्रविश्य कुर्यात्पुनस्तूर्ध्वमुखं द्विजिह्वः ॥१७॥

१४/१–न३–जित्वेव (?जित्वैव)———————; ग४–जित्वैव———————; ग२–इत्ये (जित्वैवं———————); त–बोधं गते चक्रिणि स्थानं(?); न४, ग३–× × × ×। **१४**/२–न५, ७– ——————— –परायणाः; न४, ६, ग३–× × × ×। **१४**/३– ————नयेतदानात्तु (?नयेदपानात्तु); न४, ग३–× × × ×। **१४**/४–न६, ग५, ६– —————— –मनुस्मरन्; न३– ——————— –मनुस्मरेत्; न४, ग३–× × × ×।

१५/१–न३– ———————वायुगते सार्धं(?); न२, ४, ५, ६, ग५–वायुर्यदा वायुसखेन सार्धं। **१५**/२–ग२– ———————र्गति (?गतः)———; न२, त————नाभेस्त्वतिक्रम्य————; न३–नाभि–(नाभिं) त्वतिक्रम्यवान्शरीरे(?)। **१५**/३–न१, २, ५, ७, त–रोगास्तु———————; न३–रोगाः प्रणश्यन्ति; ग५, ६–रोगा विनश्यन्ति। **१५**/४–ग३– ——————— –मभवत्प्रबुद्धा; न२, ६– —————— –मभवत्प्रमुग्धे; न५, ७– ——————भवति प्रमुग्धे; न३, ४– ———— ————भवति प्रबुद्धा।

१६/१–न४– ———————मुखमेव————; ग३– ———————मुखमाद्रवायुव(?); ग२– ———————मुखमेत्य स वायुः; ग५– ——————मुखमन्तिमवायौ(?)। **१६**/२–न५——————— ————समूहम् न७– ———————स्वमध्ये; न३– ———————सह्यके(?); न२– ———————समध्ये(?); न४– ———————तदैव; न८– ——————— समाप्य(?); ग५– ———————याति समुह्य(?); ग६– ———————याति समुहे(?) **१६**/३–ग३– ———————तदाहं; न२, ५–केनचित्त्विह————तथाहं; न७–केनचित्त्विह———— तवाहं; ग५–तेन चिदिह(?)वदामि तवाहं; ग६–तेन चेतिह (?) ——————; न४–× × × ×। **१६**/४–इदं चरणं द्विधा विभज्य तस्मिन्पाठभेदानां साम्यवैषम्ये निर्णेतव्ये भवतः। तौ विभागौ:–(१) वीक्षणात्; (२) हृदि सुदीपशिखायाः। तयोर्विषये च पाठभेदाल्लेखादिविभागाः–(१) न१, ६, ग४, ५, ६–वीक्षणात्; ग१, ३, त, त्रि. पु., मुं. पु., न. पु.–वीक्षणं; न३, ७, ८–मु. पु. क. पु.–वीक्षणा; न२–वीरुणा(?); न५–वीक्षणां; ग२–वीक्षणार्थं; न४–× × × ×। (२)–न१, २, ५, ६, ग१, ५, ६, त, त्रि. पु., मुं. पु., न. पु.– ———————हृदि सुदीपशिखायाः; न३, ७, मु. पु., क. पु.–तु हृदि दीपशिखायाः; ग३– ————दृढि (?)सुदीपशिखायाः; न८–धृतिषु दीपशिखायाः; ग२–सुखदीपशिखायाम् (?); ग४–हृदि सुदीपशिखायाम्; न४–× × × ×।

१७/१–**इदं** चरणं त्रिधा विभज्य साम्यवैषम्ये निर्णेतव्ये भवतः। ते विभागाः–(१) निरोधितः स्यात्; (२) हृदि तेन; (३) वायुः। तेभ्यः "वायुः" शब्दः "ग१, २" लेखयोरपवादेन सर्वत्र दृश्यते। तयोस्तु "सार्धं" इत्यन्तिमः शब्दः। प्रथमद्वयोर्विभागयोर्विषये पाठवैविध्यमीदृशम्:–(१)–न४–निरोधितस्तु; न८–निरोधितस्या(-र्ध-); ग५–तिरोहितः स्यात्; अन्येषु सर्वेषु–निरोधितः स्यात्; (२)–ग३, त्रि. पु., मुं. पु.–हृदयेन; न२–वदि (?हृदि) तेन; ग६–स्याद् धृति (?स्याद् हृदि) तेन; ग४–अथ तेन; न८–(स्या-)र्धसितेन (?); इतरत्र सर्वत्र-हृदि तेन। **१७**/२–न२–वध्यं ददा(?) वायु

प्रबुद्धहृदयाम्भोजे गार्ग्यस्मिन्ब्रह्मणः पुरे ।
बालार्कश्रेणिवद्व्योम्नि विरराज समीरणः ॥१८॥

हृन्मध्यात् सुषुम्णायां संस्थितो हुतभुक्तदा ।
सजलाम्बुदमालासु विद्युल्लेखेव राजते ॥१९॥

प्रबुद्धहृत्पद्मनि संस्थितेऽग्नौ प्राणे च तस्मिन्विनिवेशिते च ।
चिह्नानि बाह्यानि तथान्तराणि दीपादि दृश्याणि भवन्ति तस्य ॥२०॥

– -------; ग१, ६, न३, ४, ६, ७, ८–मध्ये तदा----------; ग५–मध्ये सदा---------------। १७/३–त–सहस्त्रापत्रान्तु (?) ------; न१, २–सहस्त्रचक्रस्य मुखं-------। १७/४–अस्य चरणस्य त्रयो विभागाः–(१) कुर्यात् ; (२) पुनस्तूर्ध्वमुखं ; (३) द्विजिह्वः । तेभ्यः "कुर्यात्" शब्दः सर्वसामान्यः । २-३ विभागौ विभिन्नस्वरूपैर्दृश्येते । तानीदृशानिः– (१)–ग२, ३, ४, ५, ६, न५, ७, ८, त्रि. पु., मुं. पु. न. पु.–पुनस्तूर्ध्वमुखं ; न४, ६–पुनश्चोर्ध्वमुखं ; न२–पुनरूर्ध्वमुखं ; ग१–पुनस्तूर्ध्वगतं ; न३–ततस्तूर्ध्वमुखं ; न१–फणामूर्ध्वमुखंः(२)–न१, २–द्विजिह्वः ग१, २, ३, ५, ६, न३, ४, ५, ७, त, त्रि. पु., मुं. पु., न. पु., मु. पु., क. पु.–द्विजेन्द्रे ; न६–द्विजेन्द्रैः ; ग४, न८–नरेन्द्रे ।

१८/१–ग२, ५, ६, न५, ७–प्रबुद्धे---------; न१–प्रबुद्धहृदयाम्भोजं(?) । १८/२–ग१–केसरान्वितकर्णिके । १८/३–ग४, न८–बलाकश्रेणि–(?)-------------; ग१, न३, ४–बलाकाश्रेणि---------; न७–बालार्क(?)श्रेणि-------------; न४–बालार्कशोणिते व्योम्नि । १८/४–ग३–द्वि+राज-----; न२, ७–विराजंति (?विराजति)---------; न५–विरायंति (?विराजति)-----; न१, ४, ८, ग२, ५–विराजति-------; ग४–विचरन्ति(?) -------।

१९/१–न२–द्वन्मध्यात्तु (?हृन्मध्यात्तु)-----; ग२, न८–आहुर्मध्यात्सु------(?आहृन्मध्यात्सु-----) ; ग१, ३, ४, ६, न३, ४, ६–आभ्रूमध्यात्-----------; ग५–आभ्रूमध्यात्सुषुम्णायाः। १९/२–न३, ४, ८, ग४– -----------सदा ; ग३–संस्थिते-------तदा ; ग५–संस्थितो भूपवाहन(?) ; ग६–संस्थितो हव्यवाहनः ; ग२–सुस्थिरा बहुभुक्त तथा(?) । १९/३–न८–सुबलाम्बुद-------; न१, २, ४, ५, ७–सजलाम्बुदमालाभिः ; ग४–सजलाम्बुदमध्यस्था । १९/४–ग३– ---------राजिते (?राजते) ।

२०/१–न८– ------------संस्थिते च ; ग४– -----------संस्थितेन(?) ; न७–-------हृत्पद्म(–नि)संस्थितेऽग्नौ ; न२– -------हृत्पद्मे च---------; ग५– ---------हृत्पङ्कज---------; त– -------हृत्पद्मनिभं स्थिते च(?) । २०/२–न३–प्राणे च (?प्राणेषु) ----विनिवेशितेषु ; ग५, ६–प्राणेषु----------विनिवेशितेषु ; न८–प्राणे च-----------विनिवेशितं च (?) ; ग१, २, ४, न५, ६, ७– -----------प्रविवेशिते तु । २०/३–ग१, २, ३, ५–---------तथान्तरेऽपि ; ग४– -----------तथान्तरे च । २०/४–इदं चरणं त्रिधा विभज्य लेखान्तर्गतानां पाठभेदानां साम्यवैषम्ये प्रदृश्येते । (१) न४–दिव्यानि दृश्याणि ; न३–द्वीपानि (?दीपानि)-----; अन्येषु १३ लेखेषु–दीपादि दृश्यानि ; (२) "भवन्ति" शब्दः सर्वसामान्यः ; (३) न२, ३, ५, ७–तानि ; न१, ग१, २, त–सद्यः ; ग३–तस्याः ; न४,६, ७, ग४, ५, ६–तस्य ।

वायुमुन्नय ततस्तु सर्वह्निं व्याहरन्प्रणवमत्र सबिन्दुम् ।
बालचन्द्रसदृशे तु ललाटे बालचन्द्रमवलोकय बुद्धया ॥२१॥

सवह्निं वायुमारोप्य भ्रुवोर्मध्ये धिया तदा ।
*ध्यायेदनन्यधीः पश्चादन्तरात्मानमन्तरे ॥२२॥

२१/१–ग१, २,– ––––––––––तत्र सवह्निना ; न१, २, ७– वायुमुन्नयति दीप्तवह्निना ; न५–वायुमुन्नयति दीप्ति–(?-दीप्त-) वह्निना ; न४, ग३–वायु–––––––सह वह्निं ; ग४–वायु–––––––––यत्र सवह्निं ; न३–वायुर्मुनति (?वायुमुन्नयति) यः सह वह्निं ; न८–वायुर्नयति यत्र सवह्निं। २१/२–न८– ––––––––––––––सबिन्दुः (?सबिन्दुं) ; ग३, ४– ––––– –न्प्रणवमन्त्रसबिन्दुम् ; न६– –––––––श्रणवमुद्रस्त (?प्रणवमन्त्र-) सबिन्दुम् ; ग६– –––––प्रणवात्म–(?प्रणवमन्त्रं) सबिन्दुम्। २१/३–न१, २, ५, ७– –––––––सदृशी तु (?सदृशे तु)––––; ग५, ६–––––––– सदृशेऽपि–––––; न३– –––––––सहरे (?सदृशे) – –––––; न६–बालचं+ + + + + +। २१/४– न३– ––––– –मिव लोक्यन्बुधाः ।

२२/१–न१, ३, ४–सवह्निवायुमारोप्य ; ग६–वह्निनामायुरोप्य(?) । २२/२– ग२––––––––––––धिया सदा ; न६, ८, ग५– –––––––––––––धिया तथा ; न१– ––––––––––धियात्तदा (?धिया तदा) । २२/३–ग४, न८–ध्यायेत नान्यधीः––––––; ग२–ध्यायेदनन्यधीः शान्तात्(?) । २२/४–न१–अन्तरात्मानमात्मना ; त– –––––––––– –मात्मनि ; न३– ––––––––––– –मंतरो (?मंतरे) ; ग२–आत्मानं मनसोऽन्तरे ।

*अत्र "ग६" लेख अधिकः श्लोकः । **सः त्रिपुरसारसमुच्चयादुद्धृत इव दृश्यते ।** तीवाशुद्धः पाठान्तरैर्युक्तश्च "ग२" लेखेऽपि दृश्यते । सोऽयं श्लोकः––

आदौ मत्तालिमालां गलपदविगलत्ताराझंकारहारी
नादोऽसौ वांशिकस्यानलभरितलसद्वंशनिःसाणतुल्यः ।
घण्टानादानुकारी तदनुजलनिधिर्ध्यानधीरो गभीरः
गर्जत्पर्जन्यधोषापर इव कुहरे ब्रह्मनाडचा शुषुम्नाम् ॥

अयं श्लोकोऽत्रातीव विसंगत इति तस्य शोधने यत्नो न कृतः । न. पु., मु. पु., क. पु.,–षु चान्य एवाधिकः श्लोकः। सः–

तस्मिन्ब्रह्मपुरे गार्गि ब्रह्मैवाज्ञानमोहिते ।
भ्रान्त्यारूढः स जीवः स्यादाच्छन्नो महदादिभिः ॥

अयमप्यशुद्धियुक्तः ।

मध्यमेऽपि हृदये च ललाटे स्थाणुवज्ज्वलति लिङ्गमदृश्यम् ।
अस्ति गार्गि परमार्थमिदं त्वं पश्य पश्य मनसा रुचिरूपम् ॥२३॥

ललाटमध्ये हृदयाम्बुजे च यः पश्यति ज्ञानमयीं प्रभां तु ।
शक्तिं सदा दीपवदुज्ज्वलन्तीं स पश्यति ब्रह्मविदेकदृष्टया ॥२४॥

मनो लयं यदा याति भ्रूमध्ये योगिनां नृणाम् ।
जिह्वामूलेऽमृतस्रावो भ्रूमध्ये चात्मदर्शनम् ॥२५॥

कम्पनं च तथा मूर्ध्नो मनसैवात्मदर्शनम् ।
देवोद्यानानि रम्याणि नक्षत्राणि च चन्द्रमाः ॥
ऋषयः सिद्धगन्धर्वाः प्रकाशं यान्ति योगिनाम् ॥२६॥

२३/१– ग१, ३, ४, न४, ७, ८–मध्यमेऽपि हृदयेऽपि——; ग२– ——च हृदयेऽपि——। २३/२–न२, ग१, त–स्थाणुवज्ज्वलित——; न३–स्थाणुवज्ज्वलितलिङ्गमदवोश्शं (?लिङ्गमदृश्यम्); न१, ५–स्थाणुवज्ज्वलितलिङ्गसदृश्यम् (?–मदृश्यम्) ग२–स्थाणवच्छुरित(?)——; ग४–स्थाणुवत्स्वललितंगमदृश्यम् (?स्थाणुवत्, ज्वलित, लिंगमदृश्यम्); न८–स्थाणुवत्कलित (?ज्ज्वलित-)——। २३/३–न५– ——————परमार्थमिदं++; न२, ७, त– ——————मिदं हि; ग३– ——————मिदं तु; न. पु., क. पु.– —————–मिदं तं; ग१, त्रि. पु., मुं. पु.– —————परमात्ममिदं त्वं; ग५–अस्तु– ——————; न१– ———— –मिदं तत्; ग४, न८– —————परमार्थविदां त्वं। २३/४–न४– —————रुचिपुंजम्; न१, २, ७– ——————शिवरूपम्; न५–पश्य+++++शिवरूपम्; ग२– —————मनसा च विरूपम्(?); त– ————मनसा विधिरूपम्; ग३– —————रुचिरं वपुः; न३– ——————हृदियुक्तम्।

२४/१–न३– ——————वा। २४/२–ग२, ५– ——————प्रभां ताम्; न४– —————प्रभाते; न६–प्रपश्यति——————; ग३–यः श्रुतिज्ञानमतिप्रभाते(?) २४/३–न१, २, ४, ५, ग३, न७– ——तदा————; न८–शक्तिः(?)सदा दीर्घवदुज्जवलन्ती(?)। २४/४–ग१, ४, त–सम्पश्यति————; न३– ————ब्रह्मवदेव शिष्टा(?); ग५– ——————ब्रह्मवदेकदृश्याम्(?) न८–पश्यन्ति ते(?) ब्रह्मविवेकदृष्टया।

२५/१–ग३– —————यथा याति; न६– ————लयं याति यथा। २५/२–न७– ————योगिनोमृण (?योगिनां नृणाम्); न३–भ्रुवात्मध्ये(?)————। २५/३–न१– ——स्रा——स्रावं(?); ग४, न८– ——ऽमृते स्रावे; न३–जिह्वामूलामृतस्वादो; न४, ग३–जिव्हामूलामृतस्रावात्। २५/४–न३, ५, ७– —— –त्वात्मदर्शनम्।

२६/१–न३– ——————मूर्ध्नि; त–कथनं च(?)————मूर्ध्नो; न१, २, ५, ७–दीपनं च तथा मूर्छा; न८–सम्पन्नं च(?) तथा मूर्ध्नो; ग२–××××। २६/२–ग३– मनसं (?मनसा) वात–(?वात्म-) दर्शनम्; न६– मनसा मातरिश्वनम्(?); ग२–××××। २६/३–न४–नवोद्यानानि——; ग३–दिव्यौद्यान्रममाणानां(?)। २६/४–न१, ५, ७, त– ————ग्रहाश्रये(?); न२– ————ग्रहाणि च(?)। २६/५–ग३– ——पितरः सिद्धाः; न२, ७–तापसाः सिद्धगन्धर्वाः। २६/६–ग२–प्रणाशं(?) यान्ति योगिनः; ग१, ४, न४–प्रकाशन्ति च योगिनाम्।

भ्रुवोन्तरे विष्णुपदे ऋचौ (?रुचौ)तु मनो लयं यावदियात्प्रबुद्धे ।
तावत्समभ्यस्य पुनः खमध्ये सुखं सदा संस्मर पूर्णरूपम् ॥२७॥

समीरणे विष्णुपदे निविष्टे जीवे च तस्मिन्नमृते च संस्थे ।
तस्मिंस्तदा याति मनो लयं चेन्मुक्तेः समीपं तदिति ब्रुवन्ति ॥२८॥

समीरणे विष्णुपदे निविष्टे विशुद्धबुद्धौ च तदात्मनिष्ठे ।
आनन्दमत्यद्भुतमस्ति सत्यं त्वं गार्गि पश्याद्य विशुद्धबुद्ध्या ॥२९॥

२७/१–न१, ४, ५, ७, ग१, ३, त, त्रि. पु., मुं. पु.– ————————ऋचौ तु ; ग४, न८– ————————ऋचौ च ; न२– ————————विष्णुपदं निविष्टं ; न३, न. पु., मु. पु., क. पु.– ————————विष्णुपदे च नाभौ ; ग२– भ्रुवोर्मध्ये विष्णुपदे खमध्ये। स्वीकृतादन्याः पाठा अस्वीकारणीयाः। "ऋचि" इति शब्दो न कस्मिन्नपि कोशे। "रूचि" शब्दस्य प्रभा, भाः, गभस्तिरादि पर्यायाः ; स चात्र समीचीनो दृश्यते, "भ्रुवोन्तरे विष्णुपदे रुचौ प्रभायां यावन्मनो लयमियात् हे प्रबुद्धे" इति योजना । २७/२–न४– ————————प्रबुद्धेः(?) ; न२, ५, ६ ७– ————————प्रमुग्धे ; ग५, ६–मनो लयं याति यदा प्रबुद्धे ; न३– ————————यावदिदं प्रयाति ; न३– ————————यान्ति ययः(?) प्रमुग्धे। २७/३ –न८– ———————— पुनः खमध्ये ; न४, ग३, ४– ————————पुनश्च मध्ये। २७/४–ग१, न३, ४, ६–सोमं———————— ; न१, २, ५, ७, ग३–हंसं———————— ; त–तेजः———————— ; ग२–जीवन्मुखे———————— ; ग४, न८–भावं———————— ; ग५–ईशं स्मर त्वं परिपूर्णरूपम् ; ग६–ईशः पुनस्त्वं परिपूर्णरूपम् ।

२८/१–४–श्लोकोऽयं "न१, २, ४, ५, ६, ७, ग३" लेखेषु नास्ति । २८/१–ग४, न८– ————————ऋचौ च ; ग५, ६– ————————व्योमगते सवह्नौ। २८/२–न३–जीवेषु तस्मिन्नमृतेषु———— ; ग५–जीवेषु– ————सुसंस्थे ; ग६–जीवे च————————सुसंस्थे ; न८–जीवेन ————————सुसंस्थे ; ग२–जीवे च– ————तथा च। २८/३–न३– ———————— लयं च ; ग५, ६– ————यदा————लयं च ; ग४–तस्मिन्सदा————————लयं च ; ग२– ————यथा————————लयं चेत् ; न८– ————यदा————————लयश्चेत्(?) । २८/४–ग२– ————————तदुदीरयन्ति ; न३– ————तदिति ध्रुवंते(?) ।

२९/१–न६, ग३– ————————प्रविष्टे ; न१, २, ५– ————————विष्णुपदं निविष्टे ; ग५, ६– ————————वह्निपदे————। २९/२–न४, ग३–विशुद्धबुद्ध्या च———— ; न६–विशुद्धबुद्ध्या च तथात्मनि स्थिते ; न१–विशुद्धबुद्धौ(च) तथात्मनिष्ठे ; न५– ————————तथात्मनिष्ठां(?) ; न७– ————————तथात्मनिष्ठे ; न३–वि+++++ तथात्मनिस्थे ; ग२– ————————तदात्मरूपम् । २९/३–न१, २, ५– ————————मत्यद्भुतमात्र (?-मत्र) सत्यं ; न७– ————————मत्यद्भुतमत्र सत्यं ; ग३– ————————मत्यद्भुत++++ । २९/४–न१, ५– ————————पश्येह———— ; न६– ————————पश्याथ———————— ; न८– ———————— पश्चाच्च(?)———— ; त– ————————पश्चाद्यदि शुद्धबुद्ध्या ।

एवं समभ्यस्य सुदीर्घकालं यमादिभिर्युक्ततनुर्मिताशीः ।
*आत्मानमासाद्य गुहां प्रविष्टं मुक्तिं व्रज ब्रह्मपुरे पुनस्त्वम् ।।३०।।

भूतानि यस्मात्प्रभवन्ति गार्गि येनैव जीवन्ति चराचराणि।
जातानि यस्मिन्विलयं प्रयान्ति तद्ब्रह्म विद्धीति वदन्ति सर्वे ।।३१।।

हृत्पङ्कजे व्योम्नि यदेकरूपं सत्यं सदानन्दमयं सुसूक्ष्मम् ।
तद्ब्रह्म निर्भासमयं गुहायामिति श्रुतिश्चेति समामनन्ति ।।३२।।

३०/१–ग३–यदा——————; न७–एष समभ्यस्य(?)——————; न३–एवं ———सुदीर्घकाले। ३०/२–न१, २, ५, ७–शमादिभिर्युक्त————; न६–यामादि (?यभादि–) भिर्युंक्त———; ग५– ————र्युक्ततनु(?)————; न३–यमादिभिर्यस्तु तनुमिनाशः(?) ; ग३–××××××। *अत्र "न६" लेखे "समीरणे विष्णुपदे" इत्यादिः, "मुक्तेः समीपं तदिति ब्रुवन्ति" इत्यन्तः श्लोकः । स तु १२.२८ एव दुःस्थाने । ३०/३–ग१, ४– —————— प्रविष्टां (?प्रविष्टं) ; न६– ——————प्रविष्टा (?प्रविष्टं) ; ग३–++ गुहे प्रविष्टे(?) । ३०/४–न३, ग४– ——————पुनश्च ; न६– ———ब्रह्मपदे———; न८–मुक्तिं व्रजेद्ब्रह्मपदं पुनस्त्वम् ; ग२–मुक्तेः पदे ब्रह्मपुरे पुनस्त्वम् ।

३१/१–ग१, २, त्रि. पु., मुं. पु.– ————————गार्गि ; न. पु.– —————— साध्वि ; त– ——————नित्यं ; न४– ———————यानि ; न३– ——————————सर्वाणि(?) ; न७– ——————सर्गे ; न३, ५, ८, ग४, ५, ६– ——————————सर्वे ; न१–यस्माच्च भूतानि भवन्ति सर्वे ; न२–भूतानि यस्माच्च भवन्ति सर्वे । ३१/२–ग२– ——————पदे प्रणष्टम्(?) ; न८–ये चैव——————चराचराणि। ३१/३–त–ज्ञानानि(?)——————; न४–जातास्तु(?)——————; न६–जातानि गार्गि———; ग४, न८– ———यस्मिन्प्रलयं———; ग२– ———यस्यां प्रलयं प्रयाति(?)। ३१/४ –ग५, ६–तद्ब्रह्म विद्येति(?)——————।

३२/१–अस्य चरणस्य पुनर्विभागीकरणं प्राप्यते। तस्य विभागाः–(१) हृत्पङ्कजे ; (२) व्योम्नि ; (३) यदेकरूपम्। तेषां विषये च पाठभेदाल्लेखादिविभागाः–(१)–न१, २, ३, ५, ६, ७, ८, ग१, ४, ५, ६, त, त्रि. पु., मुं. पु., न. पु., मु. पु., क. पु.–हृत्पङ्कजे ; न४, ग३–हृत्पङ्कजं ; ग२–हृत्पद्मनि; (२) न१, २, ३, ४, ५, ६, ८, ग१, ३, ४, ५, ६, त, त्रि. पु., मुं. पु., न. पु., मु. पु., क. पु.–व्योम्नि ; ग२–व्याम्नि (?व्योम्नि) ; न७–मोनि (?व्योम्नि); (३) न१, २, ५, ६, ७, ८, ग१, ४, ५, ६, त, त्रि. पु., मुं. पु., मु. पु., क. पु–यदेकरूपम् ; ग३–तदैकरूपम् ; न४–तथैवरूपम् ; न३–सदेवरूपम् ; न. पु.–सदैकरूपम्; ग२–अनेकरूपम्। ३२/२–न३– ———यदानन्दमयं ससूक्ष्मम्; ग६–सम्यक्सदानन्द———। ३२/३–न१, २– ——————वदन्ति; ग१, त– ————निर्भासमयो(?)———; ग२–तद्ब्रह्म विज्ञानमयं———; न८–यद्ब्रह्म विज्ञानमयो(?)———; ग४–यद्ब्रह्म विज्ञानमतो(?)———; न३, ४, ६–तद्ब्रह्मविद्भावयते———; ग३–तद्ब्रह्मविद्भावयते सुहायाम् (?गुहायाम्); ग५, ६–प्रत्यक्सदाभासमयं गुहायाम्। ३२/४ –ग५, ६– ——— श्रुतिश्चेति समामनन्ति ; न४, ५, ६, ८–इति श्रुतिश्चापि(?)—————; ग३– ———श्रुती(?) चापि——————; ग१, २, त्रि. पु., मुं. पु.– ———श्रुतेश्चापि——————; न१, २, ७, ग४, त– ————श्रुतिं——————; न३– ———श्रुतिज्ञाश्च——————; न. पु., मु. पु., क. पु.–इति श्रुतेश्चापि समाप्नुवन्ति(?) ।

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्य विशुद्धबुद्धया प्रयाणकाले च विहीनशोका ॥३३॥

प्रभंजनं मूर्ध्निगतं सर्वाङ्गि धिया समासाद्य गुरूपदेशात् ।
मूर्धानमुद्भिद्य पुनः खमध्ये प्राणांस्त्यजोङ्कारमनुस्मरंस्त्वम् ॥३४॥

ईप्सया यदि शरीरविसर्गं ज्ञातुमिच्छसि सखे तव वक्ष्ये ।
व्याहरन्प्रणवमुन्नय मूर्ध्नि भिद्य योजय तमात्मनिकायम् ॥३५॥

एतत्पवित्रं परमं योगमष्टाङ्गसंयुतम् ।
ज्ञानं गुह्यतमं पुण्यं कीर्तितं ते वरानने ॥३६॥

३३/१–ग३–× × × × । ३३/२–न७, ८– ———————निहितस्य (?निहितोऽस्य)——; ग३–× × × × × । ३३/३–ग२–तमक्षरं ————————; न१–तमक्रमं——————; न५–तमक्रमे————————; न३–तमद्भुतं————————; त–तमद्भुतं पश्यति शुद्धबुद्धया ; न४–तमक्रतुं पश्यति शुद्धबुद्धया ; ग१– ———————वीतशोकः ; ग३–× × × × × × × । ३३/४–न१, २, ५, ६ ७, ग२, ४, ५, ६, त–प्रयाणकालेऽपि —————; न३– —————च विहिनशोकाः ; न४– ———————च विहीनशोकः ; ग५–तेनैव कालेन विहीनशोकाः ; न८–तथैव कालेन विहीनशोकः ; ग१–धातुः प्रसादान्महिमानमीशम् ; ग३–× × × × × × × ।

३४/१–ग३–× × × × । ३४/२–ग३–++ ———————; ग२– ——समारोप्य————। ३४/३–न६–मूर्ध्ना समुद्भिद्य(?)——————; न३– ————————पुनः स्वमध्ये ; न४–मूर्धानमुद्भिन्नवपुः(?)——————; न८–मूर्धानमुत्पद्य(?)पुनः——————। ३४/४–इदं चरणं त्रिधा विभज्य साम्यवैषम्ये निर्णेतव्ये भवतः । ते विभागाः–(१) प्राणांस्त्यज ; (२) ओंकारम् ; (३) अनुस्मरंस्त्वम् । तेषां पाठभेदाः–(१) न१, ५, ८, ग३, ४, ५, ६, मु. पु. क. पु.–प्राणांस्त्यज ; न२, ३, ४, ६, ७, ग१, २, त, त्रि. पु., मुं. पु.–प्राणं त्यज ; (२) "न८" लेखं विना सर्वत्र "ओंकारम्" शब्दः समानः ; न८–स ओंकारम्; (३) ग३, न७–न. पु., मु. पु.–अनुस्मरंस्त्वम् ; न१, २, ३, ४, ५, ६, ग१, ५, ६, त, क. पु.–अनुस्मर त्वम् ; ग२, ४–अनुस्मरन्ति(?) ; न८–अनुस्मरन्ती ।

३५/१–न१, २, ३, ४, ५, ६, ७, ग३, ६–इच्छया————————————; ग४–× × × × × × । ३५/२–ग६–ज्ञातुमर्हसि——————; ग४–× × × × × । ३५/३–ग१–व्याहर प्रणव——————; न३–व्याहरन्प्रणव——————मूर्ध्ना(?) ; न१– ——————————— –मुन्नतमूर्ध्नि ; न२– ———————मुन्नतमूर्ध्नो ; ग२– ——————————मुन्नतमूर्ध्ना ; न७– ————————मुन्नतमूर्धो(?) ; न८– ———————— –मुन्नय बुद्धया ; ग५, ६–व्याहर प्रणवमुन्नय बुद्धया ; ग३, ४–× × × × × । ३५/४–ग५, न८– —————तदात्मनिकायम् ; ग१, न३, ४, त– ———————सृजात्मनिकायम् ; न१–भेदनं कुरु सृजात्मनिकायम् ; न२–भेदनं कुरु त्यजात्मनिकायम् ; ग२–विद्ययोर्भय जयात्मनिकायम्(?) ; ग३, ४–× × × × ।

३६/१–न१, २, ७, त–एवं पवित्रं——————; न५–एनं पवित्रं—————; ग४, न८–ततः पवित्रं——————। ३६/३–ग१, २, ४, ५, ६, न८– ———पुण्यतमं गुह्यं । ३६/४–न३, ५– ———च———; न७– ——————वै——————।

य इदं शृणुयान्नित्यं योगाख्यानं नरोत्तमः ।
सर्वपापविनिर्मुक्तः सम्यग्ज्ञानी भविष्यति ॥३७॥

यस्त्वेतच्छ्रावयेद्विद्वान्नित्यं भक्तिसमन्वितः ।
एकजन्मकृतं पापं दिनेनैकेन नश्यति ॥३८॥

शृणुयाद्यः सकृद्वापि योगाख्यानमिदं नरः ।
अज्ञानजनितं पापं सर्वं तस्य प्रणश्यति ॥३९॥

अनुतिष्ठन्ति ये नित्यमात्मज्ञानसमन्वितम् ।
नित्यकर्मणि तान्दृष्ट्वा देवाश्च प्रणमन्ति हि ॥४०॥

३७/१–न३–इदं श्रृणोति यो नित्यं ; ग३– ++ श्रृणुयान्नित्यं; ग२–× × × × । ३७/२–ग३– ––––––––––नरोत्तमे ; ग४– –––––– –मनुत्तमम् ; ग२–× × × × । ३७/३–ग३– ––––––––––विनिर्मुक्ता(?) ; न७– ––––––––––विनिमुक्ताः (?) ; ग२–× × × × । ३७/४–न२, ४, ५–सम्यग्ज्ञानं(?)––––––––; न७–सम्यग्ज्ञानो(?–ज्ञानी)––––––; ग५, ६–सर्वज्ञः स भविष्यति ; ग२– ++++ ।

३८/१–न१, २, ५–यस्त्वेवं––––––––; न६–यश्चैवं––––––––; ग१–य इदं––––––––; न४–यदिदं––––––––––––; ग२–इत्येतच्छ्रुणुयान्नित्यं ; ग५, ६, न८–× × × × । ३८/२–ग२–विद्वान्भक्तिसमन्वितः ; ग५, ६, न८ × × × × । ३८/३–न१, २, ५, ७, त–अनेकजन्मजं––––––; ग२–अज्ञानजनितं––––––; न३, ४, ग३–बहुजन्मकृतं––––––––––; ग५, ६, न८–× × × × । ३८/।४–न१, २, त, ग२–सर्वं सद्यो विनश्यति ; न३–पठे सद्यः(?) प्रणश्यति ; ग५, ६, न८–× × × × ।

३९/१–ग४, न८–श्रृणुयाद्यः स वै मुक्तः ; न१, ३, ग२, ३, ५, ६–× × × × । ३९/२–न८–योगाभ्यासमिदं नरः ; न१, ३, ग२, ३, ५, ६–× × × × । ३९/३–न१, ३, ग२, ३, ५, ६–× × × × । ३९/४–ग४– ––––––––––––––विनश्यति ; न२, ५, ६, ७, ८– ––––––सद्यः प्रणश्यति ; न४–दिनेनैकेन नश्यति ; न१, ३, ग२, ३, ५, ६–× × × × ।

४०/१– न१, २, ३, ५, ७, ८, ग४, त–अनुतिष्ठति यो नित्यं ; न४, ग५, ६–× × × ×। ४०/२–न१, २, ३, ५, ७, ग३, त–एतज्ज्ञानसमन्वितः(?) ; न६–एतज्ज्ञानसमन्विताः; ग४– अन्तर्ज्ञानसमन्वितः ; ग२–एवं योगं समाहिताः; न८–आत्मज्ञासमन्वितम्; न४, ग५, ६–× × × ×। ४०/३–न५––––––––––तं––––; न७–नित्यं कर्माणि (?कर्मणि)तं दृष्टवा; ग२–नित्यं कर्मरता विप्राः ; ग४, न८–नित्यकर्मरतान्दृष्टवा ; न४, ग५, ६–× × × × । ४०/४–ग३– ––––––प्रशसन्ति हि ; न१–देवास्तं प्रणमन्ति हि ; ग२–ते यान्ति परमां गतिम् ; न४, ग५, ६–× × × × ।

तस्माज्ज्ञानेन देहान्तं नित्यं कर्म यथाविधि ।
कर्तव्यं देहिभिर्गार्गि योगश्च भवभीरुभिः ॥४१॥

इत्येवमुक्त्वा भगवान्रहस्ये रहस्यजं मुक्तिकरं तु तस्याः ।
योगामृतं बन्धविनाशहेतुं समाधिमास्ते रहसि द्विजेन्द्रः ॥४२॥

सा तं तु सम्पूज्य मुनिं ब्रुवन्तं विद्यानिधिं ब्रह्मविदां वरिष्ठम् ।
गीर्भिः प्रणामैश्च सतां वरिष्ठं सदा मुदं प्राप वरां विशुद्धाम् ॥४३॥

४१/१–न२– ————————देहान्ते ; न३– ——————देहांति (?देहांते) ; न४, ग१, ३–तस्य ज्ञानेन देहान्तं ; ग५, ६– × × × × । **४१**/२–ग१, २, ३, न३, ४, ५, ६, ७, त–नित्य–कर्म————————; न८–नित्यं कर्म यथा तथा ; ग४–नित्यकर्म यथा तथा । **४१**/३–ग१, २, ३, न३, ६– ——————देहिना गार्गि ; न४, त————देहिनां———; ग४–कर्तव्यो(?) देहिभिर्गार्गि; ग५, ६– × × × × । **४१**/४–न४, ग३–योगं च (?योगश्च) भवभीरुभिः; ग२–योगे च भवभीरुणा ; न६–योगस्य (?योगश्च) भवभीरुभिः ; ग५, ६– ———— × × × × ।

४२/१–न१, २, ५– ——————भगवान्प्रहस्य ; न४– ——————भगवान्मुनीशः ; ग२– ————————भगवान्स सिद्धया ; ग३– × × × × । **४२**/२–ग२– —————मुक्तिकरं च साध्वी ; न४– ——————तु तस्यै ; न६– ————————च सा च ; न८–रहस्यमुक्ति मधुरं तु तस्याः(?) ; ग३– × × × × । **४२**/३–ग३– ++++ विनाशयेतुं(?) ; ग२– × × × × । **४२**/४–न४, ग३– ————————द्विजेन्द्रे (?) ; ग४–समाधिमान्स्वे रहसि द्विजेन्द्रे ; न८–समाधिमान्खे रहसि द्विजेन्द्रः ; न३–समाधिनास्ते————————।

४३/१–इदं चरणं त्रिधा विभज्य लेखानां मुद्रितपुस्तकानां च साम्यवैषम्ये निर्णेतव्ये भवतः । ते विभागाः–(१) सा तं; (२) तु सम्पूज्य; (३) मुनिं ब्रुवन्तं । तेषां विषये च पाठभेदाल्लेखादिविभागाः– ——— (१)–न१, २, ३, ५, ८, ग१, ४, ५, ६, त, त्रि. पु., मुं. पु., मु. पु., क. पु. –सा तं ; न४, ग३–शांतं ; न६–सारं (?) ; न. पु.–ज्ञातं; ग२, न७– × × × × ; (२)–न१, २, ५, ग१, ३, ४, ५, ६, त, त्रि. पु., मुं. पु.–तु सम्पूज्य ; न३, ४, ६, ८, न. पु., मु. पु., क. पु.–सुसम्पूज्य ; ग२, न७– × × × × ; (३)–न३, ४, ६, ८, ग३, ४, ५, ६, त, न. पु., मु. पु., क. पु.–मुनिं ब्रुवन्तं ; न१, २, ५, ग१, त्रि. पु., मुं पु.–मुनिं महान्तं ; ग२, न७– × × × × । **४३**/२–न३– ————————ब्रह्मवतां (?ब्रह्मविदां)———; न४, ग१, ५, ६–विद्यामृतं——————————; ग२, न७– × × × × । **४३**/३–न१– ——————————वरां वरिष्ठं(?) ; ग३– ——————————सती वरिष्टं ; न४– ————————असति(?) वरिष्ठं ; ग१, ४, न५–सतां वरिष्ठा ; न३–गार्गि प्रणामैश्चरतां सतां(?) ; ग२– ++++ । **४३**/४–इदं चरणमपि त्रिधा विभज्य लेखानां मुद्रितपुस्तकानां च साम्यवैषम्ये निर्णेतव्ये भवतः । ते विभागाः–(१) सदा मुदं ; (२) प्राप ; (३) वरां विशुद्धाम् । तेषां पाठभेदाल्लेखादिविभागाः–(१) न१, २, ५, ६, ७, ग१, ५, ६, त्रि. पु.–सदा मुदं ; न८, ग४, त, न. पु., मु. पु., क. पु.–तदा मुदं ; न४–सदमृतं(?) ; ग३–सदामृतं ; ग२, न३– × × × × ; (२) न१, २, ६, ७, ८, ग१, ४, ६, त्रि. पु., मुं. पु., न. पु., मु. पु., क. पु.–प्राप ; न४, ५, ग५, त–प्राप्य (?) ; ग२, ३, न३– × × × × ; (३) न१, ग१, त्रि. पु., मुं. पु.–वरां विशुद्धाम्; ग५–वरा वरिष्ठम् ; न२, ७–वरं वरिष्ठम्; न५–वरं वरिष्ठाम्(?) ; न६–वरं सुशुद्धिम् (?); ग६–परं वरिष्ठा(?) ; न४–परां सुशुद्धिम् ; ग३–परानुबुद्धम् (?) ; न८, ग४–पदारविन्दे ; न. पु. सदा सुशुद्धा ; ग४–सदानुबुद्धया(?) ; मु. पु., क. पु.–सदाशु बुद्धया ।

योगं सुसंगृह्य तदा रहस्ये रहस्यजं मुक्तिकरं च जन्तोः ।
संसारमुत्सृज्य सदा मुदान्विता वने रहस्यावसथे विवेश ॥४४॥

येन प्रपञ्चं परिपूर्णमेतद्येनैव विश्वं प्रतिभाति सर्वम् ।
तं वासुदेवं श्रुतिमूर्ध्नि जातं पश्यन्सदास्ते हृदि मूर्ध्नि चान्वहम् ॥४५॥

यदेकमव्यक्तमनन्तमच्युतं प्रपञ्चजन्मादिकृदप्रमेयम् ।
तं वासुदेवं श्रुतिमूर्ध्नि जातं पश्यन्सदास्ते हृदि मूर्ध्नि चान्वहम् ॥४६॥

इति श्रीयोगयाज्ञवल्क्ये द्वादशोऽध्यायः ॥
समाप्तमिदं योगशास्त्रम् ॥

४४/१–ग३ ——————————तथा——————; न६– ++++ । तदा————; न३, ग४– ++++ । ४४/२–न१, २, ५, ग२– ———————च सा च ; ग१, न६– ———————तु सा च ; त– ——————तु जन्तोः ; ग५, ६, न८– ————————च गार्गी(?) ; न३, ग४–×××× । ४४/३–इदं चरणं द्विधा विभज्य लेखानां मुद्रित-पुस्तकानां च साम्यवैषम्ये निर्णेतव्ये भवतः । तौ विभागौः—(१) संसारमुत्सृज्य ; (२) सदा मुदान्विता । तयोर्लेखादीषु पाठाः–(१) न१, २, ३, ५, ६, ७, ८, ग१, २, ४, ५, ६, त, त्रि. पु., मुं. पु., न. पु., मु. पु., क. पु.–संसारमुत्सृज्य ; न४–संसारमुत्पुष्ट(?) ; ग३–संसारमदृष्ट(?) ; (२) न४, ५, ६, ग१, ३, ४–सदा मुदान्विता ; न२, ३, ७, ग२, त, मुं. पु., न. पु., मु. पु. क. पु.–तदा मुदान्विता ; न१–तदा मुदा चिता (?मुदान्विता) ; ग५, ६, न८–मुदान्विता सा ; त्रि. पु.– ++++। ४४/४–न४– ———————निवेश्य(?) ग३–वसे (?वने) रहस्येऽवसथे विवेश; न६, ग६–वने रहस्यावसथं———; ग४– ———रहस्येऽन्वथ(?)सा———; ग५, न८–परे रहस्ये च तदा———; ग२–तावन्महस्यास्समभाविवेश(?); न३–तेने(?) रहस्यावसथे निवेश्य(?) ।

४५/१–न६–येन प्रपञ्चं परि-++++ । न३–येनैव सर्वं परिपूर्णमेतत् ; ग४–××××। ४५/२–त– ————————————प्रतिभाति साध्वी(?) ; न३–येनैव सर्वं (?विश्वं) प्रतिभाति सर्वम् ; ग२, ४, न६–××××। ४५/३–ग५– ——————————श्रुतिमूर्ध-चाहम्(?) ; ग६– —————श्रुतिमूर्ध्वं नित्यं (?); न८–तं वामदेवं प्रतिमार्धजातं ; ग२, ४, न६–××××। ४५/४–अस्य चरणस्य पुनर्द्वौ विभागौ कृत्वा लेखादीनां साम्यवैषम्ये निर्णे-तव्ये भवतः । तौ विभागौः–(१) पश्यन्सदास्ते ; (२) हृदि मूर्ध्नि चान्वहम् । तयोर्लेखादीषु पाठाः———(१) न१, २, ३, ४, ग१, त्रि. पु., मुं. पु.–पश्यन्समास्ते ; न३, ७, ग३, त, मु. पु., क. पु.–पश्यन्सदास्ते ; न. पु.–पश्चात्सदास्ते ; न६, ग२, ४–×××× ; ग५, ६, न८–नमामि मोक्ष——; (२) न१, ५–हृदि मूर्ध्नि चान्वहम् ; न२, ७– —————वान्वहम् ; न४, ६, ग३, त्रि. पु., मुं. पु.– ———————चाहम् ; न३– ————————वाहम् ; त, न. पु., मु. पु., क. पु.– ——————————जातम् ; ग१, ———वीतशोका ; ग५, ६, न८– (मोक्ष-) प्रदमादि-देवम्; ग२, ४– ×××।

४६/१–ग५, ६, न८– —————— –मनन्तरूपं ; त– —————— –मचिन्त्यमच्यु-तम् ; न१, २, ५, ७, ग२, ४–×××× । ४६/२–न३, ६– ————— —कृत-प्रमेयम् (?–कृदप्रमेयम्) ; न४– ——————हृदि प्रमेयम् ; त– ———————हरं त्वमेयम् ; ग३–प्रपंचजन्मा हृदयप्रमेयम् ; ग५, ६, न८–प्रपंचजन्मातिगमप्रमेयम् ; न१, २, ५, ७, ग२, ४, ५, ७ –××××। ४६/३–न६– ——————चाहं ; न४– ————हृदि मूर्ध्नि जातम् ; ग५, ६– —————श्रुतिमूलभूतं ; न८–तं वामदेवं श्रुतिमूलभूतं ; न१, २, ५, ७,

गर, ४–× × × ×। ४६/४–इदं चरणं पुनर्द्विधा विभज्य लेखानां पुस्तकानां च साम्य-वैषम्ये निर्णेतव्ये भवतः। तौ विभागौः–(१) पश्यन्सदास्ते; (२) हृदि मूर्ध्नि चान्वहम्। तयोर्लेखादिषु पाठाः–न३, ४, ६, ग३, मु. पु., क. पु.–पश्यन्सदास्ते; ग१, त–पश्यन्समास्ते; न. पु.–पश्चात्सदास्ते; न८–दृष्वा सदा खे; न१, २, ५, ७, ग२, ४–× × × ×; ग५, ६–नमामि मोक्ष——; (२) त–हृदि मर्ध्नि चान्वहम्; न४, ६, ग३, त्रि. पु., मुं. पु., न. पु.–——चाहम्; न३– ————वाहम्; क. पु.– ————जातम्; मु. पु.– ————जातः (?); न८– ————चैव; ग१–हृदि वीतशोका; ग५, ६– (मोक्ष-) प्रदमादिदेवम्; न१, २, ५, ७, ग२, ४–× × × ×।

३६-४६ श्लोकांना क्रमो यथोपरि निर्णीतस्तथा न कस्मिन्नपि हस्तलेखे न वा कस्मिन्नपि मुद्रितपुस्तके। "न१, २, ४, ५, ७, ग१, २, ३, त," लेखेषु सर्वेषु च मुद्रितपुस्तकेषु प्रथमं ४२-४६ श्लोकाः, ३६-४१ श्लोकाश्च तेषां पश्चाद्वर्तन्ते; "न४, ग३" लेखयोश्च "वाजपेयाश्वमेधैश्च" इत्याद्यत्यन्तो विसंगतः श्लोकोऽधिकोऽन्ते वर्तते। परं च ४४ तमे गार्गि "रहस्यावसथे विवेश" इति कथनानन्तरं ४१ तमान्तर्गता याज्ञवल्क्योक्तिः "कर्तव्यं देहिभिर्गार्गि" इत्ययुक्ता दृश्यते। द्वादशोऽध्यायः "क" लेखे नास्त्येव; शिष्टेषु ६ लेखषु च भिन्नभिन्नः क्रमविपर्यासः श्लोकव्यावृत्तिश्च दृश्येते निम्नलिखितप्रकारेण:—न३–४२-४५, ४६, ३६-३९; ४०-४१ न स्तः॥ न६–४१/१-२, ४६, ३७, ३८, ४१/३-४, ४३, ४४ (त्रूटियुक्तः), ४५/१-२, ४६/१-२, ४६–३-४, ३६-४०॥ न८–४२-४३, ३६-३८, ३९/३-४, ४०/१-२, ४१, ४४-४६॥ ग४–४१-४२, ४६, ३७, ३९-४०, ४१ (पुनः), ४४-४६, ३८॥ ग५–४६, ३६, ४२-४५, ४०, ४० (पुनः पाठान्तरैःसहितः); ३७-३९ न विद्यन्ते॥ ग६–३६-३७, ४२-४६; ३८-४१ न विद्यन्ते॥ अतः पूर्वापरसम्बन्धमवलोक्य ३६-४६ श्लोकानां सोपपत्तिकः पौर्वापर्यक्रमो निश्चित्य स्वीकृतोऽस्मिन्ग्रन्थ इत्योम्॥